# VYAS PANCHANG

ज्योतिष-पंचांग-पूजा पाठ एवं ज्योतिष परामर्श

बालागाम,ता.केशोद,जिला.जूनागढ़,गुजरात,भारत(इन्डिया) पिन:362220

www.vyaspanchang.com, help@vyaspanchang.com, MO.NO.94087 28736 (11 AM TO 06 PM)

# ॐ प्रतिष्ठा मौक्तिकं

संस्कृत

VYAS PANCHANG

## १० दशमः प्रकारः ९० कलशात्मकः प्रतिष्ठामयूखोक्तः ।

उत्तरवेदी-भद्रपीठम् मध्यवेदी-भद्रपीठम् दक्षिणवेदी-भद्रपीठम्

१ क्षार

गर्भो० ८ २ क्षीर

स्वादु ७ ३ दधि

इक्षु ६ ४ घृत

५ सुरा

५ ४ ३ २ १ पं-२ ६ ५ ४ ३ २ १ पं-२

ग ग ग ग ग स्थपति ग. ग. ग. ग. गन्धो

६ ५ ४ ३ २ १ पं-१ ६ ५ ४ ३ २ १ पं-१

ग.भ.गो.गो.क.मृ. गन्धो० भस्म गोमय गोमूत्र कषाय मृत्तिका

११ कलशाः १२ कलशाः

लौकिकाः

१०

९

८

७ १० ९ ८ ७ ६ ५ ४ ३ २ १ पं-७

६ पला नाग बि वट चू. प्ल. अ. ज. शा. कदम्ब

५ १० ९ ८ ७ ६ ५ ४ ३ २ १ पं-६

४ नवरत्न दूर्वा पञ्च सर्वौ सहस्र धा गोशृ. सुव. फल. पुष्प

३ पल्लव

२ ५ ४ ३ २ १ पं-५ कषायाः

१ क क क क क

५ ४ ३ २ १ पं-४ शुद्धकलशाः

समुद्रः ५ ४ ३ २ १ पं-३

४ ३ श. म. घृ. द. प.

२ १ १० ९ ८ ७ ६ ५ ४ ३ २ १ पं-२ शुद्धकलशाः

१० ९ ८ ७ ६ ५ ४ ३ २ १ पं-१

श. म. घृ. द. प. पञ्चग भस्म गोमूत्र गोमय मृ.

१२+११+१०+१०+४+५+५+५+१०+१०+८=९०

Scanned by CamScanner

विमोकान्तम् । नीराजनादिक्ष्मापनान्तम् । विश्वकर्मादीनां पूजनम् । दानसंकल्पाः । दक्षिणादानम् । आशीर्वादः । अग्निस्थापितदेवताविसर्जनम् । कर्मसमाप्तिः । शिल्पिद्वारा स्थापितशिलानां इष्टकापाषाणसिकतालेपादिना स्थिरीकरणं समत्वञ्च सम्पादयेत् । शिलावस्त्राणां शिल्पिने दानम् ॥ इति शिलास्थापनप्रयोगः ॥

## ४ संक्षिप्तः पूर्वोत्तराङ्गसहितसर्वप्रायश्चित्तप्रयोगः ।

(धर्मकर्मसु पापक्षयपूर्वकमधिकारासिद्ध्यर्थमातुरावस्थायाञ्च सञ्चितपापक्षयपूर्वकमुत्तमलोकप्राप्त्यर्थं पूर्वाङ्गोत्तराङ्गसहितं सर्वप्रायश्चित्तं क्रियते । तत्र वापीकूपतडागारामदेवतायतनप्रतिष्ठादिपूर्त्तकर्मसु प्रायशोऽनेकजनैः साहित्यद्रव्यश्रमधनदानादिना निर्माणस्य दृष्टत्वात् प्रासादादीनाञ्च सार्वजनीनत्वाद्यथांशं दातॄणां फलभोक्तृत्वादनेकेषां यजमानानां प्रायश्चित्तकरणस्यानौचित्यात् कञ्चिदधिकारिणं द्विजं प्रतिनिधित्वेन वृत्वा द्रव्योत्सर्गं कृत्वा प्रतिनिधिद्वारा समग्रं प्रतिष्ठादिकर्म सम्पाद्यते । तेन प्रतिनिधिना चावश्यं प्रायश्चित्तं कार्यम् । प्रतिष्ठाप्रारम्भदिनात् पूर्वं शुभेऽह्नि रिक्तायां वा तिथौ पूर्वोत्तराङ्गसहितः समग्रः प्रायश्चित्तविधिः प्रतिनिधिना सम्पाद्यः । तथाकरणाशक्तौ प्रतिष्ठारम्भदिने प्रातः संक्षिप्तः सर्वप्रायश्चित्तप्रयोगः कार्यः । एतावतोऽप्यसंभवे यथाशक्ति प्राजापत्यप्रत्याम्नायरूपरजतनिष्करूप-द्रव्यदानसंकल्पं कुर्यात् । अभ्युदयार्थे प्रायश्चिते वपनाभावः । समग्रः प्रयोगोऽन्यत्र द्रष्टव्यः ।)

भस्मधारणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । संकल्पः- विष्णु० समस्तग्रामजनभक्तजन प्रतिनिधिभूतः सपत्नीको यजमानोऽहम् समस्तभक्तजनानां कल्याणाय प्रासादे प्रतिमासु च सूर्याचन्द्रमसौ यावद् देवकलासान्निध्यहेतवे करिष्यमाण (द्वि-त्रि-पञ्च-सप्त) दिनसाध्यसग्रहमखसप्रासादाचलप्रतिष्ठाकर्मणि, मम सपत्नीकस्य, अनेकजन्मार्जितमहापातकव्य-तिरिक्तकायिकादिपातकनिवृत्तिपूर्वकम्, देहमनोविशुद्धिपूर्वकम्, अधिकारसिद्ध्यर्थं श्रीपरमेश्वरप्रीत्यर्थं पूर्वोत्तराङ्गसहितं सर्वप्रायश्चित्तमहं करिष्ये । तत्रादौ विष्णुस्मरणं करिष्ये । ॐ इदं विष्णु० पापघ्ने महाविष्णवे नमः नमस्करोमि । (सम्भवे-मृत्तिका-गोमय-गोमूत्र-भस्म-गोरज :- धान्य-फल-हिरण्य-सर्वौषधी-गङ्गोदकस्नानानि मन्त्रैः कुर्यात्, तदन्ते स्नानं द्वादश गण्डूषान् वा कृत्वा ।) विदुषो वेद धर्मज्ञान् प्रार्थयेत् - मम पातकनिरासार्थमनुग्रहं कृत्वा प्रायश्चित्तमुपदिशन्तु भवन्तः:- इति तान् संपूज्य संतोषयेत् । विद्वांसो द्रव्यशक्तिं विचार्य सार्धाब्द-४५ त्र्यब्द-९० षडब्द-१८० गावः, एतदन्यतमं पक्षं निश्चित्यानुवादकद्वारा प्रायश्चितोपदेशवाक्यं यजमानाय श्रावयेत् ।) अनुवादकः- अमुकाब्द सर्वप्रायश्चित्तेन पूर्वोत्तराङ्गसहितेन आचीर्णेन तव शुद्धिर्भविष्यति, तेन त्वं कृतार्थो भविष्यसि - इति त्रिवारमुपदिशेत् । यजमानः - ओम् - इति स्वीकृत्य पञ्चगव्यं मन्त्रैः संपादयेत् । संकल्पः - व्याहृतिहोमसिद्ध्यर्थं मनः संकल्पितं घृतं आचार्याय दास्ये । पञ्चगव्यमादाय-यत्त्वगस्थिगतं पापं देहे तिष्ठति मामके । प्राशनात् पञ्चगव्यस्य दहत्यग्निरिवेन्धनम् -ॐ इति प्रणवेन प्राश्य आचम्य ।

Scanned by CamScanner

सं० पूर्वाङ्गगोमिथुनद्रव्यं दास्ये। पूर्वाङ्गविष्णुश्राद्धप्रत्याम्नायभूतं द्रव्यं दास्ये। प्रायश्चित्ताय निश्चितं द्रव्यं गन्धपुष्पाक्षततुलसीदलसहितं पात्रे निधाय-सं० अमुकस्य मम महापातकव्यतिरिक्तसमस्त पातकनिरसनपूर्वकं देहमनोविशुद्धिपूर्वकं जनपदश्रेयसे करिष्यमाणसप्रासाद सग्रहमखप्रतिष्ठाकर्मणि अधिकारसिद्ध्यर्थं अमुकाब्दसर्वप्रायश्चित्तस्य प्राजापत्यप्रत्याम्नायरूपव्यावहारिकरजतनिष्कद्रव्यं ब्राह्मणेभ्यो विभज्य दातुमहमुत्सृज्ये इति द्रव्यस्योपरि जलं क्षिपेत्। सं० उत्तराङ्गव्याहृतिहोम सिद्ध्यर्थं मनःसंकल्पितं घृतमाचार्याय दास्ये। सं० उत्तराङ्गगोमिथुनद्रव्यं दास्ये। उत्तराङ्गविष्णु श्राद्धप्रत्याम्नायभूतं द्रव्यं दास्ये। यथाशक्ति विहितदाननिष्क्रयीभूतं द्रव्यं दास्ये॥ यजमानः - ॐ यद्ग्रामे० यद्देवा देवहेडनं० यदि दिवा यदि नक्त० यदि जाग्रद्यदि स्वप्न० मुञ्चत्व ह हसः ॥४॥ गावो ममा० मम पापं व्यपोहतु॥ इति मन्त्रान् पठेत्।

सं० अनेन पूर्वोत्तराङ्ग सर्वप्रायश्चित्तेन मम (सपत्नीकस्य) समस्तपातकनिवृत्तिपूर्वकं करिष्यमाणकर्मणि अधिकारसिद्धिरस्तु। अनेन प्रायश्चित्तेन पापापहा महाविष्णुः प्रीयताम्। विष्णवे नमो० ३ नमः। (ततः स्नात्वा वा द्वादश गण्डूषान् कृत्वाऽत्मानं प्रोक्ष्य जलं निष्कासयेत्।

एतावत्करणस्याप्यसंभवे-सं० मम सपत्नीकस्य पातकनिवृत्तये करिष्यमाणकर्मणि अधिकारार्थं पञ्चदश १५ प्राजापत्यानि रजतगोनिष्कप्रत्याम्नायभूतव्यावहारिकद्रव्यद्वारा आचरामि। एतावद्द्रव्यं ब्राह्मणेभ्यो विभज्य दास्ये। तेन करिष्यमाणकर्मणि अधिकारसिद्धिरस्तु। उदकोपस्पर्शः। इति सर्वप्रायश्चितविधिः।

## ८ प्रतिनिधिवरणम्। द्रव्योत्सर्गः।

(प्रतिष्ठादिकर्मणां पूर्तकर्मत्वादनेकदातृसमालम्बितत्वात् सार्वजनीनत्वाच्च सर्वेषां दातॄणां सममेव प्रधानकर्मसम्पादनस्य शास्त्रविरुद्धत्वात् पूर्तकमलाकरप्रतिष्ठापद्धतिकल्पलताद्यनेकग्रन्थसम्मतत्वात् कर्मसौकर्याय सदाचारकर्मनिष्ठद्विजरूपप्रतिनिधिवरणमावश्यकम्॥ एक एव दाता प्रासादप्रतिमादिसम्पादक उपनीतो द्विजश्चेत् प्रतिनिधवरणमनावश्यकम्। लोकसङ्ग्रहाय सर्वानधिकारिणो दातॄन् उपावेश्य प्रतिनिधिवरणं द्रव्योत्सर्गश्च कारयेत्।)

सर्वान् यजमानानुपावेश्य- तिलककरणम्। शिखाबन्धनम्। आचमनम्। प्राणायामः। शान्तिपाठः देवतानमस्कारादि। संकल्पः, अद्य० अहं मम सकुटुम्बस्य अस्मिन् देशे वसतां द्विपदां चतुष्पदाञ्च कर्मजन्य सकलदुःखदारिद्र्यदौर्भाग्य ग्रहपीडा दुर्निमित्तोपशमनपूर्वकं सकलसुखसौभाग्यलक्ष्मीवंशाभिवृद्धि सदभीष्ट सिद्ध्यर्थं प्रासादनिर्माणप्रतिमादिसंपादनकर्मणि साहाय्यकर्तॄणां समस्तपूर्वजानां उद्धारपूर्वकं प्रासादप्रतिमाणुसंख्याकवर्षाणि यावद् ब्रह्मलोक (गोलोक-रुद्रलोक वैकुण्ठ) निवास हेतवे सूर्याचन्द्रमसौ यावत् प्रासादे प्रतिमासु च देवकलासान्निध्यहेतवे सग्रहमखसप्रासाद (अमुक दिनसाध्य-अचल प्रतिष्ठाकर्म सम्पादयितुं प्रतिनिधिवरणं द्रव्योत्सर्गं च करिष्ये। तत्रादौ आसनविधिं दिग्रक्षणं कलशार्चनं दीपपूजनं

Scanned by CamScanner

गणपतिपूजनं (प्रैषात्मकपुण्याहवाचनं) च करिष्ये। आसनविध्यादि गणपतिपूजनान्तं कृत्वा। (सति काले प्रैषात्मकपुण्याहवाचनं कृत्वा।) सं० अस्माकं सर्वेषां भक्तजनानां देशजनानाञ्च कल्याणाय प्रतिष्ठाकर्म सम्पादयितुं अमुकप्रवरान्वितामुकगोत्रोत्पन्नं अमुकवेदान्तर्गतममुकशाखाध्यायिनं अमुकशर्माणं (सपत्नीक) ब्राह्मणं अस्मत्प्रतिनिधित्वेन त्वामहं वृणे इति साक्षतजलपूगीफलं प्रतिनिधिहस्ते दद्यात्। प्रतिनिधिः - वृतोऽस्मि-इति ब्रूयात्। प्रतिनिधिहस्ते कङ्कणबन्धनं पूजनञ्च कुर्यात्।

ततो यजमानाः पात्रे शताधिकं सहस्राधिकं वा द्रव्यं निधाय तदुपरि गन्धपुष्पाक्षततुलसीदलानि निधाय-सं-समस्तग्रामजनभक्तजनदेशजनहिताय प्रतिष्ठाकर्म संपादयितुं एतावदपेक्षितमधिकमपेक्षिष्यमाणञ्च द्रव्यं दातुं प्रतिजानीमहे-इत्युक्त्वा प्रतिनिधिहस्ते जलं दद्यात्। द्रव्यपात्रं स्पृष्ट्वा प्रतिनिधिहस्ते दद्यात्। प्रतिनिधिः - ओम्-इति स्वीकुर्यात्। आशीर्वादादि। यज० अनेन प्रतिनिधिवरणेन द्रव्योत्सर्गकर्मणा च भगवान् परमेश्वरः प्रीयताम्। न मम। (प्रतिनिधिः द्रव्यं संरक्षेत्। ततः सर्वप्रायश्चित्तमुपर्युक्तं कृत्वा प्रधानकर्मारभेत।) इति प्रतिनिधिवरण-द्रव्योत्सर्गविधिः।

## ६ प्रधानकर्मारम्भः।

यथोक्तमण्डपे मण्डपाद् दक्षिणतः पश्चादुत्तरतो वा बहिः, छायामण्डपे तु मण्डपाभ्यन्तरतः कृतप्रायश्चित्तः सुस्नातः परिहिताहतवासाः सोत्तरीयः कृतनिर्णेजनान्तनित्यक्रियः कर्ता स्वासने दक्षिणतः पत्न्या सह प्राङ्मुख उपविशेत्।

तिलककरणम्-स्वस्तिस्तु या० मन्त्रार्थाः सफलाः० (ऋ० परि०) ॐ यशस्करं बलवन्तं प्रभुत्वं तमेव राजाधिपतिर्बभूव। संकीर्णनागाश्वपतिर्नराणां सुमङ्गल्यं सततं दीर्घमायुः॥ (कृ० यजु०) ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः। स्वस्तिनः पूषा विश्ववेदाः। स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः। स्वस्ति नो बृहस्पतिर्दधातु॥ (शु० यजु०) ॐ स्वस्ति नऽइन्द्रो वृद्धश्रवा ऽ स्वस्ति नः पूषा विश्ववेदाः। स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति बृहस्पतिर्दधातु॥१९/२५॥ (साम०) स्वस्तिन इन्द्रो वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः। स्वस्तिनो नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु॥ (अथर्व०) ॐ स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः। विश्वंसुभूतं सुविदत्रं नो अस्तु ज्योगे व दृशेम सूर्यम्॥१-६-३१-४॥ निर्विघ्नमस्तु॥ शिखाबन्धनम्-ऊर्ध्वकेशि विरुपाक्षि मांसशोणित भोजने। तिष्ठ देवि शिखाबन्धे चामुण्डे चापराजिते॥ ॐ मानस्तोके० सदमित्त्वा हवामहे॥ यजमानदक्षिणहस्ते पत्न्या वामहस्ते रक्तसूत्र (कङ्कण) बन्धनम्-जीवेद्वर्षशतं० यावद्भूमण्डलं० ॐ यदा बध्नन् दाक्षायणा हिरण्य ऽ शतानीकाय सुमनस्यमानाः। तन्मऽआबध्नामि शतशारदाया युष्माञ्जरदष्टिर्य्यथासम्॥३४/५२॥ कर्मारम्भे द्विराचमनम्-१ ॐ भूः स्वाहा-ऋग्वेदं प्रीणामि। २ ॐ भुवः स्वाहा यजुर्वेदं प्रीणामि। ३ ॐ स्वः स्वाहा सामवेदं प्रीणामि। हस्तप्रक्षालनम् - ॐ भूर्भुवः स्वर्नमः - अथर्ववेदेतिहासपुराणादीनि प्रीणामि। पुनराचमनम् - १ ॐ केशवाय नमः स्वाहा। २

ॐ नारायणाय नमः स्वाहा । ३ ॐ माधवाय नमः स्वाहा । हस्तप्रक्षालनम् - ४ ॐ गोविन्दाय नमः । ५ ॐ विष्णवे० ६ ॐ मधुसूदनाय० ७ ॐ त्रिविक्रमाय० ८ ॐ वामनाय० ९ ॐ श्रीधराय० १० ॐ हृषीकेशाय० ११ ॐ पद्मनाभाय० १२ ॐ दामोदराय० १३ ॐ संकर्षणाय० १४ ॐ वासुदेवाय० १५ ॐ प्रद्युम्नाय० १६ ॐ अनिरुद्धाय० १७ ॐ पुरुषोत्तमाय० १८ ॐ अधोक्षजाय० १९ ॐ नारसिंहाय० २० ॐ अच्युताय० २१ ॐ जनार्दनाय० २२ ॐ उपेन्द्राय० २३ ॐ हरये० २४ ॐ श्रीकृष्णाय नमः - इति सर्वाङ्गानि प्रोक्षेत् ॥ प्राणायामाः - (सर्वत्र विनियोगेषु वाक्योच्चारणम्, जलग्रहणमाचारात् - (ह्रीं नमो भगवते वासुदेवाय-९ वारम्) प्रणवपूर्वकद्वादशाक्षरीमहामन्त्रस्य परब्रह्मऋषिः परमात्मा देवता दैवी गायत्री छन्दः, सप्तानां व्याहृतीनां विश्वामित्रजमदग्नि भरद्वाजगौतमात्रिवसिष्ठकश्यपा ऋषयः, अग्निवायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवा देवताः, गायत्र्युष्णिगनुष्टुब् बृहतीपङ्क्ति त्रिष्टुब्जगत्यश्छन्दांसि, तत्सवितुरित्यस्य विश्वामित्रऋषिः, सविता देवता गायत्री छन्दः आपोज्योतिरित्यस्य प्रजापतिर्ऋषिः ब्रह्माग्नि वायुसूर्या देवताः, यजुश्छन्दः, सर्वेषां प्राणायामे विनियोगः । आत्मनः समन्तात्प्रदक्षिणवदुदकक्षेपणम्- ॐ नमो भगवते वासुदेवाय-ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो योनः प्रचोदयात् । ॐ आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ॥ (इति पूरकं द्विः, कुम्भकं चतुर्वारम्, रेचकं त्रिः)

पवित्रधारणम्-अपवित्रः पवित्रो० ॐ पवित्रे स्थो० तच्छकेयम् ।

## ७ शान्तिपाठः ।

ऋग्वेदे-ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः । स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावा पृथिवी सुचेतुना ॥५-५१-११॥ स्वस्तये वायुमुप ब्रवा महै सोमं स्वस्ति द्यावा भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥१२॥ विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये । देवा अवन्त्वृभवः स्वस्तये स्वस्तिनो रुद्रः पात्वंहसः ॥१३॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति न इन्द्रश्चाग्निश्च स्वस्तिनो अदिते कृधि ॥१४॥ स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव । पुनर्ददताघ्नता जानता संगमेमहि ॥५-५१-१५॥ स्वस्त्ययनं तार्क्ष्यमरिष्टनेमिं महद्भूतं वायसं देवतानाम् । असुरघ्नमिन्द्र सखं समत्सु बृहद्यशो नाव मिवारुहेम ॥ (ऋ-परि०) अंहोमुचमाङ्गिरसं गयं च स्वस्त्यात्रेयं मनसा च तार्क्ष्यम् । प्रयतपाणिः शरणं प्रपद्ये स्वस्ति संबाधेष्वभयं नो अस्तु ॥ (ऋ० परि०) ॥७॥ (आनोभद्रा० जनित्वम्-१-८९-१ तः १०॥ शन्न इन्द्राग्नी० सदानः- ७-३५-१ तः १५) कृ० यजु० शान्तिपाठः- ॐ शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे । शतं योनः शरदो अजीतानिन्द्रो नेपदति दुरितानि विश्वा ॥५-७-२/१॥ ये चत्वारः पथयोदेवयानां अन्तरा द्यावा पृथिवी वियन्ति । तेषां यो अज्यानिमजीतिमावहान् तस्मैनो देवाः परिदत्तेह सर्वे ॥२॥ ग्रीष्मो

Scanned by CamScanner

हेमन्त उत नो वसन्तः शरद्वर्षाः सुवितं नो अस्तु । तेषामृतूनाᳬशतशारदानां निवात एषामभये स्याम ॥३॥ इदुवत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः । तेषां वयᳬसुमतौ यज्ञियानां ज्योग जीता अहताः स्याम ॥४॥ भद्रान्नः श्रेयः समनैष्ट देवास्त्वयाऽवसेन समशीमहि त्वा । सनो मयोभूः पितो आविशस्व शंतोकाय तनुवे स्योनः ॥५॥ ५-७-२-१ तः ॥५॥ शुक्लयजुर्वेदे शान्तिपाठः - ॐ आनो भद्रा ३ क्रतवो यन्तु व्विश्वतोऽदब्धासोऽअपरीतासऽउद्भिदः । देवानो यथा सदमिद् वृधेऽअसन्नप्रायुवो रक्षितारो दिवे दिवे ॥१४/२५॥ देवानाम्भद्रा सुमतिर्ऋजूयतान्देवानाᳬरातिरभिनो निवर्त्तताम् । देवानाᳬसख्यमुपसेदिमाव्वयन्देवानऽआयुः प्रतिरन्तु जीवसे ॥१५/२५॥ तान्पूर्वया निविदाहूमहे व्वयम्भगम्मित्रमदितिन्दक्षमस्रिधम् । अर्य्यमणंव्वरुण ह सोमंमश्विना सरस्वतीनः सुभगा मयस्करत् ॥१६/२५॥ तन्नो व्वातो मयोभुव्वातु भेषजन्तन्माता पृथिवी तत्पिताद्यौः । तद्ग्रावाणः सोमसुतो मयोभुवस्त दश्विना शृणुतन्धिष्ण्या युवम् ॥१७/२५॥ तमीशानञ्जगतस्तस्थुषस्पतिन्धियञ्जिन्वमवसे हूमहे व्वयम् ॥ पूषा नो यथा व्वेदसामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये ॥१८/२५॥ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा व्विश्ववेदाः । स्वस्ति न स्तार्क्ष्योऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥१९/२५॥ पृषदश्वा मरुतः पृश्निमातरः शुभँय्यावानो व्विदथेषु जग्मयः । अग्निर्जिह्वा मनवः सूरचक्षसो व्विश्वेनो देवाऽअवसागमन्निह ॥२०/२५॥ भद्रङ्कर्णेभिः शृणुयाम देवा भद्रम्पश्येमाक्षभिर्य्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेमहि देवहितँ य्यदायुः ॥२१/२५॥ शतमिन्नु शरदोऽअन्ति देवा यत्रानश्चक्रा जरसन्तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मानो मद्ध्यारीरिषतायुर्गन्तोः ॥२२/२५॥ अदितिर्द्यौरदितिरन्तरिक्षमदितिर्म्माता सपिता स पुत्रः । विश्वेदेवाऽअदितिः पञ्चजनाऽअदितिर्ज्जातमदितिर्जनित्वम् ॥२३/२०॥ द्यौः शान्तिरन्तरिक्ष ह शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्पतयः शान्ति र्व्विश्वे देवा ३ शान्ति र्ब्रह्मशान्तिः सर्व्व ह शान्तिः शान्तिरेव शान्ति ३ सा मा शान्तिरेधि ॥१७/३६। यतो यतः समीहसे ततो नोऽअभयङ्कुरु । शन्नः कुरुप्प्रजाभ्योऽभयन्नः पशुभ्यः ॥२२/३६॥ (इन्द्रो व्विश्वस्य० रभिस्रवन्तु नः ॥अ-३६ मं-८ तः १२ । द्यौ शान्ति० शरदः शतात् ॥अ-३६ म-१७ तः २४॥ यज्जाग्रतो० सङ्कल्पमस्तु- अ-३४ मं-१ तः६ ॥)

५र २र १११ २र१३ ५र३र२

सामवेदे शान्तिपाठः- ॐ त्य मूषु । वाजि । ना ३४५ म् । देवजूताम् । सहोवानन्ता ।

२ २ ३४५ २ ३ ५ २ २ ३र५ २ १ र र ३२

सता ३ । रᳬरथानाम् । अरिष्टना २३४ इमीम् । पृतना ३४३ ज माशुम् । स्वस्त । या ३ । तार्क्ष्यमीहा

२ ४ १ १ १११ ६ ५ ४ ४र

३४३ । हू ३ वा ५ इमा ६५६ हा २३४५ ह य इ मा

२र१र ७ २ १ र र ७ २ १

त्रातारमिन्द्रमविता । रमी २३ न्द्राम् । हवे हवे सुहवᳬशू । रमी २ इन्द्राम् । हुवा इ नु शक्रं

Scanned by CamScanner

७ २ २१ २ १र २ १र २ २ ४
पुरु हू । तमी २३ न्द्राम् । इदꣳस्वस्तिनो मघवा । वा ३४३ इ । तू ३ वा ५ इन्द्रा ६५६ : ॥

१ २ ३२३१२३ १ २ ३१२ २उ ३ १ २
शन्नो देवीरभिष्टये शन्नो भवन्तु पीतये । शं यो रभिस्रवन्तु नः ॥

३ २ १ १ २ ३१२ ३ १ २ ३ २ ३ १२ ३ २ ३ २ ३ १ २ ३ २ ३
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः स्वस्तिनो
२ ३ १ २
बृहस्पतिर्दधातु ॥१८७५॥

अथर्ववेदे शान्तिपाठः - ॐ शान्ता द्यौः शान्ता पृथिवी शान्तमिदमुर्व १ न्तरिक्षम् । शान्ता उदन्वतीरापः शान्ता नः सन्त्वोषधीः ॥१॥ शान्तानि पूर्वरूपाणि शान्तं नो अस्तु कृताकृतम् । शान्तं भूतं च भव्यं च सर्वमेव शमस्तु नः ॥२॥ इयं या परमेष्ठिनी वाग् देवी ब्रह्मसंशिता । ययैव ससृजे घोरं तयैव शान्तिरस्तु नः ॥३॥ इदं यत् परमेष्ठिनं मनो वां ब्रह्मसंशितम् । येनैव ससृजे घोरं तेनैव शान्तिरस्तु नः ॥४॥ इमानि यानि पञ्चेन्द्रियाणि मनः षष्ठानि मे हृदि ब्रह्मणा संशितानि । यैरेव ससृजे घोरं तैरेव शान्तिरस्तु नः ॥५॥

शन्नो मित्रः शं वरुणः शं विष्णुः शं प्रजापतिः । शन्न इन्द्रो बृहस्पतिः शन्नो भवत्वर्यमा ॥६॥ शन्नो मित्रः शं वरुणः शं विवस्वाञ्छमन्तकः । उत्पाताः पार्थिवान्तरिक्षाः शंनो दिविचरा ग्रहाः ॥७॥ शं नो भूमिर्वेप्यमाना शमुल्का निर्हतं च यत् । शं गावो लोहितक्षीराः शं भूमिरवतीर्यतीः ॥८॥ नक्षत्रमुल्काभिहतं शमस्तु नः शं नोऽभिचाराः शमु सन्तु कृत्याः । शं नो निखाता वल्गाः शमुल्का देशोपसर्गाः शमु नो भवन्तु ॥९॥ शं नो ग्रहाश्चान्द्रमसाः शमादित्यश्च राहुणा । शं नो मृत्युर्धूमकेतुः शं रुद्रास्तिग्मतेजसः ॥१०॥ शं रुद्राः शं वसवः शमादित्याः शमग्नयः । शं नो महर्षयो देवाः शं देवाः शं बृहस्पतिः ॥११॥ ब्रह्म प्रजापति र्धाता लोका वेदाः सप्त ऋषयोऽग्नयः । तैर्मेकृतं स्वस्त्ययनमिन्द्रो मे शर्म यच्छतु ब्रह्मा मे शर्म यच्छतु । विश्वे मे देवाः शर्म यच्छन्तु सर्वे मे देवाः शर्म यच्छन्तु ॥१२॥ यानि कानि चिच्छान्तानि लोके सप्तऋषयो विदुः । सर्वाणि शं भवन्तु मे शं मे अस्त्वभयं मे अस्तु ॥१३॥

पृथिवी शान्तिरन्तरिक्षं शान्ति द्यौः शान्तिरापः शान्तिर्वनस्पतयः शान्तिर्विश्वे मे देवाः शान्तिः सर्वे मे देवाः शान्तिः शान्तिः शान्तिः शान्तिभिः । ताभिः शान्तिभिः सर्व शान्तिभिः शमयामो ह यदिह घोरं यदिह क्रूरं यदिह पापं तच्छान्तं तच्छिवं सर्वमेव शमस्तु नः ॥१४॥ का-१९ सू. ९ म-९ तः १४ ॥

(ॐ शन्न इन्द्राग्नी० क्षेत्रस्य पतिरस्तु शंभुः ॥ का-१९ सू. १० म-१ तः १० ॥ शन्नः सत्यस्य पतयो० बृहते सादनाय ॥ का-१९ सू. ११ म-१ तः ६ ॥) शान्तिः शान्तिः शान्तिः सुशान्तिर्भवतु ॥

Scanned by CamScanner

देवब्राह्मणनमस्काराः - साक्षतपूगीफलहिरण्यं ताम्बूलं धृत्वा प्रधानदेवतां स्मरेत् (ॐ जन्माद्यस्य० वेदानुद्धरते० यं ब्रह्मा० ) इदं विष्णु० श्रीश्चते० नमः शम्भवाय० अम्बे अम्बिके० सर्वेभ्यो देवेभ्यो नमो नमः । पुनरादाय - ब्रह्मानन्दं० नमो गुरुभ्यो० समस्तसंपत्० ॐ ब्राह्मणोऽस्य० ॐ उपह्वरे गिरीणा ँ सङ्गमे च नदीनाम् । धिया व्विप्रोऽअजायत ॥ ॥ सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।

देवतानमस्काराः - ॐ श्रीमन्महागणाधिपतये नमः । लक्ष्मीनारायणाभ्यां० । उमामहेश्वराभ्यां० । वाणीहिरण्यगर्भाभ्यां० ॥ शचीपुरन्दराभ्यां० । मातापितृचरणकमलेभ्यो० । इष्टदेवताभ्यो० । कुलदेवताभ्यो० । ग्रामदेवताभ्यो० । स्थानदेवताभ्यो० । वास्तुदेवताभ्यो० । गुरुभ्यो० । एतत् कर्मप्रधानदेवताभ्यो नमः । ॐ पुण्यं पुण्याहं दीर्घमायुरस्त्विति भवन्तो ब्रुवन्तु । पुण्यं पुण्याहं दीर्घमायुरस्तु ।

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः । लम्बोदरश्च विकटो विघ्ननाशो गणाधिपः ॥१॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः । द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥२॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा । संग्रामे संकटे चैव विघ्नस्तस्य न जायते ॥३॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् । प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥४॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः । येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥५॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासरैः । सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥७॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् । येषां हृदिस्थो भगवान् मङ्गलायतनं हरिः ॥८॥ तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपते तेऽङ्घ्रियुगं स्मरामि ॥९॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः । तत्र श्री विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥१०॥ सर्वेष्वारब्धकार्येषु त्रयस्त्रिभुवनेश्वराः । देवा दिशन्तु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥११॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् । सरस्वतीं प्रणौम्यादौ सर्वकामार्थ सिद्धये ॥१२॥ (द्वादश श्लोका गर्गसंहितोक्ताः) (आपदामप० विश्वेशं माधवं०)

## ८ प्रधानसंकल्पः

हस्ते साक्षतं जलमादाय - विष्णुर्विष्णुर्विष्णुः - (श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्य श्री ब्रह्मणो द्वितीये परार्धे अह्नो द्वितीये यामे श्वेतवाराहकल्पे सप्तमे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे भूर्लोके भारतवर्षे भरतखण्डे जम्बुद्वीपे अमुकारण्यैकदेशे अमुकक्षेत्रे अमुकनद्याः उत्तरे तीरे अमुकनद्याः दक्षिणे तटे शालिवाहनशके बौद्धावतारे अस्मिन् वर्तमाने अमुकनामके संवत्सरे अमुकायनगते मार्तण्डमण्डले अमुक ऋतौ शुभकारिणि अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरे अमुकदिवसनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते सूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथं राशिस्थानस्थितेषु सत्सु, एवं गुणगणविशेषेण विशिष्टे अस्मिन् पुण्याहे, अमुकप्रवरान्वित अमुकगोत्रोत्पन्नः अमुकवेदान्तर्गत अमुकशाखाध्यायी, (समस्तग्रामजनभक्तजनदेशजनप्रतिनिधिभूतः अमुकशर्मा (वर्मा, गुप्तः,) सपत्नीकः अहं, मम सकुटुम्बस्य

सपरिवारस्य श्रुतिस्मृतिपुराणतन्त्रागमोक्त सत्कर्मजन्य पुण्यफलप्राप्त्यर्थं, अस्मिन् ग्रामे नगरे देशे च वसतां सर्वेषां भक्तजनानां, मम च नानाविधकर्मविपाकजन्य-आधिदैविक-आधिभौतिक-आध्यात्मिकतापरोग-उपद्रव-दुख-दारिद्र्य-दौर्भाग्य-अतिवृष्टि-अनावृष्टि शलभ-शुक-मूषक-अग्न्यादि-ईतिभयनिवृत्तिपूर्वकं सर्वेषां क्षेमसुभिक्षकल्याणदीर्घायुरारोग्य-विपुल लक्ष्मी-कीर्ति-पुत्र-पौत्रादि-अनवच्छिन्नवंशाभिवृद्धि-ऐहिकपारलौकिक-अभ्युदय-निःश्रेयस-पुरुषार्थचतुष्टयसंप्राप्ति-भारतीय संस्कृति सुप्रतिष्ठा हेतवे, प्रासादनिर्माण-प्रतिमासंपादनादि कर्मणि सर्वतः साहाय्यकर्तॄणां भक्तानां पूर्वजानाम् उद्धारपूर्वकं प्रासादप्रतिमा अणु-संख्याकवर्षाणि यावद् अमुकलोकनिवास हेतवे सूर्याचन्द्रमसौ यावत् प्रासादे प्रतिमासु च देवकलासान्निध्यहेतवे सच्चिदानन्दघन (सपरिवार) अमुकदेवता चरणसरोरुह-अनुग्रह प्राप्तये, नूतने प्रासादे अमुकामुकदेवता प्रतिमानां एकरात्र (त्रिरात्र-पञ्चरात्र) अधिवास पक्षाश्रयेण सग्रहमखां सप्रासादां अमुकदिनसाध्यां अचलप्रतिष्ठां स्वयं ब्राह्मणद्वारा च करिष्ये ॥

पुनर्जलमादाय- तदङ्गत्वेन निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं मातृकापूजनं वैश्वदेवसंकल्पं वसोर्धारापूजनं आयुष्यमन्त्रजपं, नान्दीश्राद्धं, ब्रह्माचार्याद्यृत्विग्वरणं, वृतानां मधुपर्कार्चनं, स्वस्तिपुण्याहवाचनं, वर्धिनीकलशपूजनं मण्डपपूजनं मण्डपप्रवेशं, दिग्रक्षणं पञ्चगव्यकरणं, मण्डपाङ्ग गणपतिपूजनं बल्यन्तं वास्तुपूजनं, भूम्यादिपूजनं कुण्डदेवतापूजनं पञ्चभूसंस्कार पूर्वकं अग्निस्थापनं, मण्डलदेवता प्रधानदेवतास्थापनं, ग्रहस्थापनं, योगिनी स्थापनं भैरव (क्षेत्रपाल) स्थापनं अग्नितन्त्रं, ग्रहहोमं, कुटीरहोमं जलाधिवासं, स्थापितदेवतानाञ्च सायंतनपूजनान्तं प्रथमदिनसाध्यं कर्म यथायथं करिष्ये ॥

पुनर्जलमादाय-तत्रादौ आसनविधिं दिग्रक्षणं कलशार्चनं दीपपूजनं (सूर्यपूजनं) कलशासादनं मूर्तीनामग्न्युत्तारणपूर्वकं प्राणप्रतिष्ठां च करिष्ये ॥ ततः आसनविधिं, दिग्रक्षणं, कलशार्चनं दीपपूजनं सूर्यपूजनं कलशासादनं प्रतिमाग्न्युत्तारणप्राणप्रतिष्ठां च सम्पाद्य गणपतिपूजनं कुर्यात् ।

(इदं सकलकर्मणो निर्विघ्नतासिद्ध्यर्थं गणपतिपूजनं न कर्माङ्गभूतम्, किन्तु काम्यम्, मातृकासहितगणेशपूजनमेव कर्माङ्गम् । तत्र ऋग्वेदिनाम्, ऋद्धिबुद्धिसहित महागणपतये नमः, शुक्लयजुर्वेदिनां सिद्धिबुद्धिसहित श्रीमन्महागणाधिपतये नमः तैत्तिरीयसामवेद्यथर्ववेदिनां तु गणेशाम्बिकाभ्यां नमः, इति पूजनम् । वर्तमानकाले क्रियमाणः विधिस्त्रिंशदुपचारात्मकः, तदशक्तौ षोडशोपचारात्मकः पञ्चोपचारात्मको वा कार्यः ।)

## ९ गणपतिपूजनम् ।

रक्तवस्त्रे गोधूममण्डले मूर्त्तौ पूगीफलेष्वक्षतपुञ्जेषु वा गणेशमावाहयेत्-पुष्पाक्षतान् गृहीत्वा स्वहृदि गणेशं सपरिवारं ध्यायेत्-श्वेताङ्गं श्वेतवस्त्रं सितकुसुम गणैः पूजितं श्वेतगन्धैः, क्षीराब्धौ

Scanned by CamScanner

रत्नदीपैः सुरनरतिलकं रत्नसिंहासनस्थम् । दोर्भिः पाशाङ्कुशेष्टाभयधृतिविशदं चन्द्रमौलिं त्रिनेत्रं ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥ ॐ निषुसीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत् क्रियते किञ्चनारे महामर्कं मघवन् चित्रमर्च ॥ (कृ० यजु०) ॐ गणानान्त्वा गणपतिं हवामहे कविं कवीनामुपम श्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पतऽआनः शृण्वन्नूतिभिः सीद सादनम् ॥ (शु० यजु०) ॐ गणानान्त्वा गणपति ꣳ हवामहे प्रियाणान्त्वा प्रियपति ꣳ हवामहे निधीनान्त्वा निधिपतिं ꣳ हवामहे व्वसो मम । आहमजा निगर्भधमात्वमजासि गर्भधम् ॥

१ २र ३२१ ३२ ३१ २र ३ १ २र

(साम०) ॐ आतून इन्द्र क्षुमन्तं चित्रं ग्राभं संगृभाय । महाहस्ती दक्षिणेन ॥ (अथर्व०) ॐ निर्लक्ष्म्यंऽललाम्यं १ निरराति सुवामसि । अथ या भद्रा तानि नः प्रजाया अरातिं नयामसि ॥ ॐ भूर्भुवः स्वः सिद्धिबुद्धिसहित श्रीमन्महागणाधिपतये नमः सिद्धिबुद्धिसहितं श्रीमन्महागणाधिपतिं ध्यायामि । इति अक्षतपुष्पं मूर्त्तौ पूगीफलेषु वा निक्षिपेत् । तत आवाहन प्रतिष्ठादि क्षमापनान्तं पूजनं कुर्यात् । जलमादाय-अनेन सकलकर्मणो निर्विघ्नतासिद्ध्यर्थं कृतेन पूजनेन सिद्धिबुद्धिसहितः श्रीमन्महागणाधिपतिः प्रीयताम् । इति गणपतिपूजनम् ।

(यथोक्तमण्डपाभावे छायामण्डपकरणे अत्रावसरे स्वस्तिपुण्याहवाचनं कुर्यात् ।)

## १० मातृकापूजनम् ।

(ऋग्वेदिनां गौर्यादि ब्राह्म्यादिमातॄणां पूजनम् । प्रतिष्ठातिलके-कीर्तिर्लक्ष्मी धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः । बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः ॥ इति षोडशमातॄणां प्रासादादिजलोत्सर्गे पूजनं वसोर्धारापूजनञ्च विहितम् । यत्र नान्दीश्राद्धं तत्रैव मातृकापूजनं नान्यत्र) जलमादायकर्माङ्गभूतं मातृकापूजनं करिष्ये । हस्ते पुष्पाक्षतान्-गृहीत्वा-गणानान्त्वा १ ॐ भू० गणेशाय नमः गणेशं आवाहयामि । २ आयङ्गौः (गौरीर्मिमाय० ॐ भू० गौर्यै० गौरीं० । ३ कांसोस्मितां० ॐ भू० पद्मायै० पद्माम्० । ४ अदित्यै रास्ना० ॐ भू० शच्यै० शचीम्० । ५ मेधाम्मे० ॐ भू० मेधायै० मेधाम्० । ६ ॐ उपयामगृहीतोऽसि सावित्रो० ॐ भू० सावित्र्यै० सावित्रीम्० । ७ ॐ उद्धर्षय मघवन्० ॐ भू० विजयायै० विजयां० । ८ ॐ अस्माकमिन्द्रः० ॐ भू० जयायै० जयां० । ९ ॐ इन्द्र आसान्नेता० ॐ भू० देवसेनायै० देवसेनाम्० । १० ॐ आयन्तु नः० ॐ भू० स्वधायै० स्वधाम्० । ११ ॐ सꣳस्रवभागा० ॐ भू० स्वाहायै० स्वाहाम्० । १२ ॐ माताचते० आयङ्गौ० ॐ भू० मातृभ्यो० मातॄः० । १३ ॐ नाभ्या आसी० ॐ भू० लोकमातृभ्यो० लोकमातॄः० । १४ ॐ इहरति० ॐ भू० धृत्यै० धृतिम्० । १५ ॐ रयिश्च मे० ॐ भू० पुष्ट्यै० पुष्टिं० । १६ ॐ पितुन्न स्तोषं० ॐ भू० तुष्ट्यै० तुष्टिम्० । १७ देवीं वाचम्० ॐ भू० कुलदेवतायै० कुलदेवताम्० । ॐ मनोजूति० ॐ भू० गणेशगौर्याद्यावाहितमातरः सुप्रतिष्ठिता वरदा भवत ॥

Scanned by CamScanner

## ११ वैश्वदेवसंकल्पः ।

(कृतनिर्णेजनान्त वैश्वदेवस्य यजमानस्य मङ्गलकर्मण्यधिकारः, निर्णेजनानन्तरं पितृयज्ञ मनुष्ययज्ञ ब्रह्मयज्ञा अवशिष्टाः मनुष्ययज्ञस्य यति ब्रह्मचार्यतिथिभ्योऽन्नदानरूपत्वाद् तत्तद्दिनसाध्यकर्मान्ते भोजनसम्पत्तेर्मनुष्ययज्ञासम्भवः, मातृकापूजनस्य नान्दीश्राद्धाङ्गभूतत्वान्नान्दीश्राद्धस्य च मङ्गलकर्मणि बिहितत्वात् 'न स्वधाभिर्दूषयेत् तम्' इति श्रुतिवचनेन देवताविसर्जनं यावत् पितृयज्ञस्य निषिद्धत्वाद् प्राग् यावन्ति दिनानि निरग्निकस्य यान्ति, तावद्दिनसंख्यया प्रात्यहिकं दधितण्डुलयवानामन्यतमं द्रव्यमाहुति चतुष्टय पर्याप्तमेकीकृत्य दीयते, तद्वदत्रापि वैश्वदेवपर्याप्त सघृत तण्डुल दानं देवकोत्थापनं यावद् वैश्वदेवाकरणजन्यप्रत्यवायपरिहाराय वैश्वदेवफलप्राप्तये च गृह्यकारिकानुरोधेन देयमिति विवेकः)

संकल्पः - सघृतदक्षिणतण्डुलं पात्रमादाय अद्य० पूद तिथौ अमुकदिनसाध्यसग्रहमख (सप्रासाद) अचलप्रतिष्ठाकर्मणि देवकोत्थापनान्तं विहितवैश्वदेवाकरणजन्य प्रत्यवायपरिहारपूर्वकं वैश्वदेवकरणजन्यफलप्राप्तये इमान् सघृतदक्षिणाँस्तण्डुलान् तुभ्यमहं संप्रददे- इति दत्त्वा (ॐ देवकृतस्यैनसो० सर्वस्यैनसोऽवयजनमसि-इति मन्त्रं पठेत्। जलमादाय-अनेन सघृतदक्षिणतण्डुलदानेन वैश्वदेवफल समृद्धिरस्तु-इति जलमुत्सृजेत ।

## १२ वसोर्धारापूजनम् ।

(इदं कातीयामां छन्दोगानाञ्च विहितम्, नान्येषाम्। भित्तौ इष्टकायां ताम्बूले वा कुङ्कुमाङ्किताः सप्त पञ्च वा घृतधाराः सम्पाद्य उदक्संस्थं पूजयेत्। श्रीश्च लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा सरस्वती। माङ्गल्येषु प्रपूज्यन्ते सप्तैता घृतमातरः ॥ (अत्र कारिकायां 'पुष्टिः श्रद्धा सरस्वती' इति पाठस्य स्थाने 'स्वाहा प्रज्ञा सरस्वती' इति पाठोऽप्युपलभ्यते। पञ्चपक्षे अन्तिमे द्वे त्याज्ये।)

हस्तेअक्षतान् गृहीत्वा - ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्र धारम्। देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥३/१॥

१ ॐ श्रीणामुदारो० ॐ भू० श्रियै नमः श्रियमावाहयामि स्थापयामि। २ ॐ श्रीश्चते० ॐ भू० लक्ष्म्यै० लक्ष्मीम्० ३ ॐ इहरति० ॐ भू० धृत्यै० धृतिम्० ४ ॐ याम्मेधां० ॐ भू० मेधायै० मेधाम्० ॐ ५ ॐ रयिश्च० ॐ पुष्ट्यै० पुष्टिम्० ६ ॐ व्रतेन दीक्षा० ॐ भू० श्रद्धायै० श्रद्धाम्० ७ ॐ पावकानः सरस्वती० ॐ भू० सरस्वत्यै० सरस्वतीम्०। ॐ मनोजूति० ॐ भू० श्यादिसप्तघृतमातरः सुप्रतिष्ठिता वरदा भवत ॥ ततः श्रीसूक्तेन प्रत्यृचं नाममन्त्रेण वा पूजयेत्। ॐ अनेन पूजनेन वसोर्धारासमन्वितसगणेशगौर्यादिमातरः प्रीयन्ताम्।

Scanned by CamScanner

# १३ आयुष्यमन्त्रजपः ।

आचाराद् यजमानदक्षिणमणिबन्धे पत्न्या वामहस्ते रक्तसूत्ररूपं कङ्कणं बध्नीयात् । संकल्पः - अद्य० पू० तिथौ मम सकुटुम्बस्य समस्तभक्तजनानाञ्च सकलपीडानिवृत्तये दीर्घायुरारोग्यप्राप्तये ब्राह्मणद्वारा आयुष्यमन्त्रजपं करिष्ये । ॐ १ आयुष्यं वर्चस्य ० २ न तद्रक्षा सि० ३ यदाबध्नन्० (अ-३४-अं-५०-५१-५२) (अग्निरायुष्मान्० ८ त्र्यायुषं० दिवस्परि प्रथमं०) सं० आयुष्यमन्त्रजपकर्तृभ्यो ब्राह्मणेभ्यो दक्षिणां दास्ये । अनेन मम सकुटुम्बस्य समस्तभक्तजनानाञ्च दीर्घायुरारोग्य प्राप्तिरस्तु ॥

# १४ नान्दीश्राद्धविचारः ।

(नान्दीश्राद्धस्य मङ्गलसत्कर्मप्रतिबन्धक जननाशौच मरणाशौच सम्प्राप्तिनिवर्त्तकत्वं मङ्गलार्थत्वञ्चशास्त्रे प्रतिपादितम् । मुहूर्तान्तरालाभे नितरामावश्यकत्वे चाशौचप्राप्तेः सम्भवे निश्चितदिनात् पूर्वं विवाहे दशदिनेषु, श्रौतस्मार्ताग्निसाध्ययज्ञेषु एकविंशतिदिनेषु, चौले दिनत्रये, उपनयने षड्दिनेषु नान्दीश्राद्धं पूर्वं करणीयम् । तेन तत्तत्कर्मस्वावश्यकनियुक्तानामाशौचकृतप्रतिबन्धो नास्ति ।

ऋग्वेदिनां मातृपार्वण पितृपार्वणं सपत्नीकमातामहपार्वणञ्चेति पार्वणत्रयम् । कृष्णयजुर्वेदिनामप्येवम् । शुक्लयजुर्वेदिनां पितृपार्वणं सपत्नीकं मातामहपार्वणञ्च सपत्नीकम्-इति पार्वणद्वयम । अत्र मातृपितामही प्रपितामहीनामन्यतम जीवने, पितृपार्वणे सपत्नीकशद्बं । एवं मातामही प्रमातामही वृद्धप्रमातामहीनामन्यतमजीवने मातामहपार्वणे सपत्नीकशब्दं नोच्चरेत् । सामवेदे कोकिलमतानुसारिणां पितृपितामहप्रपितामहानामेकं पार्वणम् । मातृमातामहप्रमातामहानां द्वितीयं पार्वणम् । उभयत्रापि सपत्नीकसम्बन्धो नास्ति । अन्येषां छन्दोगानां पितृपार्वणं मातामहपार्वणञ्च सपत्नीकम् । अत्रापि सपत्नीकसम्बन्धो नास्ति । अन्येषां छन्दोगानां पितृपार्वणं मातामहपार्वणञ्च सपत्नीकम् । अथर्ववेदिनां पार्वणत्रये प्रथमानां त्रयाणामश्रुमुखत्वमलम्ब्य तेभ्यः परेषां त्रयाणां नान्दीमुखत्वं स्वीकृतम् । तेन मातृपार्वणे वृद्धप्रपितामहीतच्छ्वश्रूतत्प्रतिश्वश्रूणां ग्रहणम्, पितृपार्वणे वृद्धप्रपितामहतत्पितातत्पितामहानां, मातामहपार्वणे वृद्धप्रमातामहस्य पितृपितामहप्रपितामहानां ग्रहणम् । नान्दीश्राद्धे कर्तुः पितृजीवने पितुः सर्वान् पितृनुद्दिश्य, पितुर्मरणे तु स्वपितृनुद्दिश्य नान्दीश्राद्धं कार्यम् । तत्रापि पार्वणाद्यजीवने समग्रपार्वणलोपः ।

पितुर्मरणे पितामहजीवने तु पितृप्रपितामह वृध्धप्रपितामहा ग्राह्याः एवं मातृमातामहपार्वणयोर पिव्युत्क्रममृतौ बोध्यम् ॥ अपुत्रया विधवया प्रतिनिधिद्वारा क्रियमाणे नान्दीश्राद्धे प्रतिनिधिना 'यजमानाया भर्तृतत्पितृतत्पितामहाः, यजमानायाः पितृपितामहप्रपितामहाः सपत्नीकाः' इति ऊहेन पार्वणद्वये नान्दीश्राद्धं कार्यम् । कुत्रचित् तन्त्रे 'नान्दीश्राद्धं नैव कुर्यात् स्त्रीणां विधेयकर्मणि । तदभावे तु गां दद्यान्नान्दीश्राद्धफलाप्तये इति निर्देशान्नान्दीश्राद्धफलावाप्तये, पयस्विनीनिष्क्रयो देयः ।

Scanned by CamScanner

नान्दीश्राद्धस्याभ्युदयिककर्माङ्गत्वात् गोत्रनामरूपाणि विहाय संबोधनरूपः प्रथमाविभक्तयन्तः प्रयोग इष्टः, अन्यत्र पाद्ये प्रथमा आसने षष्ठी गन्धाद्यर्चने भोजननिष्क्रियदक्षिणादाने चतुर्थी विभक्तिः प्रयुक्ता दृश्यते। इदं नान्दीश्राद्धं सव्येन प्राङ्मुखान् द्विजानुपवेश्य सव्येन सर्वं साङ्कल्पिकेन विधिना भवति। कुत्रचित् सपण्डिकमपिण्डकश्चेति पक्षद्वयम्। सपिण्डकश्राद्धपक्षे दधिबदराक्षतमिश्रगुडेन पिण्डदानं क्रियते, ब्राह्मणेभ्यो भोजनत्वेन द्विगुणं हिरण्यं चतुर्गुणमामान्न मिति पक्षे षोडशामान्नष्क्रियीभूतं द्रव्यं दीयते। पारस्करगृह्यसूत्रीयश्राद्धसूत्रे श्रद्धा च नो माव्यगमद् इत्यत्र 'न माङ्योगे त्यडागमा भावेऽपि माव्यगमद् इत्युक्तत्वाद्' 'मा व्यगमद्' इत्यार्षः प्रयोगः। अतिर्थींश्च लभेमहिइत्यत्र 'लभध्वं यूयमतिथीन्' इति प्रतिप्रैषः। एतावान् विशेषः। सम्बोधनरूप प्रथमान्तप्रयोगे वाक्यार्थ सङ्गतये 'वः' इति पदमध्याहृतं भवति।

## १८ साङ्कल्पिकनान्दीश्राद्धप्रयोगः।

ताम्रपत्रे त्रीन् दूर्वावटून् पूगीफलानि वा निधाय दक्षिणहस्ते दूर्वापवित्रं धृत्वा वामहस्तेन दक्षिणत उदगन्तं क्रमेण देवतीर्थेन दक्षिणहस्तेन संकल्पजलं तत्र तत्र समर्पयेत्।

पाद्यदानम् - १ सत्यवसुसंज्ञका विश्वेदेवाः नान्दीमुखाः, ॐ भूर्भुवः स्वः इदं वः पाद्यम् पादावनेजनं पादप्रक्षालनं वृद्धिः। २ गोत्राः पितृपितामह प्रपितामहाः सपत्नीकाः नान्दीमुखाः, ॐ भू० इदं वः पाद्यं० वृद्धिः। ३ द्वितीयगोत्राः मातामहप्रमातामहाः सपत्नीकाः ॐ भू० इदं वः पाद्यं० वृद्धिः। प्रधानसंकल्पः - अद्य० पू० तिथौ - करिष्यमाणसंग्रहमखसप्रासादत्रयसाध्य-अचल (चल) प्रतिष्ठाङ्गभूतं (अमुककर्माङ्गभूतं) साङ्कल्पिकेन विधिना नान्दीश्राद्धं करिष्ये।

आसनदानम् - १ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः ॐ भूर्भुवः स्वः इदमासनं सुखासनं। नान्दीश्राद्धे क्षणौ क्रियेताम्। तथा। प्राप्नुतां भवन्तौ। प्राप्नवाब। २ गोत्राः पितृ० नान्दीमुखाः ॐ भू० सुखासनं। नान्दीश्राद्धे क्षणाः क्रियन्ताम्। तथा प्राप्नुवन्तु भवन्तः। प्राप्नवामा ३ द्वितीयगोत्राः मातामह० सुखासनं। नान्दीश्राद्धे क्षणाः क्रियन्ताम्। तथा। प्राप्नुवन्तु भवन्तः। प्राप्नवाम।

गन्धादिदानम् - १ सत्य० इदं गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः। २ गोत्राः पितृ० संपद्यतां वृद्धिः। ३ द्वितीयगोत्राः मातामह० संपद्यतां वृद्धिः॥

भोजननिष्क्रयद्रव्यदानम् - द्रव्यमादाय - १ सत्य० इदं युग्मब्राह्मणभोजनपर्याप्तामान्न निष्क्रयीभूतं किञ्चिद् हिरण्यं दत्तममृतरूपेण स्वाहा संपद्यतां वृद्धिः। २ गोत्राः पितृ० संपद्यतां वृद्धिः। ३ द्वितीयगोत्राः मातामह० संपद्यतां वृद्धिः॥

सक्षीरयवोदकदानं - क्षीरं यवाँश्चादाय - १ सत्य० प्रीयन्ताम्। २ गोत्राः पितृ० प्रीयन्ताम्। ३ द्वितीयगोत्राः मातामह० प्रीयन्ताम्।

Scanned by CamScanner

आशीर्ग्रहणम् - बद्धाञ्जलिर्याचेत - १ गोत्रं नोऽभि वर्धताम् । अभि वर्धतां वो गोत्रम् । २ दातारो नोऽभिवर्धन्ताम् । अभिवर्धन्तां वो दातारः । ३ वेदाश्च नोऽभिवर्धन्ताम् । अभिवर्धन्तां वो वेदाः । ४ सन्ततिर्नोऽभिवर्धताम् । अभिवर्धतां वः सन्ततिः । ५ श्रद्धा च नो माव्यगमत् । मा व्यगमद् वः श्रद्धा । ५ बहुदेयं च नोऽस्तु । अस्तु वो बहुदेयम् । ६ अन्नं च नो बहु भवेत् । भवतु वो बह्वन्नम् । ७ अतिथींश्च लभेमहि । लभव्वं यूयमतिथीन् । ८ याचितारश्च नः सन्तु । सन्तु वो याचितारः । ९ एता आशिषः सत्याः सन्तु । सन्तु एताः सत्या आशिषः । गोत्रं गोत्रस्याभिवृद्धिरस्तु । पितॄणां प्रसादाद् धनकनकवंशाभिवृद्धिरस्तु ।

दक्षिणादानसंकल्पः - द्रव्यमादाय - १ सत्य० कृतस्य नान्दीश्राद्धस्य फलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्क्रयीभूतां दक्षिणां दातुमहं उत्सृज्ये (उत्सृजामि) । २ गोत्राः पितृ० उत्सृज्ये । ३ द्वितीयगोत्राः मातामह० उत्सृज्ये । प्रणम्य वदेत् - नान्दीश्राद्धं सम्पन्नम् । ब्रा० सुसम्पन्नम् । माता पितामही चैव तथैव प्रपितामही । पिता पितामहश्चैव प्रपितामह एव च । मातामहस्तत्पिता च प्रमातामहकादयः । एते भवन्तु सुप्रीताः प्रयच्छन्तु च मङ्गलम् ॥ दूर्वाग्रेण दूर्वाबटून् पूगीफलानि वा स्पृष्ट्वा - विसर्जनम् (आचाराद् हिरण्येन भाण्डवादनम्) - ॐ व्वाजे व्वाजे व्वतव्वाजिनो नो धनेषु विप्रा अमृताऋतज्ञाः । अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥१८-१॥ जलेन प्रदक्षिणीकरणम् ॐ आमा व्वाजस्य प्रसवो जगम्यादेमे द्यावा पृथिवी विश्वरूपे । आमांगन्तां पितरा मातरा चामासोमोऽअमृतत्वेन गम्यात् ॥१९-९॥ जलमादाय-अस्मिन्नान्दीश्राद्धे न्यूनातिरिक्तो यो विधिः स उपविष्ट ब्राह्मणानां वचनात् नान्दीमुखपितॄणां प्रसादाच्च परिपूर्णोऽस्त्विति भवन्तो ब्रुवन्तु । अस्तु परिपूर्णः । पुनर्जलमादाय - अनेन नान्दीश्राद्धकर्मणा नान्दीमुखसंज्ञका देवताः प्रीयन्ताम् । उदकोपस्पर्शः । स्वस्तिन० तिलक करणम् । दूर्वाबटून् वा पूगीफलानि पात्रद्वयजलं च निष्कासयेत् । इति नान्दी श्राद्धम् । (साङ्गोपाङ्गः सपिण्डकोऽपिण्डको वा प्रयोगो ग्रन्थान्तरेभ्यो ग्राह्यः ॥)

## १६ ऋत्विग्वरणम् ।

(यद्यपि 'समाख्या वेदयोगात्' इति सूत्रेण स्मार्ते कर्मण्यध्वर्योः कर्तृत्वं नास्ति, तथापि शान्तिकपौष्टिकादिकर्मसु नियतकालमवलम्ब्य विहितहोमजपादिकर्मसम्पादनायानेकर्त्विग्वरणमावश्यकं कर्मापेक्षया । तथा च मधुपर्कसूत्रभाष्ये 'सोमयागार्थमेव वृता ऋत्विजो मधुपर्केणार्च्याः' इत्युक्तम्, किन्तु स्मृतिपुराणादिवचनानुरोधेन शान्तिपौष्टिकादिष्वप्यातिदेशिकं मधुपर्ककरणं प्राप्नोति । अत्र यजमानशाखया अर्च्यशाखया वा मधुपर्क इति मतद्वयम् । मधुपर्के विष्टरादीनां दानमात्रं यजमान कर्तृकम्, विष्टरादिस्वीकारे तु मन्त्रपाठोऽर्च्यकर्तृक एव । एवं यजमानकर्तृके दाने पदार्थदानव्युत्क्रमः, अर्च्येन मन्त्रोच्चारे मन्त्रान्तरपठनम्, इत्युभयत्र समानो दोषः । तत्परिहाराय यजमानेन स्वशाखानुरोधेन विष्टरादिदानम्, प्रतिग्रहीत्रा तत्तत्पदार्थप्रतिग्रहे स्वशाखीयमन्त्रोच्चारणमिति सर्वं सुस्थम् । कर्मकार्यबाहुल्यहोमजपादिसंख्यां विचार्यापेक्षिता ऋत्विजो वरणीयाः ।

Scanned by CamScanner

## १७ (आचाराद्) अर्घकरणम् ।

आपः क्षीरं कुशाग्राणि दधिदूर्वाक्षतास्तथा । सर्षपाः कुङ्कुमश्चैव, अष्टाङ्गोऽर्घः प्रकीर्तितः ॥ बृहति ताम्रपात्रे जलदुग्धकुशाग्र दधिदूर्वाक्षतसर्षपचन्दनानि निक्षिप्य पात्रान्तरेण पिधाय रक्तसूत्रेण वेष्टयित्वा आसनाधः सपत्नीको यजमान उदङ्मुखः पात्रसंपुटं हस्तयोर्गृहीत्वा तिष्ठन् ब्राह्मणान् प्रार्थयेत् ।

सुमुहूर्तादि कर्तव्यं शोभने मण्डपे द्विजैः । शान्तिपाठश्चार्घदानं पृच्छापूर्वं समाचरेत् ॥१॥ आयुरारोग्यपुत्रादिसुखश्रीप्राप्तये मम । आपद्विघ्नविनाशाय शत्रुबुद्धिक्षयाय च ॥२॥ विशेषकाम्यहोमेन सहितं समिदादिभिः । आदित्याद्या ग्रहाः सर्वे राहुकेतुपुरःसराः ॥३॥ ग्रहदेवाधिदेवैश्च नक्षत्राणां सदैवतैः । इन्द्रादिभिश्च दिक्पालैर्ब्रह्मविष्णुमहेश्वरैः ॥४॥ वास्तुदुर्गागणेशैश्च क्षेत्रपालादिसंयुतैः । भूम्यन्तरिक्षदेवैश्च कुलदेवैश्च मातृभिः ॥५॥ चतुर्भिश्चैव वेदैश्च रुद्रेण सहितास्तथा । सागरद्वीपपातालान्यूर्ध्वलोकाः सुरैः सह ॥६॥ पर्वता ऋषयः सर्वे गङ्गाद्याः सरितो ध्रुवम् । आदित्याद्या ग्रहा यज्ञैः सुप्रसन्ना भवन्तु मे ॥७॥ स्वागतं भो द्विजश्रेष्ठा मदनुग्रहकारकाः । इदमर्घमिदं पाद्यं भवद्भिः प्रतिगृह्यताम् ॥८॥

यजमानः - ॐ प्रतिगृह्यताम् । आचार्यः - प्रतिगृह्णामि । संपुटं गृहीत्वा उद्घाट्य यजमानसमीपे स्थापयेत् । यजमानः पादप्रक्षालनमर्घदानञ्च कुर्यात् ।

### वरणम् ।

प्राङ्मुखो यजमान उदङ्मुखं ब्राह्मणं पूगीफलेन वृणुयात्-यज० अमुकप्रवरान्वित अमुकगोत्रोत्पन्नः अमुकवेदान्तर्गतामुकशाखाध्यायी अमुकशर्मा (वर्मा-गुप्तः - दासः) सपत्नीको यजमानोऽहम् (ब्राह्मणः स्वं गोत्रप्रवरशाखानामादिकं द्वितीयान्तं ब्रूयात्) अमुकप्रवरान्वितममुकगोत्रोत्पन्नं अमुकवेदान्तर्गतामुकशाखाध्यायिनममुकशर्माणं ब्राह्मणम्-(यज०) अमुकदिनसाध्य सग्रहमख-अमुकयागाख्ये कर्मणि आचार्यत्वेन त्वामहं वृणे । इति पूगीफलमाचार्यहस्ते दद्यात्-आचार्यः - वृतोऽस्मि । कर्म करिष्यामि - इति वदेत्-ॐ बृहस्पते० आचार्य त्वं०-इति प्रार्थ्य पाद्येन पादौ प्रक्षाल्य हस्तेऽर्घं दद्यात् । वृताय, एतत्ते पाद्यम् । एष ते अर्घः । गन्धादिभिः संपूज्य हस्ते कङ्कणं बध्नीयात् । एवमेव उपाचार्यं ब्रह्माणमुपब्रह्माणं गणपतं सर्वोपद्रष्टारं सदस्यान् द्वारपालान् होतॄन् जापकान् परिचारकांश्च वृणीयाद् गोत्रोच्चारस्थाननिर्देशपुरःसरम् ।

## १८ मधुपर्कः ।

प्रतिब्राह्मणं विष्टरद्वयं पाद्यजलमर्घमाचमनीयं मधुपर्कं शुद्धजलञ्च समीपेऽवस्थाप्य) यज० अस्मिन् कर्मणि वृतानां ऋत्विजां मधुपर्केणार्चनं करिष्ये । यजमानः प्रतिब्राह्मणं प्रार्थयेदुत्थाय-ॐ साधु भवानास्तामर्चयिष्यामो भवन्तम्-ब्राह्मणः - ॐअर्चय । अन्यः - विष्टरो विष्टरो विष्टरः - यज०

प्रतिगृह्यताम् । ब्रा० प्रतिगृह्णामि । विष्टरमासने उदगग्रं निधाय तदुपरि उपविश्य मन्त्रं पठेत् ॐ वर्ष्मोऽस्मि समानानामुद्यतामिव सूर्य्यः । इमं तमभितिष्ठामि यो मा कश्चाभिदासति । अन्यः-पादार्थमुदकं ३ । यज० प्रतिगृह्यताम् । ब्रा० प्रतिगृह्णामि । जलं गृहीत्वा दक्षिणं पादं प्रक्षालयति ॐ विराजो दोहोऽसि विराजो दोहमशीय मयि पाद्यायै विराजो दोहः । ततो वामं-ॐ विराजो० । अन्यः - द्वितीयविष्टरो विष्टरो विष्टरः यज० प्रतिगृह्यताम् । ब्रा० प्रतिगृह्णामि-इति प्रतिगृह्य प्रक्षालितपादयोरधस्तादुदगग्रं निधाय तदुपरि पादौ करोति - ॐ वर्ष्मोऽस्मि० । अन्यः, अर्घपात्रमादाय अर्घोऽर्घोऽर्घः - यज० प्रतिगृह्यताम् । ब्रा० ॐ आपःस्थ युष्माभिः सर्वान् कामानवाप्रवानि । इति प्रतिगृह्य वामे कृत्वा दक्षिणेनाभिमन्त्रयन् भूमौ जलं निनयेत् - ॐ समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छत । णीरा अरिष्टाश्चास्माकं मा परासेचिमत् पयः ।। अन्यः - आचमनीयमाचमनीयमाचमनीयम् । यज० प्रतिगृह्यताम् । ब्रा० प्रतिगृह्णामि । पात्रं वामहस्ते कृत्वा - ॐ आमागन्यशसा सह्वसृज वर्चसा । तं मा कुरु प्रियं प्रजानामधिपतिं पशूनामरिष्टिं तनूनाम् - इति दक्षिणहस्तेनाचमनं कृत्वा ततः त्रिराचामेत् ॐ केशवाय नमः स्वाहा ॐ नारायणाय नमः स्वाहा ॐ माधवाय नमः स्वाहा । हस्तं प्रक्षाल्य ।। कांस्यपात्रे दधिमधुघृतं प्रक्षिप्य तदुपरि पात्रं पिधाय-अन्य- मधुपर्को मधुपर्को मधुपर्कः । यजमान उद्घाट्य प्रदर्शयति - समीक्ष्यताम् । ब्रा० ॐ मित्रस्य त्वा चक्षुषा प्रतीक्षे - इति पश्यति । यज० प्रतिगृह्यताम् । ब्रा० ॐ देवस्यत्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् - इति मन्त्रेण पात्रं प्रतिगृह्य सव्ये पाणौ कृत्वा दक्षिणस्यानामिकया प्रदक्षिणमालोड्य किञ्चिद् भूमौ क्षिपति - ॐ नमः श्यावास्यायान्नशनेयत्तऽआविद्धं तत्ते निष्कृन्तामि - इति मन्त्रेण त्रिवारं मन्त्रपाठपूर्वकं क्षिपेत् । ततोऽनामिकाङ्गुष्ठाभ्यां मधुपर्कस्य त्रिवारं समन्त्रं प्राशनम् - ॐ यन्मधुनो मधव्यं परमह्वरूपमन्नाद्यम् । तेनाहं मधुनो मधव्येन परमेण रूपेणान्नाद्येन परमो मधव्योऽन्नादोऽसानि- इति प्राश्नीयात् । (१ मधुव्वाता० २ मधुनक्त० ३ मधुमान्नो० इति मन्त्रैर्वा प्राशनम् ।) उच्छिष्टमुत्तरे विसृजेत् । हस्तं प्रक्षाल्य आचामेत् - ॐ (आमागन्०) केशवाय० ३।। ततः प्राणस्थानानि ब्राह्मणः स्पृशेत् (आचाराद्वामहस्ते जलं गृहीत्वा दक्षिणेन हस्तेन जलेन) कराग्रेण - ॐ वाङ्म आस्येऽस्तु । तर्जन्यङ्गुष्ठाभ्यां दक्षिण वामनासिके - ॐ नसोर्मे प्राणोऽस्तु । अनामिकाङ्गुष्ठाभ्यां नेत्रे - ॐ अक्ष्णोर्मे चक्षुरस्तु । कराग्रेण दक्षिणं कर्णं - ॐ कर्णयोर्मे श्रोत्रमस्तु । पुनर्वामं कराग्रेण - ॐ कर्णयोर्मे श्रोत्रमस्तु । (भेदे मन्त्रावृत्तिः - का० श्रौ० सू०) । दक्षिणं बाहुं कराग्रेण - ॐ बाह्वोर्मे बलमस्तु । ततो वामं ॐ बाह्वोर्मे बलमस्तु । उभाभ्यां हस्ताभ्यां - ॐ ऊर्वोर्मे ओजोऽस्तु । उभाभ्यां मस्तकादिपादान्तम् - ॐ अरिष्टानि मेऽङ्गानि तनूस्तन्वा मे सह सन्तु । इति स्पृष्ट्वा हस्तं प्रक्षाल्य । यज० (गोनिष्क्रयं प्रत्यक्षां गां वा स्थाप्य - ॐ गौर्गौर्गौः उत्सृज्यताम् । ब्रा० ॐ माता रुद्राणां दुहिता वसूना ७ स्वसाऽदित्याना ममृतस्य नाभिः । प्रनुवोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट । मम च अमुकस्य यजमानस्य च पाप्मा हतः, ॐ उत्सृजत, तृणानि अत्तु - इत्युक्त्वा गां द्रव्यं वा उत्सृजेत् ।

## १९ ब्राह्मणपूजने वेदचतुष्टयमन्त्राः ।

तत ऋत्विग्भ्यो गन्धाक्षतपुष्पमालावस्त्रयज्ञोपवीतजलपात्रछत्रोपानद् मुद्रिकादिदानम् (द्क्षिणासमये) वा । ऋत्विक्पूजनान्ते संकल्पः - वृतेभ्य आचार्यादि ऋत्विग्भ्यो वस्त्रयज्ञोपवीतजलपात्रछत्रोपानद् मुद्रिकाः, (तत्प्रत्याम्नायभूतं निष्क्रयं) दातुमहमुत्सृज्ये । पूजने ब्राह्मणाश्चतुर्वेदमन्त्रान् पठेयुः ॥

ऋग्वेदे - ॐ अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रकाउतपुरं न धृष्ण्वर्चत ॥८-६९-८॥ अर्चद् वृषा वृषभिः स्वेदुंहव्यैर्मृगो नाश्वो अति यज्जुगुर्यात् । प्रमन्दयुर्मनागूर्तं होता भरते मर्यो मिथुना यजत्रः ॥१-१७३-२॥ सदो द्वा चक्राते उपमा दिवि सम्राजा सर्पिरासुती । अर्चन्त एके महि साम मन्वत तेन सूर्यमरोचयन् ॥८-२९-५॥ अर्चन्तस्त्वा हवामहेऽर्चन्तः समिधीमहि । अग्ने अर्चन्त ऊतये ॥५-१३-१॥ अर्चन्ति नारीरपसो न विष्टिभिः समानेन योजनेना परावतः । इषं वहन्तीः सुकृते सुदानवे विश्वे दह यजमानाय सुन्वते ॥१-९२-३॥ अर्चा दिवे बृहते शूष्यं १ वच स्वक्षत्रं यस्य धृषतो धृषन्मनः ॥ बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि यः ॥१-५४-३॥ अर्चामि ते सुमतिं घोष्यर्वाक् सं ते वावाता जरतामियं गीः । स्वश्वास्त्वा सुरथा गर्जयेमाऽस्मे क्षत्राणिं धारयेरनुद्यून् ॥२-४-८॥ अर्चामि वां वर्धायापो घृतस्नू द्यावाभूमी शृणुतं रोदसी मे । अहा यद् द्यावोऽसुनीतिमयन् मध्वानो अत्र पितरा शिशीताम् ॥१०-१२-४॥ अर्चा शक्राय शाकिने शचीपते शृण्वन्तमिन्द्रं महयन्नभिष्टुहि । यो धृष्णुया शवसा रोदसी उभे वृषा वृषत्वावृषभो न्यृञ्जते ॥१-५४-२॥ यावतीर्वै देवतास्ताः सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद् ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तये देता एव देवताः प्रीणाति ॥

कृ० यजुर्वेदे - ॐ यावन्तो वै सदस्यास्ते सर्वे दक्षिण्यारतेभ्यो यो दक्षिणांन (३) नयेदेभ्यो वृश्च्येत यद्वैश्वकर्मणानि जुहोति सदस्यानेव तत् प्रीणाति ॥३-२-८॥ अस्मे देवासो वपुषे चिकित्सत यमाशिरा दम्पती वाममश्नुतः । पुमान् पुत्रो जायते विन्दते वस्वथ विश्वे अरपा एधते गृहः ॥ आशीर्दाया दम्पती वावमश्नुतामरिष्टो रायः सचताऽसमोकसा । स आऽसिंचत् संदुग्धं कुम्भ्या सहेष्टेन यामन्नमतिं जहातु सः ॥३-२-८॥ अर्चामिते सुमतिं घोष्यर्वाक् सं ते वावाता जरता (३) मियंगीः । स्वश्वास्त्वा सुरथा मर्जयेमास्मे क्षत्राणि धारयेरनु द्यून् ॥१-२-१४॥

शु० यजुर्वेदे - ॐ अभ्यादधामि समिधमग्ने व्रतपते त्वयि । व्रतञ्च श्रद्धाञ्चो पैमीन्धे त्वा दीक्षितो अहम् ॥२०-२४॥ यत्र ब्रह्म च क्षत्रं च सम्यञ्चौ चरत ꣳ सह । तँ ल्लोकं पुण्यं प्रज्ञेषं यत्रऽदेवा सहाग्निना ॥२०-२५॥ यत्रेन्द्रश्च वायुश्च सम्यञ्चौ चरत ꣳ सह । तँ ल्लोकं पुण्यं प्रज्ञेषं यत्र सेदिर्न विद्यते ॥२०-२६॥ अꣳशुना ते अꣳशु ? पृच्यतां परुषा परुꣳ । गन्धस्ते सोममवतु मदाय रसो अच्युतꣳ ॥२९-२७॥ सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च । सुरायै बभ्र्वै मदे किन्त्वोवदति किन्त्वः ॥२०-२८॥ धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् । इन्द्र प्रातर्जुपस्व न ॥२०-२९॥ बृहदिन्द्राय

Scanned by CamScanner

गायत मरुतो वृत्रहन्तमम् । येन ज्योतिरजनयन्नृतावृधोदेवं देवाय जागृवि ॥२०-३०॥ अध्वर्य्यो अद्रिभिःसुतह्वसोमं पवित्र आनय । पुनाहीन्द्राय पातवे ॥२०-३१॥ यो भूतानामधिपतिर्य्यस्मिँल्लोका अधिश्रिताः । य ईशे महता महाँस्तेन गृह्णामि त्वामहं मयि गृह्णामि त्वामहम् ॥२०-३२॥

ॐ सदसस्पति० तस्यै ते स्वाहा ॥३२-१३ तः १६॥ ॐ गन्धर्वस्त्वा० यज्ञन्यम् ॥२-३-त) ६॥ ॐ यज्जाग्रतो० ३४-१-तः ६ ॥ ॐ ब्रह्मणे ब्राह्मणं० ३०-५ तः ।

ॐ सहस्रशीर्षा० ३१-१ तः १६ ॥ ॐ ईशावास्य० ४० ॐ खम्ब्रह्म १ तः १७॥

१२३ १ २ ३ १२ ३ १२ १२ २ ३ ३२उ ३२ ३क२क
सामवेदे - ॐ अर्चत प्रार्चत नरः प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरमिद्द् धृष्ण्वर्चत ॥३६२॥
३ १ २र ३२३ १२ ३ १२ ३ १ २ र ३१२ ३१२ ३ १ २ ३ १ २
उक्थमिन्द्रायशंस्यं वर्धनं पुरुनिः षिधे । शक्रो यथा सुतेषुणो रारणत्सख्येषु च ॥३६२॥ विश्वानरस्य
३ २ ३१ २ ३ १ २ १ २ ३ २ ३१ २३ १२ २ ३ १२ ३ १ २र ३ १
वस्पतिमनानतस्य शवसः । एवैश्च चर्षणीनामूती हुवे रथानाम् ॥३६४॥ स धा यस्ते दिवो नरो धिया
२र ३ १२ ३ १ २उ३२ ३२ ३२उ ३ १ २ ३ १२ ३ १२ ३ २ ३ १
मर्तस्य शमतः । ऊती स बृहतो दिवो द्विषो अंहो न तरति । ॥३६५॥ विभोष्ट इन्द्र राधसोविभ्वीरातिः
२ १ २ ३१ २ १२ ३१ २ ३१ ३र २३
शतक्रतो । अथा नो विश्वचर्षणे युम्नं सुदत्र मंहय ॥३६६॥ वयश्चित्ते पतत्रिणो द्विपाच्चतुष्पादर्जुनि । उषः
१२ ३१ २र ३ १ २र ३ १२ ३ १ २र ३२३ २ ३ १ २ ३ २ ३ २ १ २ ३ २उ ३ २ ३
प्रारन्नृतूँ रनु दिवो अन्तेभ्यस्परि ॥३६७॥ अमी ये देवास्थन मध्य आरोचने दिवः । कद्व ऋतं कदमृतं
२ ३ २३ १२ २ ३ १२ ३ २ ३१३ ३ १२ १ २र ३२
का प्रत्नाव आहुतिः ॥३६८॥ ऋचं सोम यजामहे याभ्यां कर्माणि कृण्वते । वि ते सदसि राजतो यज्ञं
३२१
देवेषु वक्षतः ॥३६९॥

अथर्ववेदे - ॐ यस्ते गन्धः पृथिवि सं बभूव यं बिभ्रत्योषधयो यमापः । यं गन्धर्वा अप्सरसंश्च भेजिरे तेन मा सुरभि कृणुमानो द्विक्षत कश्चन ॥१२-१-२३॥ यस्ते गन्धः पुष्कर माविवेश यं संजभ्रुः सूर्यायां विवाहे । अमर्त्याः पृथिवि गन्धमग्रे तेन मा सुरभि कृणु मानो द्विक्षत कश्चन ॥१२-१-२४॥ यस्ते गन्धः पुरुषेषु स्त्रीषु पुंसु भगो रुचिः । यो अश्वेषु वीरेषु यो मृगेषूत हस्तिषु । कन्याऽयां वर्चो यद्भूमे तेनास्माँ अपि संसृज मानो द्विक्षत कश्चन ॥१२-१-२५॥ अर्चत प्रार्चत प्रियमेधासो अर्चत । अर्चन्तु पुत्रका उत पुरं न धृष्ण्वऽर्चत ॥२०-९२-५॥

ब्राह्मणान् प्रार्थयेत् - ॐ बृहस्पते० आचार्यत्वं यथा स्वर्गे शक्रादीनां बृहस्पतिः । तथा त्वं मम यज्ञेऽस्मिन्नाचार्यो भव सुव्रत ॥१॥ ब्रह्म जज्ञानं० यथा चतुर्मुखो ब्रह्मा सर्वलोकपितामहः । तथा त्वं

मम यज्ञेऽस्मिन् ब्रह्मा भव द्विजोत्तम ॥२॥ ॐ गणानान्त्वा० वाञ्छितार्थफलावाप्त्यै पूजितो यः सुरासुरैः । निर्विघ्नक्रतुसंसिद्ध्यै त्वामहं गणपं वृणे ॥३॥ ॐ सदसस्पति० कर्मणामुपदेष्टारं सर्वकर्मविदुत्तमम् । कर्मठं वेदतत्त्वज्ञं सदस्यं त्वामहं वृणे ॥४॥ सर्वोपद्रष्टा - ॐ उपह्वरे गिरीणां सङ्गमे च नदीनाम् । धिया विप्रोऽअजायत ॥२६-१५॥ भगवन् सर्वकर्मज्ञ वेदशास्त्रविदां वर । यज्ञकर्मोपद्रष्टारं विद्वांसं त्वामहं वृणे ॥५॥ ॐ अग्निमीळे० ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः । रक्षोविघ्नविनाशाय द्वारपालो मखे भव - अ० ब्राह्मणं पूर्वद्वारे होमकाले सूक्तजपार्थं त्वामहं वृणे ॥ एवं द्वितीयम् ॥६-७॥ ॐ इषेत्वो० कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः । यज्ञविघ्नविनाशार्थं द्वारपालो भव द्विज ॥ अ० ब्राह्मणं दक्षिणद्वारे होमकाले सूक्तजपार्थं त्वामहं वृणे ॥ एवं द्वितीयम् ॥८-९॥ ॐ अग्न आयाहि० सामवेदस्तु पिङ्गाक्षो जागतः शक्रदैवतः । राक्षसानां निराकृत्यै द्वारपालौ मखे भव ॥ अ० ब्राह्मणं पश्चिमद्वारे होमकाले सूक्तजपार्थं त्वामह वृणे ॥ एवं द्वितीयम् ॥१०-११॥ ॐ शन्नो देवी० बृहन्नेत्रोऽअथर्ववेदोऽनुष्टुभो रुद्रदैवतः । विघ्नापद्रक्षसां हत्यै द्वारपालः क्रतौ भव ॥ अ० ब्राह्मणं उत्तरद्वारे होमकाले सूक्तजपार्थं त्वामहं वृणे ॥ एवं द्वितीयम् ॥१२-१३॥ अष्ट, अलाभे चतुर ऋग्यजुःसामाथर्ववेदविदो ब्राह्मणान् वृणुयात् ॥ ततः - ॐ अयं ते योनिर्ऋत्वियो यतो जातो अरोचथाः । तञ्जानन्नग्न आरोहाथानो वर्द्धया रयिम् ॥३-१४॥ ऋत्विजश्च यथा पूर्वं शक्रादीनां मखेऽभवन् । यूयं तथा मे भवत ऋत्विजो द्विजसत्तमाः ॥ कर्मापेक्षयाऽवश्यकान् होतॄन् जापकान् परिचारकाँश्च गोत्रोच्चारपूर्वकं स्थाननिर्देशपुरःसरं वृणुयात् । ॐ व्रतेन दीक्षा० एतावद्रूपं० सुते ॥

## १९ ब्राह्मणपूजने वेदचतुष्टयमन्त्राः ।

द्विजप्रार्थना-यज० ब्राह्मणाः सन्तु मे शस्ताः पापात् पान्तु समाहिताः । देवानां चैव दातारः पातारः सर्वदेहिनाम् ॥१॥ जपयज्ञैस्तथा होमैर्दानैश्च विविधैः पुनः । देवानां च ऋषीणां च तृप्त्यर्थं याजकाः कृताः ॥२॥ येषां देहे स्थिता वेदाः पावयन्ति जगत्त्रयम् । रक्षन्तु सततं ते मां जप यज्ञैर्व्यवस्थिताः ॥३॥ ब्राह्मणा जङ्गमं तीर्थं त्रिषु लोकेषु विश्रुतम् । तेषां वाक्योदकेनैव शुध्यन्ति मलिना (मलिनो) जनाः ॥४॥ पावनाः सर्ववर्णानां ब्राह्मणा ब्रह्मरूपिणः । सर्वकर्मरता नित्यं वेदशास्त्रार्थकोविदाः ॥५॥ श्रोत्रियाः सत्यवाचश्च देवध्यानरताः सदा । यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ॥६॥ अङ्गीकुर्वन्तु कर्मैतत् कल्पद्रुमसमाशिषः । यथोक्तनियमैर्युक्ता मन्त्रार्थे स्थिरबुद्धयः ॥७॥ यत्कृपालोचनात् सर्वा ऋद्धयो वृद्धिमाप्नुयुः । अस्मिन् यागे मया पूज्याः सन्तु मे नियमान्विताः ॥८॥ अक्रोधनाः शौचपराः सततं ब्रह्मचारिणः । देवध्यानरता नित्यं प्रसन्नमनसः सदा ॥९॥ अदुष्टभाषणाः सन्तु मा सन्तु परनिन्दकाः । ममापि नियमा ह्येते भवन्तु भवतामपि ॥१०॥ इति संप्रार्थ्य तान् ब्रूयाद् यथावत् क्रियकां विधिः । ऋत्विजश्च यथापूर्वं शक्रादीनां मखेऽभवन् ॥११॥ सुप्रसन्नैः प्रकर्तव्यं कर्मेदं विधिपूर्वकम्- भो आचार्यादिसमस्तब्राह्मणाः यथाविधि कर्म कुरुध्वम् ॥ ब्राह्मणाः - यथाविधि करिष्यामः ॥ आसत्यलोकात् पातालादालोकालोकपर्वतात् । ये सन्ति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नमः ॥ इति नमस्कुर्यात् ॥

Scanned by CamScanner

## २० स्वस्तिपुण्याहवाचनम् ।

(प्रयोक्तुः कर्मणामादावन्ते चोदयसिद्धये - इति वचनेन चशब्दान् मध्येऽपीति तात्पर्यात् पूर्वाङ्गोत्तरं प्रधानकर्मारम्भात् प्राङ् मध्ये पुण्याहवाचनम् । अन्यशाखासु पुण्याह ऋद्धि स्वस्तिरूप प्रैषत्रयेण शुक्लयजुर्वेदिनां तु पुण्याह-कल्याण-ऋद्धि-स्वस्ति-श्रीरस्तु-इति पञ्चप्रैषयुक्तं समग्रं प्रैषात्मकं केवलं वा पुण्याहवाचनं भवतीति विवेकः । केवलप्रैषात्मकपुण्याहवाचने कलशसाधनवरुणपूजन जानुमण्डलनिपातब्राह्मणपूजनाशीर्वचनोदकसेचनाभिषेकाणामभावः । पूर्वं कलशासादनं न कृतं चेदिदानीं वर्धिनीकलशसहितसर्वकलशानामेकतन्त्रेण कुर्यात् । स्वर्णपूर्ण, इत्यस्य स्थाने स्वर्णःपूर्ण-इति शुद्धः पाठः ।)

### संकल्पः ।

अद्य० पू० कर्माभ्युदयार्थं स्वस्तिपुण्याहवाचनमहं करिष्ये । तत्रादौ कर्माङ्गभूतकलशानामेकतन्त्रेणासादनं करिष्ये । महीद्यौः० इत्यारभ्य वरुणावाहन पूजनान्तं - तावत् त्वं सन्निधौ भव - इत्यन्तं कुर्यात् । ततः अवनीकृतजानुमण्जलः० इत्यारभ्य - पुण्यं पुण्याहं वाचयिष्ये - इत्यन्तं कुर्यात् - ब्राह्मणः - वाच्यताम् । ब्राह्मणा अक्षतैराशिषो दद्युः -

ऋग्वेदे - ॐ द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्रयंसत् । द्रविणोदा वीरवतीमिषन्नो द्रविणोदारासते दीर्घमायुः ॥ कृ० यजु० ॐ द्रविणोदां त्वा द्रविणे सादयामि तेनर्षिणा तेन ब्रह्मणा तया देवतयाङ्गिरस्वद् ध्रुवा सीद ॥४-४-६-३४॥ शुक्ल यजु० ॐ भद्रं कर्णेभिः० ॐ द्रविणोदाः
५र४ २
पिपीषति जुहोत प्रचतिष्ठत । नेष्ट्राद्दतुभिरिष्यत ॥२६-२२॥ सामवेदे - ॐ देवो ३ वो ३
४ ५ र २र१र २र १ २ १ २ २ २र १ ७ १र २ र १
द्रविणोदाः । पूर्णां विवष्ट्वा सिचं । उद्रा १ सिंचा २ ध्वमुपवापृणध्वं आदिद्वोदे २ । वओहते । इडा
२ १
२ ३ भा ३ ४ ३ । ओ २ ३ ४ ५ ई । डा । (वेयगाने प्र-२ प्रथमार्धे साम-२४) ॥ अथर्ववेदे - ॐ धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपतिर्नो अग्निः । त्वष्टा विष्णुः प्रजया संरराणो यजमानाय द्रविणं दधातु ॥७-२-१७-४॥

ऋग्वेदे -ॐ सविता पश्चातात् सविता पुरस्तात् सवितोत्तरात्तात् सविता धरात्तात् । सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥ कृ० यजु० ॐ सविता यः सहस्रियः संनो गृहेषु रारणत् । आ पूषा एत्वा वसु ॥२-५-२॥ शुक्ल यजु० ॐ देवानां भद्रा० ॐ सविता त्वा सवानां ५ सुवतामग्निर्गृहपतीना ५ सोमो व्वनस्पतीनाम् । बृहस्पतिर्व्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्र ३ पशुभ्यो मित्र
२र२ १ १ २ र२
३ सत्यो व्वरुणो धर्मपतीनाम् ॥९-३९॥ साम० ॐ ऊर्ध्व ऊपुणा ३ ऊता २३४ याई । तिष्ठा देवोन

१र २ २ १ २र १ २र १ १ २१र
सविता । ऊर्ध्वो वा २ ३ जा । स्यासनिता । यादंजिभीः २ः । वाघाद्धी २ः । वीवी २ । ह्वयामा २
२ १ ५
३ हा ३ ४ ३ ई । उ २ ३ ४ ५ ई । डा (वेय० प्र-२ प्र० साम-२६॥ अथर्ववेदे-ॐ अभयं द्यावापृथिवी इहास्तु नोऽभयं सोमः सवितानः कृणोतु । अभयंन्नोऽस्तूर्वा १ऽन्तरिक्षं सप्तऋषीणां च हविषाभयं नो अस्तु ॥६-४०-१॥

ऋग्वेदे-ॐ नवो नवो भवति जायमानोऽह्ना केतुरुषसामेत्यग्रम् । भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरते दीर्घमायुः ॥ कृ० यजु० ॐ नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे । भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरति दीर्घमायुः ॥२-४-१४-१॥ शु० यजु० ॐ न तद्रक्षांऽसि न पिशाचास्तरन्ति देवानामोजं प्रथमजऽह्येतत् । यो बिभर्ति दाक्षायण ह हिरण्यह्स देवेषु कृणुते
२ १ र २ २ १ ३
दीर्घमायुः स मनुष्येषु कृणुते दीर्घमायुः ॥३४-५१॥ सामवेदे - चन्द्रमा आउवा । प्सुवान्ताराउवा ।
२ १र २ २ १र १र २ २१ २ २० १ ३ २ १ १
सुपर्णो धाउवा । वतोदिवि नवोहिराउवा । ण्यनाइमायाउवा । पदं विंदाउवा । तिविद्युिताः । वित्तमा
२ २ १र २ १ ५
आउवा । स्यरोदा २ ३ सा ३ ४ ३ ई । ओ २ ३ ४ ५ ई डा ॥ वे० ११ प्र० प्र० साम-३१ ॥ अथर्ववेदे - ॐ नैनं रक्षांसि न पिशाचाः सहन्ते देवानामोजः प्रथमजंह्ये ३ तत् । यो बिभर्ति दाक्षायणं हिरण्यं सजीवेषु कृभुते दीर्घमायुः ॥१-२५-२॥

ऋग्वेदे - ॐ उच्चादिवि दक्षिणावन्तोऽअस्थुर्येऽअश्वदाः सहते सूर्येण । हिरण्यदाऽअमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्तऽआयुः ॥८-६-३॥ कृ० यज० आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिरक्षतादिमम् ॥३-३-८-१॥ शुक्ल-यजु० ॐ दीर्घायुस्तऽओषधे खनितायस्मै चत्वा खनाम्यहम् । अथोत्वं दीर्घायुर्भूत्वा शतवल्शा व्विरोहतात्
५र २
॥१२-१००॥ उच्चातें जातमन्धसो दिविसद्भूम्याददे । उग्र ह शर्म्ममहिश्रवं ॥ साम० उच्चाता ३
४र५ १ १ १ १ २ १ २ १ २
ईजातमन्धसाः । दिवाई । सा १ दूभू २ । मिया २३ ददाई । उग्रा ५ शर्म्मा । महा २३ ईश्रवा
२ २र३ १ १ १ १
उ । वा ३ । स्तौपै २ ३ ४ ५ ॥ वे० १२ प्र-२ धें साम-१३ ॥ अथर्व० उच्चापतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम् । पश्यामत्वा सवितारं यमाहुरजस्त्रं ज्योतिर्यदविन्ददत्रिः ॥१३-२-२६॥ (उच्चैर्घोषो दुन्दुभिः सत्वनायन्वानस्पत्यः संभृत उस्त्रियाभिः । वाचं क्षुणुवानो दमयन् सपत्नान् सिंह इव जेष्यन्नभितं स्तनीहि-५-४-२०-१) ॥ इत्येता ऋचः पुण्याहे ब्रूयात् । यज० व्रतजपतपः स्वाध्याय क्रतुदयादमदानविशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् । ब्रा० समाहितमनसः

Scanned by CamScanner

स्मः । यजः-प्रसीदन्तु भवन्तः । ब्रा० प्रसन्नाः स्मः ।

यजमानमूर्ध्नि अक्षतान् क्षिपेत्-यज० ॐ शान्तिरस्तु० तिथिकरणमुहूर्त नक्षत्र ग्रहलग्न संपदस्तु । पुण्याहवाचनकलशात् जलं पात्रे प्रक्षिप्य वामहस्तेन दक्षिणहस्ते देवतीर्थेन उदकसेकः - ॐ तिथिकरण० इत्यारभ्य - अहोरात्रे शिवे स्याताम् - इत्यन्तम् ।

ऋग्वेदे - ॐ शन्नः कनिक्रदद्देवः पर्जन्यो अभिवर्षतु । शन्नो द्यावापृथिवी शं प्रजाभ्यः शन्न एधि द्विपदे शंचतुष्पदे ॥ ऋ० परिशिष्टमन्त्र ८ ॥ कृ० यजु० निकामे निकामे नः पर्जन्यो वर्षतु । फलन्यों न ओषधयः पच्यन्ताम् । योगक्षेमो नः कल्पताम् ॥७-५-१८॥ शु० यजु० निकामे निकामे न ꣳ पर्जन्यो वर्षतु फलवत्यो नऽओषधय ꣳ पच्यन्तां योगक्षेमो नः कल्पताम् ॥२२-२२॥ ब्राह्मणम्-निकामे निकामे नः पर्जन्यो वर्षत्विति निकामे निकामे वैतत्र पर्जन्यो वर्षति यत्रैतेन यज्ञेन यजन्ते फलवत्यो नऽओषधꣳपच्यन्तामिति फलवत्यो वै तत्रौषधयꣳपच्यन्ते यत्रैतेन यज्ञेन यजन्ते योगक्षेमो नꣳ कल्पतामिति योगक्षेमो वैतत्र कल्पते यत्रैतेन यज्ञेन यजन्ते तस्माद्यत्रैतेन्न यज्ञेन यजन्ते

३ २ ५र र ४५ २१ २ २ १

कृलप्तः प्रजानां योगक्षेमो भवति ॥ साम० त्वष्टा ३ ४ / नो दैवियं वचाः । पर्जन्यो ब्रह्मणस्पा २३

२ र१र २ १र २ १ २ २ १ २ १ ५

तीः । पुत्रैर्भ्रातृभिरदि तिर्नुपातू २३ नाः । दुष्टारा २३ न्त्रा । मणं वा २३ चा ३४३ः । ओ २३४५ ई । डा ॥ वेय० अ० प्र० प्रथ० साम-२० ॥ अथर्ववेदे-गणास्त्वोपगायन्तु मारुताः पर्जन्यघोषिणः पृथक् । सर्गा वर्षस्य वर्षतो वर्षन्तु पृथिवीमनु ॥४-३-१५-४॥ ॐ शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिता आदित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् । भगवान्नारायणः प्रीयताम् । भगवान् स्वामी महासेनः प्रीयताम् - इति जलमृत्सृज्य ॥

ब्राह्मणान् नत्वा वदेत्-ॐ पुण्याहकालान् वाचयिष्ये । ब्रा० वाच्यताम् । यज० ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम् । वेदवृक्षोद्भवं नित्यं तत् पुण्याहं ब्रुवन्तु नः । भो ब्राह्मणाः मह्यं सकुटुम्बाय महाजनान् नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय मया (समस्तजनपदश्रेयसे) करिष्यमाण (सग्रहमखसप्रासाद अमुक दिनसाध्य प्रतिमाऽचलप्रतिष्ठा) कर्मणः पुण्याहं भवन्तो ब्रुवन्तु । ब्रा० अस्तु पुण्याहम् । एवं पुनर्वारद्वयं वदेत् । (पुण्याहवाचने वैदिक पौराणमन्त्रपाठान्तरं पुण्याहादिप्रैषप्रतिप्रैषदानमुचितम्)

## २१ वेदचतुष्टयेन पुण्याहवाचनप्रयोगः ।

ऋग्वेदे - ॐ उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि । वृषेववाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्वतो नः शकुने पुण्यमावद ॥

याज्यया यजति प्रत्तिर्वै याज्या पुण्यैव लक्ष्मीः पुण्यामेव तल्लक्ष्मीं संभावयति पुण्यां लक्ष्मीं संस्कुरुते

Scanned by CamScanner

॥ कृ० यजु० यत् पुण्यं नक्षत्रं । तद्बट्कुर्वीतोपव्युषं । यदावै सूर्य उदेति । अथ नक्षत्रं नैति । यावति तत्र सूर्योगच्छेत् । यत्र जघन्यं पश्येत् । तावति कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते । तानि वा एतानि यमनक्षत्राणि । यान्येव देवनक्षत्राणि । तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते ॥ शु० यजु० ॐ पुनन्तु मा देवजना ? पुनन्तु मनसा धियः । पुनन्तु विश्वाभूतानि जातवेद ं पुनीहिमां ॥१९-३९॥ ब्राह्मणम् - ॐ स यः कामयेत महत् प्राप्नुयामित्युदगयनऽआपूर्य्यमाणपक्षे पुण्याहे द्वादशाहमुप सद्व्रती भूत्वौदुम्बरे क ं से चमसे वा सर्वौषधं फलानीति संभृत्य परिसमुह्य परिलिप्याग्निमुप-

२ र २
समाधायावृताज्य ं संस्कृत्य ं पु सा नक्षत्रेण मन्थं सन्नीय जुहोति ॥ साम० ॐ पुनानः सोमा ३

१ ५ १ र र र र र ३ २ १ २ २ १ र र र
धारा २३४ या । आपोवसानो अर्षत्नधा योनि मृतस्य सा २ ईद साई । ओहा ३ उवा उत्सो देवोहिरा

२ १ २ २ २ १ २ ४ ५ ४
२३ हाई । ओहा ३ उवा । ण्यया । ओ ३ होवा । हो ५ ई । डा ॥ वेय-प्र-१४ प्रथमार्धे साम ३५ ॥ अथर्व० ॐ पुनन्तु मा देवजनाः पुनन्तु मनवो धिया । पुनन्तु विश्वाभूतानि पवमानः पुनातु मा ॥ का० ६-२-१९-१ ॥

कल्याणम्-पृथिव्यामुद्धृतायां तु यत्कल्याणं पुराकृतम् । ऋषिभिः सिद्धगन्धर्वैस्तत् कल्याणं ब्रुवन्तु नः ॥ भो ब्राह्मणाः० कर्मणः कल्याणं भवन्तो ब्रुवन्तु ॥ ब्रा० अस्तु कल्याणम् । एवं त्रिः ॥ ऋग्वेदे० ॐ अपाः सोमस्तमिन्द्र प्रयाहि कल्याणीर्जाया सुरणं गृहे ते । यत्रारथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावतः ॥ कृ० यजु० भद्रा ते अग्ने स्वनीक संदृग्घोरस्य सतो विषुणस्य चारुः । न यत् ते शोचिस्तमसा वरन्त न ध्वस्मानस्तनुवि रेप आधुः ॥४-३-१३-३॥ शु० यजु० ॐ यथेमां व्वाचं कल्याणीमावदानि जनेभ्यः । ब्रह्मराजन्याभ्याꣳशूद्राय चार्य्याय च स्वाय चारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयं मे काम ं समृद्ध्यतामुपमादोनमतु ॥२६-२॥ ब्राह्मणम्-अथाध्वर्य्योः प्रतिगरोरात् सुरिमे यजमाना भद्रमेभ्यो यजमानेभ्यो भूदिति कल्याणमेवैतन्मानुष्यै व्वाचो वदति ॥

३ र ५ ४ र ४र ५ १ १र र २ १ २र
साम - ॐ का ऽ ५ या । नश्चा ३ इत्रा ३ आभूवात् । उ । ती सदा वृधस्स । खा । ओ ३ हो

२ १ २ ३र २ १ १ २
हाइ । कया २३ शचा ३ । ष्ठयौ हो ३ हुम्मा १२ । वाऽ२र्तो ३ ५ हाइ ॥ वेय-५ प्र०प्र० साम-२५ ॥ ॐ अथर्व० ॐ विश्वजित् कल्याण्यै मा परिदेहि कल्याणि द्विपाच्च सर्वनो रक्ष चतुष्पाद्यन्नः स्वम् ॥६-११-१०७-३॥

ऋद्धिः - सागरस्य यथा वृद्धिर्महालक्ष्म्यादिभिः कृता । संपूर्णा सुप्रभावा च तां च ऋद्धिं ब्रुवन्तु नः ॥ भो ब्राह्मणाः० कर्मणः ऋद्धिं भवन्तो ब्रुवन्तु । ब्रा० कर्म ऋध्यताम् । एवं त्रिः । ऋग्वेद-ॐ ऋध्याम स्तोमं सनुयाम वाजमानो मन्त्रं सरथे होपयातम् । यशो न पक्वं

मधुगोष्वन्तरा भूतांशोंऽश्विनोः काममप्राः ॥ ब्राह्मणम्-सर्वामृद्धिमृध्नुयामिति तं वै तेजसैव पुरस्तात् पर्यभवच्छन्दोभिर्मध्यतोऽक्षरैरुपरिष्टाद् गायत्र्या सर्वतो द्वादशाहं परिभूय सर्वामृद्धिमार्ध्नोत् सर्वामृद्धिमृध्नोति य एवं वेद ॥ कृ० यजु० ॐ ऋदूध्यास्म हव्यैर्नमसोपसद्य । मित्रं देवं मित्रधेयं नो अस्तु । अनूराधान् हविषा वर्धयन्तः । शतं जीवेम शरदः सवीराः । त्रीणि त्रीणि वै देवानामृद्धानि । त्रीणिच्छन्दांऽसि त्रीणि सवनानि । त्रय इमे लोकाः । ऋदूध्यामेव तद्वीर्य एषु लोकेषु प्रतितिष्ठति ॥ शु० यजु० ॐ सत्रस्य ऋद्धिरस्यगन्म ज्योतिरमृताऽअभूम । दिवं पृथिव्याऽअध्यारुहामाविदाम देवान् स्वज्योंतिः ॥८-५२॥ ब्राह्मणम्-तऽउत्तरस्य हविर्धानस्य जघन्यायाङ्कूबर्या ४ सामाभिगायन्ति सत्रस्य ऋद्धिरितिराद्धि मेवैतदभ्युत्तिष्ठन्त्युत्तरवेदेर्वोत्तराया ४ श्रोणावितरन्तु

२र र र र र र २ र १ २ १र २ २ १र २ १ २

कृततरम् ॥ साम० औ हो वा औ हो वा औ हो ३ वा । अगन्म ज्योतिः । अगन्म ज्योतिः । अगन्म

१र २ १र २ र २ १र २र २ १र २ रर १ २ १र र रर १ २ १ २र

ज्योतिः । अमृता अभूम । अमृता अभूम । अमृता अभूमा । न्तरिक्षं पृथिव्या अध्यारुहाम । दिवमन्तरिक्षा ।

१ २ १ २र १ २र २र १ २ १ २र १ २र २र १ २ १ २र १ २र १ २र १ १र १ २र

दिवमन्तरिक्षा दध्यारूहाम । दिवमन्तरिक्षादध्यारुहाम । दिवमन्तरिक्षादध्यारुहाम । अविदाम देवान् । अविदाम

२ १र १ २र र १ र १ २र १र २ १ २र १ र२ १ २र १ र २र र २ २र र र

देवान् । अविदाम देवान् । ~~समुदे वैरगन्महि~~ । समुदे वैरगन्महि । समुदे वैरगन्महि । औ हो वा । औ हो वा ।

२र २ १ र ३ १ १ १ १

औ हो ३ वा । सुवर्ज्योती २ ३ ४ ५ : ॥ आर० ४प्र० प्रथ-साम-४ अथर्व० ॐ ऋधङ्मन्त्रो योनिं य आबभूवामृतासुर्वर्धमानः सुजन्मा । अदब्धा सु भ्राजमानो हैवत्रितो घर्ता दाधार त्रीणि ॥५-१-१-१॥

स्वस्तिः - स्वस्तिस्तु याऽविनाशाख्या पुण्यकल्याणवृद्धिदा । विनायकप्रियी नित्यं ताञ्च स्वस्ति ब्रुवन्तु नः ॥ भो ब्राह्मणाः० कर्मणे स्वस्ति (कर्मणि स्वस्तिति) भवन्तो ब्रुवन्तु । ब्रा० आयुष्मते स्वस्ति ॥ एवं त्रिः । ऋग्वेदे० स्वस्ति रिद्धि प्रपथे श्रेष्ठा रेकूणस्वस्त्यभिया वाममेति । सा नोऽअमासोऽअरणे निपातु स्वावेशा भवतु देवगोपा ॥ (स्वस्तयै वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणं स्वस्तयें स्वस्तय आदित्यासों भवन्तु नः : ब्राह्मणम् - आदित्य उदयनीयः पथ्ययैवेतः स्वस्त्या प्रयन्ति पथ्यां स्वस्तिमभ्युद्यन्ति स्वस्त्येवेतः प्रयन्ति स्वस्त्युद्यन्ति स्वस्त्युद्यन्ति ॥ कृ० यजु० ॐ स्वस्तिन इन्द्रो वृद्धश्रवाः । स्वस्तिनः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्यो अरिष्टनेमिः । स्वस्तिनो बृहस्पतिर्दधातु ॥ अष्टौ देवा वसवः । सोम्यासः । चतस्रोदेवी रजराः श्रविष्ठाः । ते यज्ञंपान्तु रजसः परस्तात् । संवत्सरीणममृतंऽस्वस्ति ॥ शु० यजु० ॐ स्वस्तिनऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ ब्राह्मणम्-गातुञ्यज्ञाय गातुञ्यज्ञपतयऽइति गातुंऽह्येष यज्ञायेच्छति गातुञ्यज्ञपतये यो यज्ञस्य सऽस्थान् दैवी स्वस्ति रस्तुनः स्वस्तिर्मानुषेभ्यऽइति स्वस्तिनो देवत्रास्तु स्वस्तिर्मानुष्यत्रे त्येवैतदाहोर्ध्वं जिगातु भेषजमित्यूर्ध्वो नो

यन्यज्ञो देवलोकन्यजत्वित्ये वैतदाह शन्नोऽअस्तु द्विपदे शञ्चतुष्पदऽइत्ये तावद्वाऽइद ६ सर्वं यावद् द्विपाच्चैव चतुष्पाच्च तस्माऽएवैतद्यज्ञस्य स ४ स्थां गत्वा शंकरोति तस्मादाह शन्नोऽअस्तु द्विपदे

२ २र २र ७ र १र र ७ २

शञ्चतुष्पदे ॥ साम० ॐ त्रातारमिन्द्रमविता । रमि २ ३ न्द्रम् । हवे हवे सुहव ४ शू । रमी २३ न्द्राम् ।

१ ७ २ २१ २ १ २ १ र २ २

हुवाइ । नुशक्रं पुरुहू । तमी २३ न्द्राम् । इद४ह । वाईः । मघवा । वा ३४३ इ । तू ३ वा ५ इन्द्रा ६५६ः ॥ वेय० प्र-९ प्र-साम० ३ ॥ अथर्व० स्वस्ति मात्र उत पित्रे नो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः । विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यम् ॥ का-१-६-३१-४ ॥

श्रीः - समुद्रमथनाज्जाता जगदानन्दकारिका । हरिप्रिया च माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥ भो ब्राह्मणाः० कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्तु । ब्रा० अस्तु श्रीः । एवं त्रिः ॥ ऋग्वेदे-ॐ श्रिये जातः श्रिय आनिर्रियाय श्रियं वयो जरितृभ्यो दधाति । श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिथा मितद्रौ ॥ (ब्रा०) श्रिय एवैनं तच्छ्रिया मादधाति संततमृचा वषट्कृत्यं संधीयते प्रजया पशुभिर्य एवं वेद ॥ कृ० यजु० ॐ ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं म निषाण । अमुं म निषाण । सर्वं म निपाण ॥ ब्रा० यस्मिन् ब्रह्माभ्यजयत् सर्वमेतत् । अमुश्च लोकमिदमु च सर्वम् । तन्नो नक्षत्रमभिजिद्विजित्यं । श्रियं दधात्वहृणीयमानम् । अहेर्बुध्नियमन्त्रं मे गोपाय । यमृषयस्त्रयिविदा विदुः । ऋचः सामानि यजूꣳषि । सा हि श्रीरमृतासताम् ॥ शु० यजु० ॐ श्रीश्चते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाणामुम्मंऽइषाण सर्व्वलोकम्मंऽइषाण ॥३१-२२॥ ब्रा० ॐ तेनोहततऽईजे दक्षः पार्वतिस्तऽइमेऽप्ये तर्हि दाक्षायणा राज्यवमिवैव प्राप्ता राज्यमिव हवै प्राप्नोति यऽएवं विद्वाने तेनयज्ञेन यजते तस्माद्वाऽएतेन यजेत स वाऽएकैकऽएवानूचीनाहं पुरोडाशो भवत्येतेनोहास्यासपत्नानुपबाधा

५र ५ १ १ १ १ र२

श्रीर्भवति । साम० श्रायन्त इव सू ४ रायां । विश्वा ५२ इदिन्द्रा ५२ । स्यभा ५२ क्षाता । वासूनि

२ १र २र २ १ २ १ २र१ र १ २ १र २ र

जातो जनिमा । नियोजा १ सा ५२ । प्रतिभागंनदी २ धिमः । प्रा २३ ती । भागांना ३ दा ।

१ ३ २ १ ५ ३ ११११

हुं । धिमा ३ः । ओ २३४ वा । हे २३४५ ॥ वेय० प्र-७ द्वि० साम-५ ॥ अथर्व० एह यातु वरुणः सोमो अग्निर्बृहस्पतिर्वसुभिरेह यातु । अस्य श्रियमुपसंयात सर्वऽउग्रस्य चेतुः संमनसः सजाताः ॥६-८-७३-१॥

जलमादाय-अस्मिन् पुण्याहवाचने न्यूनातिरिक्तो यो विधिः स उपविष्टब्राह्मणानां वचनाद् इष्टदेवताप्रसादाच्च स सर्वः परिपूर्णोऽस्त्विति भवन्तो ब्रुवन्तु । ब्रा० अस्तु परिपूर्णः । सं० अनेन पुण्याहवाचनेन कर्माङ्गदेवताः प्रीयन्ताम् ।

Scanned by CamScanner

## २२ अभिषेकः।

अभिषेके पत्नी वामतः । एकस्मिन् पात्रे पात्रपातितजलं गृहीत्वाऽविधुराश्चत्वारो ब्राह्मणा उदङ्मुखास्तिष्ठन्तः प्राङ्मुखमुपविष्टं सपत्नीकं यजमानं दूर्वाम्रपल्लवैर्वक्ष्यमाणमन्त्रैरभिषिञ्चेयुः ॥ मन्त्राः - १ ॐ पयः पृथिव्यां० २ पञ्चनद्यः० ३ पुनन्तुमा० ४ वरुणस्योत्तम्भन० ५ देवस्यत्वा सवितु ॒ प्रसवे॒ श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । सरस्वत्यै व्वाचो यन्तुर्यन्त्रेणाग्ने ॒ साम्राज्येनाभिषिञ्चामि ॥१८-३७॥ ७ देवस्यत्वा सवितु ॒ प्रसवे॒ श्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि सरस्वत्यै भैषज्येन वीर्य्यायान्नाद्यायाभिषिञ्चामीन्द्रस्येन्द्रियेण बलाय श्रियै यशसे भिषिञ्चामि ॥२०-३॥ ८ विश्वानिदेव सवितर्दुरितानि परासुव । यद्भद्रं तन्नऽआसुव ॥३०-३॥ ९ धामच्छदग्निरिन्द्रो ब्रह्मा देवो बृहस्पतिः । सचेतसो व्विश्वेदेवा यज्ञं प्रावन्तु न ॑ शुभे ॥१८-७६॥ १० त्वँय्यविष्ठ दाशुषो नॄँ ॒ पाहि शृणुधी गिरः । रक्षातोकमुतत्मना ॥१३-५२॥ ११ अन्नपतेऽन्नस्य नो देह्यनमीवस्य शुष्मिणः । प्रप्रदातारन्तारिषऽऊर्ज्जन्नोधेहि द्विपदे चतुष्पदे ॥११-८३॥ १२ द्यौः शान्ति० १३ यतो यतः० । ब्राह्मणम् - ॐ पालाशं भवति, तेन ब्राह्मणोऽभिषिञ्चति ब्रह्म वै पलाशो ब्रह्मणैवैनमेतदभिषिञ्चति ॥ २ औदुम्बरं भवति, तेन स्वोऽभिषिञ्चत्यन्नं वाऽऊर्गुदुम्बरऽऊर्ग्वै स्वं यावद्वै पुरुषस्य स्वं भवति नैव तावदशनायति तेनोर्क् स्वं तस्मादौदुम्बरेण स्वोऽभिषिञ्चति ॥ ३ नैय्यग्रोध पादं भवति, तेन मित्रो राजन्योऽभिषिञ्चति, पद्भिर्वैन्यग्रोधः प्रतिष्ठितो मित्रेण वै राजन्यः प्रतिष्ठित स्तस्मान्नैय्यग्रोधपादेन मित्रो राजन्योऽभिषिञ्चति ॥ ४ आश्वत्थं भवति, तेन वैश्योऽभिषिञ्चति स यदेवादोश्वत्थे तिष्ठतऽइन्द्रो मरुतऽउपामन्त्रयते तस्मादाश्वत्थेन वैश्योऽभिषिञ्चति ॥ यद्देवकल्पाञ्जुहोति, प्राणावैकल्पाऽअमृतमुवै प्राणाऽअमृतेनैवैनमेतदभिषिञ्चति ॥ (सुरास्त्वामभि० रापो निघ्नन्तु सर्वदा) ६ सर्वेषां वाऽएषव्वेदानाᳬरसो यत् साम सर्वेषामेवैनमेतद् वेदाना ᳭ रसेनाभिषिञ्चति ॥ ॐ शान्तिः शान्तिः शान्तिः सुशान्ति र्भवतु । सर्वारिष्टसर्वोपद्रवशान्तिरस्तु ॥ इत्यभिषेकः ।

यजमानः स्वस्थाने उपविश्य-उदकोपस्पर्शः । सं० अभिषेककर्तृभ्यो ब्राह्मणेभ्यो यथोत्साहं दक्षिणां दास्ये । तेन कर्माङ्गदेवताः प्रीयन्ताम् ।

(महाराष्ट्रदेशीयानामाचारः - पतिपुत्रवतीभिर्वृद्धसुवासिनीभिरुभयोर्नीराजनं कार्यम् - ॐ अनाधृष्टा पुरस्तादग्ने राधिपत्यऽआयुर्म्मेदा ॑ पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजाम्मेदा ॑ । सुषदा पश्चाद् देवस्य सवितुराधिपत्ये चक्षुर्म्मेदाऽआश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषम्मेदा ॑ । विधृतिरुपरिष्टाद् बृहस्पते राधिपत्यऽओजोमेदा व्विश्वाभ्यो मानाष्ट्राभ्यस्पाहि मनोरश्वासि ॥३७-१२॥) सुवासिनीनां सत्कारं कुर्याद् । इति पुण्याहवाचनम् अभिषेकश्च ।

(प्रथमदिने प्रारम्भानन्तरं प्रतिमानां शोभायात्रा ग्रामनगरान्यतर प्रादक्षिण्येनान्यैर्भवतैः सम्पादनीया । अत्रावसरे समाचाराज्जलयात्रा विधिरपि चिकीर्षितश्चेत् सम्पादनीयः । असम्भवे द्वितीयेऽह्निप्रातर्जलयात्रा, तत्प्रयोगो वक्ष्यतेऽग्रे ।)

## २३ वर्धिनीपूजनम् ।

(द्वादश चतुर्दशषोडशाष्टादशाद्यन्यतम हस्तमानमितोऽर्धहस्त - हस्तोच्छ्रयान्यतरोच्छ्रयश्चतुरस्रो भूभागविशेषो यथोक्तकुण्डवेद्यादिसहितो मण्डपत्वेन कुण्डकल्पलतायां परिगणितः । पुनश्च वर्तमानकाले द्वारतोरणफलकस्तम्भकीलकध्वजपताकाच्छादन शिखरादिकं कुतश्चिद् भृत्या क्रीत्वा वाऽनीय छायारूपो मण्डपः क्रियते । कुण्डमण्डपादिग्रन्थेषु यथोक्त मानानुरोधेन काष्ठच्छेदनकर्तनवृश्चनालङ्करणादि सम्पादने भूयान् व्ययो भवति । प्रतियजमानं हस्तमानभेदाद् यत्रान्तरे द्वारतोरणादिकं पुनरुपयोजयितुं न शक्यम् । यत्र मण्डपे द्वारतोरणादिकं यथोक्तमानेन कृतं स्यात्, तत्रैव मण्डपपूजा क्रियते याज्ञिकैः । तथापि मण्डपपूजाऽग्रे वक्ष्यते । मण्डपाद्बहिर्नान्दीश्राद्धवरणान्तकरणे मण्डपद्वारादिसत्त्वे वर्द्धिनीपूजनं मण्डपपूजा मण्डपप्रवेशश्च कार्यः । केवलं नवचण्डीशतचण्डीविष्णुयागरुद्रयाग प्रतिष्ठादिषु कुण्डवेदिकादि कृतं स्यात्, यथोक्तस्तम्भादि रहित श्छायामण्डपः स्यात्, मण्डपान्तश्चोपविश्य वरणादिकं क्रियेत, तत्रेदं वर्धिनीपूजन मण्डपपूजनमण्डपप्रवेशादिकरणमनावश्यकम् । छायामण्डपसत्त्वे मण्डपाङ्ग गणपतिपूजनं वास्तु पूजनञ्च न करणीयम् ।

स्मार्ताग्निहोत्र ईशान्यां मणिकावधानस्य कर्मार्थत्ववद्वर्धिनीकलशस्यापि शान्तिकपौष्टिकादिकर्मार्थकजलपात्रत्वादैशान्यां वचनान्तरादाग्नेय्यां वा मण्डपे निधानं भवति । तत्र देवताः पुनः कलशस्य मुखे० देवदानवसंवादे० इत्यादिश्लोकोक्ता गृहीता इति सुस्थम् ।)

### वर्धिनीपूजनप्रयोगः ।

मण्डपाद्बहिः पश्चिम द्वारसमीपे सर्त्विग् यजमानः - संकल्पः० अद्य० पू० तिथौ करिष्यमाण अमुकयागाङ्गभूतंवर्धिनी कलशपूजनं करिष्ये । तत्रादौ गणेशस्मरणं कलशासादनञ्च करिष्ये । काष्ठपीठे श्वेतवस्त्रे व्रीहिराशौ पञ्चवर्ण तण्डुलाष्टदले वा सुवर्णरजत ताम्रमृत्तिकान्यतममयकलशं संस्थापयेत् । ॐ गणानान्त्वा० गणपतये नमः सर्वोपचारार्थं नमस्करोमि । (पूर्वं कलशासादने न कृतं चेद्, इदानीं) महीद्यौरित्यादि पूर्णपात्रनिधानवरुणावाहनपूजनान्तं कुर्यात् । आदौ कलशं प्रार्थयेत् - ॐ वर्धिनि त्वं महापूता महातीर्थोदकान्विता । वर्धिनि त्वं जगन्माता भव त्वं कुलवर्धिनी । तव तोयेन कलशान् कर्मार्थं पूरयाम्यहम् । इति नत्वा हस्ते अक्षतान् गृहीत्वाऽवाहयेत् -

(ॐ भू० वर्धिनि इहागच्छ इह तिष्ठ, वर्धिन्यै नमः वर्धिनीम् आवाहयामिस्थापयामि)

१. ॐ ब्रह्मजज्ञानं० ब्रह्मन्० ब्रह्मणे० ब्रह्माणम्०

२. ॐ आशुः शिशानो० वृषभेश्वर० वृषभेश्वराय० वृषभेश्वरं०

३. ॐ इदं विष्णु० विष्णो० विष्णवे० विष्णुम्०

Scanned by CamScanner

४. ॐ आपोऽअस्मान्० आपः० अद्भ्यो० अपः०

५. ॐ इमम्मे वरुण० सप्तसागरा० सप्तसागरेभ्यो० सप्तसागरान्०

६. ॐ मही द्यौः० महि० मह्यै० महीम्०

७. ॐ पञ्चनद्यः० गङ्गादिनदीभ्यो० गङ्गादिनदीः०

८. ॐ ये तीर्थानि० तीर्थानि० तीर्थेभ्यो० तीर्थानि०

९. ॐ गायत्री त्रिष्टुप्० गायत्रि० गायत्र्यै० गायत्रीम्०

१०. ॐ अग्निमीळे० ऋग्वेद० ऋग्वेदाय० ऋग्वेदम्०

११. ॐ इषेत्वोर्ज्जेत्वा० यजुर्वेद० यजुर्वेदाय० यजुर्वेदम्०

१२. ॐ अग्न आयाहि० सामवेद० सामवेदाय० सामवेदम्०

१३. ॐ शन्नो देवी० अथर्ववेद० अथर्ववेदाय० अथर्ववेदम्०

१४. ॐ अग्निन्दूतं० अग्ने० अग्नये० अग्निम्०

१५. ॐ यज्ञोदेवानां० व्दादशादित्याः० व्दादशादित्येभ्यो० व्दादशादित्यान्०

१६. ॐ रुद्राः सध्सृज्य० एकादशरुद्राः० एकादशरुद्रेभ्यो० एकादशरुद्रान्०

१७. ॐ मरुतो यस्य० मरुतः० मरुद्भ्यो० मरुतः०

१८. ॐ ऋताषाड्ऋत० गन्धर्वाः० गन्धर्वेभ्यो० गन्धर्वान्०

१९. ॐ सहस्तोमाः सह० सप्तर्षयः० सप्तर्षिभ्यो० सप्तर्षीन्०

२०. ॐ तत्त्वा यामि० वरुण० वरुणाय० वरुणम्०

२१. ॐ आनो नियुद्भिः० वायो० वायवे० वायुम्०

२२. ॐ वय ह्व सोम० धनद० धनदाय० धनदम्०

२३. ॐ सुगन्नु पन्थां० यम० यमाय० यमम्०

२४. ॐ यज्ञेन यज्ञ० धर्म० धर्माय० धर्मम्०

२५. ॐ नमः शम्भवाय० शिव० शिवाय० शिवम्०

२६. ॐ तस्माद्यज्ञात् सर्वहुतः० यज्ञपुरुष० यज्ञपुरुषाय० यज्ञपुरुषं०

२७. ॐ विश्वेदेवासऽआगत० विश्वेदेवाः० विश्वेभ्यो देवेभ्यो० विश्वान् देवान्०

आवाहयामि स्थापयामि । ॐ मनोजूति० वर्धिनी कलशाधिष्ठितब्रह्मादि देवताः सुप्रतिष्ठिताः वरदा भवत-इति २७ देवान् प्रतिष्ठाप्य-ॐ वर्धिनीकलशाधिष्ठितब्रह्मादिदेवेभ्यो नमः-इति षोडशोपचारैः पञ्चोपचारैर्वा संपूज्य प्रार्थयेत्- ॐ वर्धिनि त्वं महापूता महातीर्थोदकान्विता । वर्धिनि त्वं जगन्माता भव त्वं कुलवर्धिनी । तव तोयेन कलशान् पूरयामि श्रिये मुदा ॥ इति प्रार्थ्य-जलमादाय अनया पूजया वर्धिनीकलशाधिष्ठितब्रह्मादिदेवताः प्रीयन्ताम् (मण्डपपूजा वक्ष्यते)

Scanned by CamScanner

## २४ मण्डपप्रवेशः ।

ततः साचार्यर्त्विग् यजमानः पत्नीहस्तयोः वर्धिनीकलशं दत्त्वा तामग्रतः कृत्वा ॐ कनिक्रदज्जनुषं० आनो भद्राः० द्यौ शान्तिः० इत्यादिमङ्गलवेदघोषेण शङ्खदुन्दुभ्यादिघोषेण च शान्तिसूक्तं-अथ साम गायति० इत्यादिकं पठन् यथोक्तप्रकारेण षोडशहस्तादिमण्डपं प्रदक्षिणी कृत्य पश्चिमद्वारि कुम्भं पीठे निधाय-उपविशेत् ।

सं० मण्डपप्रवेशाङ्गभूतं भूमिपूजनं बलिदानं च करिष्ये । अक्षतान् गृहीत्वा भूमिं ध्यायेत्-चतुर्भुजां शुक्लवर्णां कूर्मपृष्ठोपरि स्थिताम् । शङ्ख पद्मधरां चक्रशूलयुक्तां धरां भजेत् ॥१॥ आगच्छ देवि कल्याणि वसुधे लोकधारिणि । पृथिवि ब्रह्मदत्तासि काश्यपेनाभिवन्दिता ॥ ॐ भूरसि भूमिरस्य० ॐ सपरिवारायै भूम्यैनमः इति गन्धादि पञ्चोपचारैः संपूज्य । पुष्पाञ्जलिमादाय-उद्धृतासि वराहेण कृष्णेन शतबाहुना । दंष्ट्राग्रे लीलया देवि यज्ञे भार्गवि रम्यताम्-इति दण्डवत् प्रणम्य । ततोऽर्घपात्रे गन्धपुष्पाक्षताद्यष्टाङ्गमर्घं गृहीत्वा जानुभ्यां धरणीं गत्वाऽर्घं दद्यात् । तत्र मन्त्राः-ब्रह्मणा निर्मिते देवि विष्णुना शङ्करेण च । पार्वत्या चैव गायत्र्या स्कन्देन श्रवणेन च ॥१॥ यमेन पूजिते देवि धर्मस्य विजिगीषया । सौभाग्यं देहि पुत्राँश्च धनं रूपश्च पूजिते ॥२॥ गृहाणार्घमिमं देवि सौभाग्यश्च प्रयच्छ मे ॥ ॐ सपरिवारायैभूम्यै० अर्घं समर्पयामि ॥ ततो गन्धादिना संपूज्य-उपचारानिमान् तुभ्यं ददामि परमेश्वरि । भक्त्या गृहाण देवेशि त्वामहं शरणं गतः-इति निवेदयेत् । ततो गन्धपुष्पपायसलाजसहितं सदीपं बलिं दद्यात्-ॐ सपरिवारायै भूम्यै नमः आसादितं सदीपं बलिं समर्पयामि ॥

ततः प्रार्थयेत् - ॐ नन्दे नन्दय वासिष्ठि वसुभिः प्रजया सह । जये भार्गवि दायादे प्रजानां जयमावह ॥१॥ पूर्णे गिरिशदायादे पूर्णान् कामान् कुरुष्व मे । भद्रे काश्यपि दायादे कुरु भद्रां मतिं मम ॥२॥ सर्व वीजसमायुक्ते सर्वरत्नौषधीवृते । रुचिरे नन्दने नन्दे वासिष्ठि रम्यतामिह ॥३॥ प्रजापतिसुते देवि चतुरस्रे महीयसि । सुभगे सुव्रते देवि यज्ञे भार्गवि रम्यताम् ॥४॥ पूजिते परमाचार्यैर्गन्धमाल्यैरलंकृते । भवभूतिकरि देवि यज्ञे काश्यपि रम्यताम् ॥५॥ अव्यक्ते वाङ्मते पूर्णे शुभे चाङ्गिरसः सुते । इष्टदे त्वं प्रयच्छेष्टं त्वामहं शरणं गतः ॥६॥ देशस्वामिपुरस्वामिगृहस्वामिपरिग्रहे । मनुष्यधनहस्त्यश्व पशुवृद्धिकरी भव ॥७॥ इति प्रार्थना ॥

ततो यजमानो मण्डपद्वारतोरणफलककीलकध्वजपताकाशिखरादिकं ॐ मण्डपदेवताभ्यो नमः इति गन्धपुष्पाक्षतैः संपूज्य यज० ॐ भो आचार्य प्रविशामि । आ० सुखेन प्रविश-इत्यनुज्ञातः पत्नीहस्तयोः वर्धिनीकलशं दत्त्वा तामग्रतः कृत्वा दक्षिणपादेन प्रविश्य द्वारवामशाखां दक्षिणांसेन स्पृशन् ॐ द्यौः शान्ति० २ क्षेमाय वः शान्त्यै प्रपद्ये० शय्योः ॥ इति मन्त्राभ्यां साचार्यर्त्विक् सपत्नीकः प्रविश्य आग्नेय्यामैशान्यां वा व्रीहिराशौ वर्धिनीकलशं स्थापयेत् ॥

ततो मण्डपस्यैशान्यां ग्रहपीठादधः कोणे लाजसर्षपव्रीहिराशिं कृत्वा साक्षतपूर्णपात्रं कलशं निधाय

पूर्णपात्रे नवग्रहान् नाममन्त्रैरावाह्य संपूज्य विसृज्य तं कलशमादाय ऐशानीमारभ्यैशानीपर्यन्तं जलधारां दुग्धधाराश्च प्रदक्षिणक्रमेण पातयेत् - ॐ पुनन्तु मा पितामहाः० इति पावमानीभिर्ऋग्भिः परिषिञ्चेत् । त्रिगुणीकृतसूत्रेण मण्डपं वेष्टयेत् ।

ततो मण्डपं प्रविश्य अग्न्यायतनात् पश्चिमत उपविश्य वामहस्ते गौरसर्षपान् तदुपरि दक्षिणहस्तं निधाय-ॐ रक्षोहणं वलगहनं० रक्षोहणोवो वलगहनः० रक्षसां भागोऽसि० रक्षोहाविश्व० वा-कृणुष्वपाजः० प्रमृणीहि शत्रून् - अपसर्पन्तु० अपक्रामन्तु० यदत्र संस्थितं० भूतानि राक्षसा० देवयागं करोम्यहम्- एभिर्मन्त्रैश्चतुर्दिक्षु सर्षपान् विकीर्य वामपादपार्ष्णिना घातत्रयं कृत्वा अध उपस्पृशेत् ।

ततः कांस्यपात्रे-गोमूत्रम्-ॐ तत्सवितु० गोमयं-ॐ गन्धद्वारां० क्षीरे-ॐ आप्यायस्व० दधि- ॐ दधिक्राव्णो- घृतम्-ॐ तेजोऽसि०कुशोदकम् ॐ देवस्यत्त्वा० हस्ताभ्याम्-इति मन्त्रैरेकीकृत्य कुशैः ॐ इति प्रणवेन आलोड्य - ॐ इति प्रणवेन अभिमन्त्र्य कुण्डमण्डपवेदिकापीठादिकं पञ्चगव्येन दर्भैः प्रोक्षेत् - ॐ आपोहिष्ठा० ३ अपवित्रः० सर्वेषां कुण्डमण्डपादीनां यज्ञसम्भाराणाञ्च पवित्रताऽस्तु-इति प्रोक्षणं कुर्यात् ।

पश्चिमद्वारे प्राङ्मुख उपविश्य अञ्जलौ पुष्पाण्यादाय - ॐ स्वस्तिन इन्द्रो० (आवों देवास ईमहेवामं प्रयत्यध्वरे । आवोंदेवास आशिषों यज्ञियासो हवामहे (४-५) ॐ देवाः, आयान्तु, (इत्युच्चैर्वदन् ऊर्ध्वंप्रक्षिपेत् । यातुधानाः अपयान्तु- (ॐ अध्यवोचदधिवक्ता प्रथमोदैव्योंभिषक् । अहींश्च सर्वाञ्जम्भयन् सर्व्वाँश्च यातुधान्योऽधराचीः परासुव (१६-५) इति यातु धानादीन् सर्षपैः दूरीकृत्य-भूमौ वामपादेन घातत्रयं कृत्वा अप उपस्पृश्य भूमौ प्रादेशं कृत्वा-ॐ बिष्णो देवयजनं रक्ष - (साव्विश्वायुः साव्विश्वकर्म्मा सा व्विश्वधायाः । इन्द्रस्य त्वा भागꣳ सोमेनातनच्मिव्विष्णों हव्यꣳ रक्ष ॥१-४॥ ॐ इयं व्वेदिꣳपरोऽअन्तः पृथिव्याऽअयं यज्ञो भुवनस्य नाभिः । अयꣳ सोमोवृष्णो अश्वस्य रेतों ब्रह्माऽयं वाच ः परमं व्योम ॥२३-६२॥ सुभूः स्वयम्भूः प्रथमोंऽन्तर्म्महत्यर्णवे । दधेह गर्भमृत्वियं यतों जातः प्रजापतिः ॥२३-६३॥ ॐ भूमिर्भूमिमवागान्माता मातरमप्यगात् । भूयाम पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम् ॥ इति भूमिं स्पृष्ट्वा प्रणमेत् ॥ इति मण्डपप्रवेशः ॥

## २९ मण्डपद्वारतोरणस्तम्भकलशध्वजपताकादिपूजा ।

(इयं पद्मनाभोक्ता यथोक्तद्वारतोरणादिसत्त्वे कार्या, नान्यत्र । विषयेऽस्मिन् पूर्वं विवेचितम्)

यजमानो मण्डपान्तः प्राङ्मुख उपविश्य-तत्र स्तम्भद्वारतोरणादिषु ध्वज पताकाकलशनिधानादिकं पूर्वमेव सम्पाद्य - संकल्पः - अद्य पू० तिथौ करिष्यमाणामुककर्माङ्गत्वेन मण्डपस्तम्भदेवतादिपूजनं करिष्ये । हस्ते अक्षतान् गृहीत्वा - मध्यवेद्या ईशानस्तम्भे - १ ॐ ब्रह्मजज्ञानं० ब्रह्मणे नमः ब्रह्माणं आवाहयामि स्थापयामि - २ सावित्र्यै० सावित्रीम्० ३ वास्तुदेवतायै० वास्तुदेवताम्, ४ ब्राह्म्यै०

Scanned by CamScanner

ब्राह्मीम्० ५ गङ्गायै० गङ्गाम्० इत्यावाह्य गन्धादिभिः ॐ ब्रह्मादिदेवताभ्यो नमः - इति संपूजयेत् । स्तम्भमालभ्य ॐ ऊर्ध्वऽऊषुणऽऊतये तिष्ठादेवो न सविता । ऊर्ध्वोव्वाजस्य सनिता यदञ्जिभिर्व्वाघद्भिर्व्विह्वयामहे ॥११-४२॥ स्तम्भाग्रे-ॐ नागमात्रे नमः - इति शाखामालभ्य - ॐ आयङ्गौः ० इति शाखाबन्धनम् । शाखामनुमन्त्य स्तम्भानुमन्त्रणम् - ॐ यतो यतः० पशुभ्यः ॥

मध्यवेद्याग्नेयस्तम्भे - ॐ इदं विष्णु० १ ॐ विष्णवे० विष्णुम्० २ लक्ष्म्यै० लक्ष्मीम्० २ नन्दायै० नन्दां० ४ वैष्णव्यै० वैष्णवीम्० स्तम्भालम्भनम् ॐ ऊर्ध्वऊषुण० । शाखाबन्धनं-ॐ आयङ्गौः ० । शाखानुमन्त्रणम् ॐ यतो यतः० पशुभ्यः ॥

मध्यवेदीनैर्ऋत्यस्तम्भे-ॐ नमः शम्भवायच० १ ॐ शङ्कराय० शङ्करं० २ गौर्यै० गौरीं० ३ माहेश्वर्यै० माहेश्वरीं० ४ शोभनायै० शोभनाम्-इत्यावाह्य गन्धादिभिः ॐ शिवादिभ्यो नमः इति संपूज्य । स्तम्मालम्भनम्-ॐ ऊर्ध्वऽऊषुणः० शाखाबन्धनं-ॐ आयङ्गौः० । शाखानुमन्त्रणम् ॐ यतोयतः० पशुभ्यः ॥

मध्यवेदीवायव्यस्तम्मे-ॐ त्रातारमिन्द्र० १ ॐ इन्द्राय० इन्द्रं० २ इन्द्राण्यै० इन्द्राणीं ३ आनन्दायै० आनन्दाम्० ४ बिभूत्यै० विभूतिम्० इत्यावाह्य गन्धादिभिः ॐ इन्द्रादिभ्यो नमः संपूज्य । स्तम्भालम्भनम्-ॐ ऊर्ध्वऊषुणः० शाखाबन्धनम्-ॐ आयङ्गौः० शाखानुमन्त्रणम्-ॐ यतोयतः० पशुभ्यः ॥

यजमानो मण्डपाद् बहिरागत्य ईशानकोणादारभ्य प्रादक्षिण्येन द्वादशस्तम्भान् पूजयेत्-ईशानस्तम्भे- ॐ आकृष्णेन० १ सूर्याय० सूर्यं० २ शङ्करात्मने० शङ्करात्मानं० ३ सावित्र्यै० सावित्रीम्० ४ मङ्गलायै० मङ्गलाम्० इत्यावाह्य-ॐ सूर्यादिभ्यो नमः इति सम्पूज्य-स्तम्भालम्भनशाखाबन्धन-शाखानुमन्त्रणानि उपरिवत् ।

२ ईशान पूर्वान्तरालस्तम्मे-ॐ गणानान्त्वा० १ ॐ गणपतये० गणपतिं० २ सरस्वत्यै० सरस्वतीम्० ३ विध्नहारिण्यै० विध्नहारिणीम्० ४ जयायै० इत्यावाह्य ॐ गणपत्यादिभ्यो नमः इति सम्पूज्य शेषमुपरिवत् ॥ ३ पूर्वाग्नेयान्तरालस्तम्भे-ॐ यमायत्वा० १ ॐ यमाय० यमं० २ पूर्वसंध्यायै० पूर्वसन्ध्याम्० ३ अशन्यै० अशनीं० ४ क्रूरायै० क्रूराम्० ५ नियन्त्र्यै० नियन्त्रीम्० ॐ यमादिभ्यो नमः इति संपूज्य शेषमुपरिवत् ॥ ४ बाह्याग्नेयकोणस्तम्भे ॐ आयङ्गौः १ नागराजाय० नागराजम्० २ मध्यमसन्ध्यायै० मध्यमसन्ध्याम्० ३ धरायै० धराम्० ४ महापद्मायै० महापद्माम् - इत्यावाह्य ॐ नागराजादिभ्यो नमः इति सम्पूज्य शेषमुपरिवत् । ५ आग्नेयदक्षिणान्तरालस्तम्भे - ॐ यदक्रन्दः० ॐ स्कन्दाय० स्कन्दम्० २ पश्चिमसन्ध्यायै० पश्चिमसन्ध्याम्० ३ जयायै० जयाम्० ४ शक्तये० शक्तिम्० इत्यावाह्य ॐ स्कन्दादिभ्यो नमः इति संपूज्य शेषमुपरिवत् ॥ ६ दक्षिणनैर्ऋत्यान्तरालस्तम्भे - ॐ आनो नियुद्भिः० १ ॐ वायवे० वायुम्० २ वायव्यै० वायवीम्० ३ मध्यमसन्ध्यायै० मध्यमसन्ध्याम्० ४

Scanned by CamScanner

गायत्र्यै० गायत्रीम्० इत्यावाह्य-ॐ वाय्वादिभ्यो नमः इति संपूज्य शेषमुपरिवत् ॥ ७ बाह्यनैर्ऋत्यस्तम्भे-ॐ आप्यायस्व० १ ॐ सोमाय० सोमम्० २ सावित्र्यै० सावित्रीम् ३ अमृतकलायै० अमृतकलाम्० ४ विजयायै० विजयाम्० ५ पश्चिमसन्ध्यायै० पश्चिमसन्ध्याम्० इत्यावाह्य ॐ सोमादिभ्यो नमः-इति संपूज्य शेषमुपरिवत् ॥८॥ निर्ऋतिपश्चिमान्तरालस्तम्भे-ॐ इमम्मे वरुण० १ वरुणाय० वरुणम्० २ वारुण्यै० वारुणीम्० ३ पाशधारिण्यै० पाशधारिणीम्० ४ बृहस्पतये० बृहस्पतिम्० इत्यावाह्य ॐ वरुणादिभ्यो नमः इति संपूज्य शेषमुपरिवत् ॥९॥ पश्चिमवायव्यान्तरालस्तम्भे-ॐ सुगावो देवाः० (वसवस्त्वा कृण्वन्तु०) १ ॐ अष्टवसुभ्यो० अष्टवसून्० २ विनतायै० विनताम्० ३ अणिमायै० अणिमाम्० ४ विभूत्यै० विभूतिम्० ५ गरिमायै० गरिमाम्० इत्यावाह्य-ॐ वस्वादिभ्यो नमः-इति संपूज्यशेषमुपरिवत्। १० बाह्यवायव्यस्तम्भे-ॐ वयध्सोम० (सोमो धेनु) १ ॐ धनदाय० धनदम्० २ अदित्यै० अदितिम्० ३ लघिमायै० लघिमाम्० ४ सिनीवाल्यै० सिनीवालीम्० इत्यावाह्य ॐ धनदादिभ्यो नमः-इति संपूज्य शेषमुपरिवत् ॥११॥ वायव्योत्तरान्तरालस्तम्भे-१ ॐ बृहस्पते अति० बृहस्पतये० बृहस्पतिम्० २ पूर्णमास्यै० पूर्णमासीम्० ३ सावित्र्यै० सावित्रीम्० इत्यावाह्य ॐ बृहस्पत्यादिभ्यो नमः-इति संपूज्य शेषमुपरिवत् ॥१२॥ उत्तरेशानान्तरालस्तम्भे-ॐ ॐ विश्वकर्म्मन् हविषा० १ विश्वकर्मणे० विश्वकर्माणं० २ सिनीवाल्यै० सिनीवालीम्० ३ वास्तुदेवतायै० वास्तु देवताम्० ४ सावित्र्यै० सावित्रीम्० इत्यावाह्य ॐ विश्वकर्मादिभ्यो नमः इति संपूज्य-स्तम्भालम्भनम् ॐ ऊर्ध्वऊषुणः० । शाखाबन्धनम्-ॐ आयङ्गौः शाखानुमन्त्रणम्-ॐ यतो यतः० ॥ इति षोडशस्तम्भपूजा ।

## तोरणपूजनम् ।

साचार्यर्त्विग् यजमानः पूजाकलशादिसम्भारानादाय मण्डपाद् बहिः पूर्वद्वाराद् हस्तमात्रे दूरे वटतोरणमाश्वत्थं वा सुदृढनामकं सुशोभननामकं वा तोरणद्वारमुपेत्य पुरतः उपविश्य फलकोपरिशैवे देवीयागे त्रिशूलकीलाङ्कितं गणेशयागे अङ्कुशयुतं सौरे पद्मयुतं वैष्णवे शङ्खाङ्कितं कीलमारोप्य-सँ० अद्य० तिथौ-तोरणद्वारपूजादिकं करिष्ये । ॐ अग्निमीळे० सुदृढतोरणाय नमः (सुशोभनतोरणाय नमः) दक्षिणशाखायां-ॐ राहवे नमः, वामशाखायां-ॐ बृहस्पतये नमः इत्यावाह्य-पूर्वतोरणद्वारदेवताभ्यो नमः-इति गन्धादिभिः संपूज्य दक्षिण द्वारवामशाखासमीपे दूर्वापञ्चपल्लवादिसंयुतं संस्कृतं कलशमेकमाग्नेयमते कलशद्वयं वा निधाय ॐ घ्रुवाय नमः - इत्यावाह्य आग्नेयमते १ प्रशान्ताय नमः २ शिशिराय नमः-पूजयेत् ॥ सूक्तजापकौ ऋग्वेदिनौ ऋत्विजौ-होमकाले सूक्तजपार्थं वां वृणे-इति वृणीयात् ।

दक्षिणतोरणद्वारे औदुम्बरं प्लाक्षं वा सुभद्रं विकटं वा उपर्युक्तकीलान्वितं वैष्णवे चक्रकीलक तोरणम्-ॐ इषेत्वोर्ज्जेत्वा० ॐ सुभद्रतोरणाय नमः (विकटतोरणाय नमः) दक्षिणशाखाया-सूर्याय नमः-वामशाखायां-भौमाय नमः-इत्यावाह्य ॐ दक्षिणतोरणद्वारदेवताभ्यो नमः-इति संपूज्य

Scanned by CamScanner

द्वारशाखाद्वयसमीपे कलशमेकं द्वयं वा ॐ धरायै नमः (आग्नेयमते-१ पर्जन्याय नमः २ अशोकाय नमः इति पूजयेत्। सूक्तजपार्थं द्वौ यजुर्वेदिनौ होमकाले सूक्तजपार्थं वां वृणे-इति वृणुयात्। ततः पश्चिमतोरणाद्वारसमीपं गत्वा पश्चिमे प्लाक्षमौदुम्बरं वा सुकर्मसंज्ञकं सुभीमसंज्ञकं वा-उपर्युक्तकीलाङ्कितं वैष्णवे गदाकीलकान्वितं-ॐ अग्न आयाहि० वीतये० ॐ सुकर्मतोरणाय नमः (सुभीमतो रणाय नमः-दक्षिणशाखायां-शुक्रायनमः, वामशाखायां-बुधाय नमः इत्याबाह्य-पश्चिमतोरणद्वारदेवताभ्यो नमः इति संपूज्य द्वारशाखाद्वयसमीपे कलशं निधाय-ॐ वाक्पतये नमः (आग्नेयमते कलश द्वयं वा- १ भूतसंजीवनाय नमः २ अमृताय नमः) इति पूजयेत्। सूक्तजपार्थं सामवेदिनौ-होमकाले सूक्तजपार्थं वां वृणे-इति वृणुयात्। तत उत्तरतोरणद्वारसमीपं गत्वा प्लाक्षं वटकाष्ठनिर्मितं। सुहोत्रसंज्ञकं सुप्रसन्नसंज्ञकं वा उपर्युक्तकीलान्वितं वैष्णवे पद्माङ्कितकीलयुतं - ॐ शन्नो देवी० ॐ सुहोत्रतोरणाय नमः (सुप्रसन्नतोरणाय नमः) दक्षिणशाखाया-सोमाय नमः-वामशाखायां-केतुशनिभ्यां नमः-इत्यावाह्य-ॐ उत्तरतोरण द्वारदेवताभ्योनमः इति संपूज्य द्वार शाखाद्वयसमीपे कलशमेकमाग्नेयमते कलशद्वयं वा निधाय ॐ विघ्नेशाय नमः (आग्नेयमते-१ धनदाय नमः २ श्रीप्रदाय नमः) इति संपूज्य सूक्तजपार्थमथर्ववेदिनौ-होमकाले सूक्तजपार्थं वां वृणे-इति वृणीत; इति तोरणपूजा ॥

## द्वारकलशनिधानपूजनध्वजपताकोच्छ्रयबलिदानानि।

यजमानः सं० अमुककर्माङ्गभूतं द्वारकलशनिधान पूजन ध्वजपताकोच्छ्रयबलिदानादिकं करिष्ये। पूर्वद्वारशाखामूलयोः संस्कृतं सोपस्करं कलशद्वयं संस्थाप्य कलशद्वये-ॐ ऐरावताय नमः- इत्यावाह्य पूजयेत्। ततो द्वारपूजा-अक्षतान् गृहीत्वा-ऊर्ध्वे-ॐ द्वारश्रियै नमः-देहल्यां-वास्तुपुरुषाय नमः-वामस्तम्भे-गणेशाय नमः। दक्षिणस्तम्भे-स्कन्दाय नमः। वामकलशे-गङ्गायै नमः। दक्षिणकलशे-यमुनायै नमः। कलशद्वये-इन्द्राय नमः-द्वारभ्याद्यावाहितदेवताभ्यो नमः-इति संपूज्य दद्यात्-ॐ त्रातारमिन्द्र० इन्द्राय नमः-अर्घं समर्पयामि। सदीपबलिदानम्-इन्द्राय० सदीपमाषभक्तबलिं समर्पयामि। पीतं ध्वजं दक्षिणस्तम्भेन सह पीतां पताकां वामस्तम्भेन सह-ॐ आशुः शिशानो० इति मन्त्रेण संयोज्य संपूज्य-ॐ उच्छ्रयस्व वनस्पतऽऊर्ध्वोमा पाह्यᳬहसऽआस्ययज्ञस्योद्दचः - इति स्तम्भाभ्यां सहबद्ध्वा उच्छ्रयेत् ॥ आग्नेयीं गत्वा-स्तम्भमूले कलशं निधाय-ॐ पुण्डरीकाय नमः। ॐ अमृताय नमः-इत्यावाह्य पूजयेत्। रक्तध्वजे रक्तपताकायां-ॐ अग्निन्दूतं० अग्नये नमः गन्धपुष्पाभ्यां सं० बलिः - अग्नये नमः माषभक्तबलिं समर्पयामि। आग्नेयस्तम्भे दक्षिणतो ध्वजं उत्तरतः पताकां बद्ध्वा ॐ उच्छ्रयस्व० द्दचः - इत्युच्छ्रयेत् ॥ दक्षिणद्वारसमीपे उपविश्य-द्वारशाखामूलयोः कलशद्वयं निधाय तत्र। वामनाय नमः - इत्यावाह्य पूजयेत्। ऊर्ध्वे-ॐ द्वारश्रियै० देहल्यां वास्तुपुरुषाय० वामस्तम्भे-पुष्पदन्ताय नमः। दक्षिणस्तम्भे-कपर्दिने० वामकलशे-मोदायै० दक्षिणकलशे० कृष्णायै० इत्यावाह्य पूजयेत्। कृष्णध्वजपताकयोः ॐ यमाय त्वा० यमाय नमः - संपूज्य-यमाय० बलि०। दक्षिणस्तम्भे ध्वजं

Scanned by CamScanner

वामस्तम्भे पताकां बद्ध्वा-ॐ आयङ्गौः० (उच्छ्रयस्व०) इत्युच्छ्रयेत् ॥ नैर्ऋतीं दिशं गत्वा-कलशं निधाय - ॐ कुमुदायनमः ॐ दुर्मदायनमः इत्यावाह्य संपूज्य नीले ध्वजे नीलपताकायां ॐ असुन्वन्त० (मोषूण इन्द्रात्र०) ॐ निर्ऋतये नमः- इत्यावाह्य संपूज्य ॐ निर्ऋतये० बलिं०-बलिं दद्यात् । नैर्ऋतस्तम्भे पूर्वतो ध्वजं उत्तरतः पताकाञ्च स्तम्भेन सह बद्ध्वा ॐ उच्छ्रयस्व० इत्युच्छ्रयेत् ॥

पश्चिमद्वारसपीमे उपविश्य-द्वारशाखामूलयोः कलशद्वयं निधाय-ॐ अञ्जनाय० इत्यावाह्य पूजयेत् । द्वारपूजा-ऊर्ध्वं-द्वारश्रियै० देहल्यां-वास्तुपुरुषायं० वामस्तम्भे-नन्दिने० दक्षिणस्तम्भेचण्डाय० वामकलशे-रेवायै० दक्षिणकलशे-नर्मदायै० इत्यावाह्य पूजयेत् । श्वेतध्वजे वरुणाय० श्वेतपताकायाञ्च-ॐ तत्त्वायामि० संपूज्य-वरुणाय० बलिं० बलिं दद्यात् । दक्षिणस्तम्भेन सह ध्वजं वामस्तम्भेन सह पताकां बद्ध्वा-उच्छ्रयस्व० इत्युच्छ्रयेत् । वायव्यां गत्वा-स्तम्भसमीपे कलशं निधाय ॐ पुष्पदन्ताय० ॐ सिद्धार्थाय० इत्यावाह्य पूजयेत् । धूम्रवर्णध्वजपताकयोः- ॐ आनो नियुद्भिः० (वायो येते०) वायवे नमः - इत्यावाह्य संपूज्य-वायवे० बलिं० बलिं दद्यात् । तत्र वायव्यस्तम्भे दक्षिणतो ध्वजं तदुत्तरतः पताकां स्तम्भेन सह बद्ध्वा ॐ उच्छ्रयस्व० इत्युच्छ्रयेत् ॥ तत उत्तरद्वारसमीपं गत्वा-द्वारशाखामूलयोः कलशद्वये ॐ सार्वभौमाय नमः- इत्यावाह्य संपूज्य । द्वारपूजा-ऊर्ध्वं-द्वारश्रियै० देहल्यां-वास्तुपुरुषाय० वामस्तम्भे-महाकालाय० दक्षिणस्तम्भे-भृङ्गिणे० वामकलशे-वाण्यै० दक्षिणकलशे-वेण्यै० इत्यावाह्य पूजयेत् । श्वेतध्वजपताकयोः ॐ वय ꣳ सोम० सोमाय० इति संपूज्य-सोमाय० बलिं० बलिं दत्त्वा द्वारवामस्तम्भे ध्वजं दक्षिणस्तम्भे पताकां बद्ध्वा ॐ उच्छ्रयस्व० इत्युच्छ्रयेत् ।

ऐशानीं गत्वा-स्तम्भमूले कलशे ॐ सुप्रतीकाय नमः ॐ मङ्गलाय नमः इत्यावाह्य पूजयेत् । श्वेतध्वजपताकयोः ॐ तमीशानं० ईशानाय नमः इत्यावाह्य-ईशानाय० बलिं० बलिं दत्त्वा ॐ उच्छ्रयस्व० इति पश्चिमतो ध्वजं तत्पूर्वतः पताकां स्तम्भेन सह बद्ध्वा उच्छ्रयेत् ॥

ततः पूर्वे शानान्तराले ऊर्ध्वां दिशं प्रकल्प्य-कलशं स्थाप्य-ॐ अस्मेरुद्रा० ब्रह्मणे नमः - इत्यावाह्य संपूज्य - मेघवर्णध्वजपताकयोः ॐ ब्रह्मजज्ञानं० इति ब्रह्माणमावाह्य संपूज्य-ब्रह्मणे० बलिं० बलिं दत्वा पूर्वेशानान्तरालत्रिभागीस्तम्भेन सह बद्ध्वा-ॐ उच्छ्रयस्व० इति मन्त्रेण दक्षिणतो ध्वजं तदुत्तरे पताकाश्चोच्छ्रयेत् ॥ ततो निर्ऋतिपश्चिमान्तरालेऽधोदिशं प्रकल्प्य कलशं निधाय ॐ स्योना पृथिवि० (तन्मित्रस्य वरुणस्या०) ॐ अनन्ताय नमः - इत्यावाह्य सम्पूज्य रक्तवर्णध्वजपताकयोः ॐ नमोऽस्तु सर्पेभ्यो० अनन्ताय नमः इत्यावाह्य-अनन्ताय- बलिं दत्त्वा निर्ऋति पश्चिमान्तरालत्रिभागस्तम्भेन सह दक्षिणतो ध्वजमुत्तरतः पताकां बद्ध्वा ॐ उच्छ्रयस्व० इति मन्त्रेण उच्छ्रयेत् ॥ ततो मध्यवेदीशानस्तम्भे पञ्चवर्णं महाध्वजमुक्तलक्षणं ॐ इन्द्रस्य वृष्णो० इन्द्राय नमः - ब्रह्मजज्ञानं० ब्रह्मणेनमः - वंशेषु-किन्नरेभ्यो नमः पृष्ठे - पन्नगेभ्यो नमः प्रधानदेवतामन्त्रेण-सवाहनं प्रधानदेवतामावाह्य संपूज्य बलिं दत्त्वा ॐ उच्छ्रयस्व० इति मन्त्रेण उच्छ्रयेत् ॥ एवं मण्डपद्वारतोरणध्वजपताकादिनिवेशनं

Scanned by CamScanner

समाप्य-मण्डपाद् वहिः प्राच्यां भूमिमुपलिप्य तत्र सार्वभौतिकबलिं निधाय - संपूज्य-जलमादाय- त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च । ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानि मे ॥१॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः । ऋषयो मनवो गावो देवमातर एव च ॥२॥ सर्वे ममाध्वरे रक्षां प्रकुर्वन्तु मुदान्विताः । ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह ॥३॥ रक्षन्तु मण्डपं सर्वेघ्नन्तु रक्षांसि सर्वतः ॥ आभ्यो देवताभ्यो नमः बलिं निवेदयामि । जल० अनेन बलिदानेन सर्वभूतानि प्रीयन्ताम् । ततो यजमानः प्रक्षालितपाणिपादः स्वाचान्तः मण्डपं प्राग्द्वारेण प्रविशेत् ।

इति मण्डपतोरणद्वारध्वजपताका महाध्वजनिवेशनबलिदानादिविधिः ॥

## २६ मण्डपाङ्गं गणपतिपूजनम् ।

(बहिः स्थापितगणपतिमातृकापीठे मण्डपे आग्नेय्यां स्थापयेत् । यथोक्तमण्डपसत्त्वे आग्नेयां पूर्वरचिते पीठे रक्तवस्त्रं प्रसार्य गोधूममण्डलं कृत्वा तत्र मूर्तौ पूगीफलेषु वा गणपतिं पूजयेत् ॥)

यजमानो मण्डपं प्रविश्याग्नेय्यां पीठे गणपतिं पूजयेत् । आचम्य प्राणानायम्य-सं-मण्डपाङ्गं गणपतिपूजनं करिष्ये । ॐ गणानान्त्वा० ॐ सिदिधबुद्धि सहितश्रीमन्महागणाधिपतये नमः - इत्यावाह्य प्रतिष्ठाप्य षोडशोपचारैः पूजयेत् । अनया पूजया सिद्धिबुद्धिसहितः श्रीमन्महागणाधिपतिः प्रीयताम् ।

## २७ मण्डपाङ्गं वास्तुपूजनम् ।

(यथोक्तमण्डपे नैर्ऋत्यां हस्तमात्रे चतुरस्रे श्वेतवस्त्रं प्रसार्य पञ्चवर्णैस्तण्डुलैः चतुःषष्टिपदं वास्तुमण्डलं विरचय्य बल्यन्तं वास्तुपूजनं कुर्यात् । होमचिकीर्षायां मण्डपे नैर्ऋत्यकोष्ठे स्थण्डिलं कृत्वा यथोक्त होमं संक्षेपेण कुर्यात् । तदभावे स्थापितदेवताहोमावसरे वास्तुं मण्डलदेवताश्चोद्दिश्य एकैकामाज्याहुतिं कुण्डे दद्यात् । मण्डपस्यास्थिरत्वान्नात्र ध्रुवस्थापनम् । प्रासादस्य तु स्थिरत्वात् तत्र ध्रुवपूजनं होमश्च कार्यः)

यजमान उदङ्मुख उपविश्य-सं० मण्डपभूमिगतशल्यादिदोषजीवहिंसावेधादिदोषपरिहारार्थं अमुककर्माङ्गभूतं बल्यन्तं वास्तुपूजनं करिष्ये । पीठस्य आग्नेयादिकोणेषु चतुरः शंकून् निखाय बद्ध्वा वा त्रिगुणीकृतसूत्रेण वेष्टयेत् । हस्ते अक्षतान् गृहीत्वा-विशन्तु भूतले नागा लोकपालाश्च सर्वतः । मण्डपे चात्र तिष्ठन्तु आयुर्बलकराः सदा - इति मन्त्रावृत्त्या अक्षतान् क्षिपेत् । शंकुपार्श्वेचतुरः सदीपमाषभक्तवलीन् निधाय - ॐ बलिद्रव्याय नमः - इति संपूज्य जलमादाय - ॐ अग्निभ्योऽप्यथसर्पेभ्यो ये चान्ये तान् समाश्रिताः । बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॥१॥ ॐ अग्न्यादिभ्यो नमः बलिं समर्पयामि । इति बलिसमीपे जलमुत्सृजेत् । पुनर्जलमादाय - नैर्ऋत्यधिपतिश्चैव नैर्ऋत्यां ये च राक्षसाः । बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम् ॐ-निर्ऋत्यादिभ्यो नमः बलिं० । ३ नमो वै

Scanned by CamScanner

वायुरक्षोभ्यो ये चान्ये तान् समाश्रिताः । बलिं तेभ्यः प्रयच्छामि पुण्यमोदनमुत्तमम्-ॐ वाय्वादिभ्यो नमः बलिं समर्पयामि । ४ रुद्रेभ्योऽप्यथ सर्पेभ्यो ये चान्ये तान् समाश्रिताः । मण्डपे चात्र तिष्ठन्तु गृह्णन्तु सततोत्सुकाः ॐ रुद्रादिभ्यो नमः बलिं समर्पयामि ।

सुवर्णशलाकया दर्भेण वा प्रतीच्यादिप्रागन्ता उदक्संस्था नवरेखाः कुर्यात्-अक्षतान् गृहीत्वा प्रतिरेखम्-१ लक्ष्म्यै नमः २ यशोवत्यै० ३ कान्त्यै० ४ सुप्रियायै० ५ विमलायै० ६ शिवायै० ७ सुभगायै० ८ सुमत्यै० ९ इडायै० । ततो दक्षिणादि-उदगन्तासु प्राक्संस्थासु नवरेखासु-ॐ १ धन्यायै नमः २ प्राणायै० ३ विशालायै० ४ स्थिरायै० ५ भद्रायै० ६ जयायै० ७ निशायै० ८ विरजायै० ९ विभवायै० इत्यावाह्य-ॐ रेखादेवताभ्यो नमः गन्धपुष्पाभ्यां संपूजयामि ।

यजमानोऽक्षतान् गृहीत्वा मण्डलदेवता आवाहयेत् - (शिख्यादिक्रमेण ब्रह्मादिक्रमेण वा)

१. मध्ये चतुष्पदे - ॐ ब्रह्मजज्ञानं० ब्रह्मणे नमः ब्रह्माणमावाहयामि स्थापयामि ।
२. तत्पूर्वपदद्वये-तान्पूर्वया० अर्यमणं०) अर्यम्णे० अर्यमणम्०
३. आग्नेयकोणे अर्धपदे ॐ उदुत्यं० सवित्रे० सवितारम्०
४. चतुष्पदाद् दक्षिणपदद्वये० विवस्वन्ना० विवस्वते० विवस्वन्तम्०
५. ब्रह्मपदान्नैर्ऋत्यार्घपदे० त्रातारमिन्द्र० विबुधाधिपाय० विबुधाधिपं०
६. चतुष्पदात् पश्चिमपदद्वये० मित्रस्यचर्षणी० मित्राय० मित्रं०
७. ब्रह्मपदाद् वायव्यार्धपदे० साकंयक्ष्म० राजयक्ष्मणे० राजयक्ष्माणं०
८. ब्रह्मपदादुत्तरपदद्वये० पृथिवि देवयज० पृथ्वीधराय० पृथ्वीधरं०
९. ब्रह्मपदादैशानार्धपदे० आपो अस्मान्० आपवत्साय० आपवत्सं०
१०. आपवत्ससंलग्नेशानार्धपदे० आपो हिष्ठा० अद्भ्यो० अपः०
११. सवितृपदसंलग्नाग्नेयार्धपदे० उपयामगृहीतोऽसि सावित्रोऽसि०-सावित्राय० सावित्रं०
१२. विबुधाधिपसंलग्ननैर्ऋत्यार्धपदे० गोत्रभिदं० जयाय० जयं०
१३. यक्ष्मसंलग्ननैर्ऋत्यार्धपदे० याते रुद्र० रुद्राय० रुद्रं०
१४. ऐशानकोणे अर्धपदे० सनः पावक० शिखिने० शिखिनं०
१५. तद्दक्षिणपदद्वये० निकाम निकामेनः० पर्जन्याय० पर्जन्यं०
१६. तद्दक्षिणपदद्वये० मर्माणिते० जयन्ताय० जयन्तं०
१७. तद्दक्षिणपदद्वये-मरुत्वाँ इन्द्र० कुलिशायुधाय० कुलिशायुधं०
१८. तद्दक्षिणपदद्वये-आकृष्णेन सविता० सूर्याय० सूर्यं०
१९. तद्दक्षिणपदद्वये-व्रतेन दीक्षा० सत्याय० सत्यं०
२०. तद्दक्षिणसार्घपदे-भायै दार्वाहारं० भृशाय० भृशं०

Scanned by CamScanner

२१. तद्दक्षिणार्धपदे-घृतं घृतपावानः० आकाशाय० आकाशं०
२२. तत्पश्चिमे अर्धपदे-आनो नियुद्भिः० वायवे० वायुम्०
२३. तत्पश्चिमे सार्धपदे-पूषन्तव व्रते० पूष्णे० पूषणं०
२४. तत्पश्चिमे पदद्वये-विदद्यदी सरमा० वितथाय० वितथम्०
२५. तत्पश्चिमे पदद्वये-गृहामाबिभीत० गृहक्षताय० गृहक्षतं०
२६. तत्पश्चिमे पदद्वये-यमायत्वा० यमाय० यमं०
२७. तत्पश्चिमे पदद्वये-गन्धर्वस्त्वा० गन्धर्वाय० गन्धर्वं०
२८. तत्पश्चिमसार्धपदे-सोमध्राजान० भृङ्गराजाय० भङ्गराजं०
२९. तत्पश्चिमसार्धपदे-मृगोन भीमः० मृगाय० मृगं०
३०. तत्पश्चिमार्धपदे-उदीरतामवर० पितृभ्यो० पितॄन्०
३१. तत्पश्चिमार्धपदे-द्वे विरुपे० दौवारिकाय० दौवारिकं०
३२. तदुत्तरपदद्वये-तन्नो व्वातो० सुग्रीवाय० सुग्रीवं०
३३. तदुत्तरपदद्वये-नमः पार्य्याय० पुष्पदन्ताय० पुष्पदन्तं०
३४. तदुत्तरपदद्वये-इमम्मे व्वरुण० वरुणाय० वरुणं०
३५. तदुत्तरपदद्वये-ये रूपाणि० असुराय० असुरं०
३६. तदुत्तरसार्धपदे-नमोऽस्तु सर्पेभ्यो० शेषाय० (शोषाय)० शेषं० (शोषं०)
३७. तदुत्तरार्धपदे-मामेर्म्मां० पापाय० पापं०
३८. तत्पूर्वार्घपदे-परंमृत्यो० रोगाय० रोगं०
३९. तत्पूर्वपदद्वये-अहिरिवभोगैः० अहये० अहिं०
४०. तत्पूर्वपदद्वये-मुख द्द सदस्य० मुख्याय० मुख्यं०
४१. तत्पूर्वपदद्वये-भद्रं कर्णेभिः- भल्लाटाय० भल्लाटं०
४२. तत्पूर्वपदद्वये-वय द्द सोम० सोमाय० सोमं०
४३. तत्पूर्वपदद्वये-नमोऽस्तु सर्पेभ्यो० सर्पाय० सर्पं०
४४. तत्पूर्वसार्धपदे-अदितिर्द्यौ० अदितये० अदिति०
४५. तत्पूर्वार्धपदे-अग्निश्च मे घर्म्मश्च० दितये० दितिं०
४६. मण्डलाद्बहिरैशाने चत्वारिशृङ्गा० चरक्यै० चरकीं०
४७. आग्नेये० ततो व्विराड० विदार्यै० विदारीं०
४८. नैर्ऋत्यै० द्रुपदादिव० पूतनायै० पूतनां०
४९. वायव्ये० रक्षसां भागोऽसि० पापराक्षस्यै० पापराक्षसीं०
५०. पूर्वे-यदक्रन्दः० स्कन्दाय० स्कन्दं०
५१. दक्षिणे-अर्यमणं० अर्यम्णे० अर्यमणं०

Scanned by CamScanner

५२. पश्चिमे-येरूपाणि० डामराय० डामरं०
५३. उत्तरे-नतंविदाथ० पिलिपित्साय० पिलिपित्सं०
५४. पूर्वादिक्रमेण पूर्वे-त्रातारमि० इन्द्राय० इन्द्रं०
५५. आग्नेय्यां-त्वन्नो अग्ने० अग्नये० अग्निं०
५६. दक्षिणे - यमाय त्वा० यमाय० यमं०
५७. नैर्ऋत्ये - असुन्वन्त० निर्ऋतये० निर्ऋतिं०
५८. पश्चिमे - तत्त्वायामि- वरुणाय० वरुणं०
५९. वायव्ये - आनोनियुद्भिः० वायवे० वायुं०
६०. उत्तरे - वय ह सोम० सोमाय० सोमं०
६१. ईशाने - तमीशानं० ईशानाय० ईशानं०
६२. पूर्वेशानमध्ये-अस्मे रुद्रा० ब्रह्मणे० ब्रह्माणं०
६३. निर्ऋतिपश्चिममध्ये - स्योनापृथिवि० अनन्ताय० अनन्तं०

(हेतुकादयः कृताकृताः- पूर्वादिक्रमेण १ हेतुकाय० हेतुकं० २ त्रिपुरान्तकाय० त्रिपुरान्तकं० ३ अग्निवेतालाय० अग्निवेतालं ४ अग्निजिह्वाय० अग्निजिह्वं० ५ महाकालाय० महाकालं ० ६ करालाय० करालं० ७ एकपदे० एकपादं० ८ भीमरूपाय० भीमरूपं० ९ अद्भ्यो० अपः १० क्षितिरूपाय० क्षितिरूपं०) इत्यावाह्य-ॐ मनोजूति० ब्रह्मादिवास्तुमण्डलदेवताः सुप्रतिष्ठिताः वरदाः भवत । ॐ ब्रह्मादिवास्तु मण्डलदेवताभ्यो नमः- इति पञ्चोपचारैः सम्पूज्य मण्डलमध्ये कलशं निधाय क्षौमवस्त्रेणाच्छाद्य-वास्तुपुरुषमूर्त्तिं तत्र निधाय-ॐ वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशोऽअनमीवो भवानः । यत्त्वेमहे प्रतितन्नोजुषस्वशन्नो भव द्विपदे शञ्चतुष्पदे ॥ ॐ भू० वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि स्थापयामि । ॐ मनोजूति० सपरिवार वास्तोष्पते सुप्रतिष्ठितो वरदो भव - इति प्रतिष्ठाप्य-ॐ मण्डलदेवतासहितवास्तुपुरुषाय नमः- इति षोडशोपचारैः पूजयेत् । विशेषार्घः - अयोने भगवन् भर्गललाटस्वेदसम्भव । गृहाणार्घंमया दत्तं वास्तो स्वामिन् नमोऽस्तुते-ॐ मण्डलदेवता सहितवास्तुपुरुषाय नमः विशेषार्घं समर्पयामि । प्रार्थना-ॐ नमो वात्याय० नमस्ते वास्तुपुरुष भूशय्यानिरत प्रभो । मद्गृहे धनधान्यादिसमृद्धिं कुरु सर्वदा ॥ ॐ मण्डल० प्रार्थनां समर्पयामि । जलमादाय-अनेन पूजनेन मण्डलदेवतासहितो वास्तुपुरुषः प्रीयताम् । पीठपुरतः पायसमाषदध्योदना द्यन्यतमं सदीप बलिं निधाय-ॐ बलिद्रव्याय नमः इति संपूज्य-जलमादाय-एह्येहि भगवन् सपरिवार वास्तोष्पते, इमं मयोपनीतं बलिं गृहाण गृहाण, मम यज्ञमच्छिद्रं कुरुकुरु सकलदुष्टेभ्यो मां रक्ष रक्ष स्वाहा ॐ वास्तोष्पतये नमः बलिं निवेदयामि । इति जलं क्षिपेत्-ॐ ब्रह्मणे नमः पायसबलिं समर्पयामि-इत्यायूहेन प्रति दैवतं बलिं दद्यात् ॥ जलमादाय-अनेन बल्यन्तवास्तुपूजनेन मण्डलदेवतासहितः सपरिवारो वास्तुपुरुषः प्रीयताम् ॥

(यथोक्तमण्डपाभावे छायामण्डपे वर्धिनीपूजनमण्डपपूजनमण्डपप्रवेशनवग्रहावाहनधाराकरण

Scanned by CamScanner

त्रिसूत्रीवेष्टनमण्डपाङ्गगणपतिवास्तुपूजनानि न भवन्ति । तत्र वरणान्ते पुण्याहवाचनान्ते वा दिग्रक्षणपञ्चगव्यकरणे देवावाहनयातुधानापसारणप्रादेशकरणानि कृत्वा भूम्यादिपूजनं कुर्यात् ।)

## २८ भूम्यादिपूजनम् ।

यजमानः कुण्डसमीपे उपविश्य अक्षतपुञ्जचतुष्टयं भूमौ कृत्वा उदकूसंस्थमावाहयेत्-ॐ भूरसि भूमिरस्यदितिरसिव्विश्वधायाव्विश्वस्यभुवनस्यधर्त्री । पृथिवीर्यच्छपृथिवीन्दृ ं हपृथिवीम्मा हि सीः ॥१७-१८॥ ॐ भू० भूम्यै नमः भूमिम्० २ ॐ यस्यं कुर्मो गृहे हविस्तमग्ने व्वदर्धयात्वम् । तस्मैदेवाअधिब्रवन्नयञ्च ब्रह्मणस्पतिः ॥१७-५६॥ ॐ भू० कूर्माय० कूर्मम्० ॥३ स्योना पृथिवि० (तन्मित्रस्य व्वरुण०) ॥३३-३८॥ ॐ भू० अनन्ताय० अनन्तं० ॥४ ॐ खङ्गो व्वैश्वदेवःश्वाकृष्णः कृष्णों गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिध्हो मारुतःकृकलासःपिप्पका शकु निस्ते शरव्यायै विश्वेषां देवानाम्पृषतः ॥२४-४०॥ ॐ भू० वराहाय० वराहं० । ॐ मनोजूति० भूम्यादिदेवताः सुप्रतिष्ठिता वरदा भवत । ॐ भूम्यादिदेवताभ्यो (पृथिवीकूर्मानन्तवराहदेवताभ्यो) नमः - इति संपूजयेत् । अनया पूजया भूम्यादि देवताः प्रीयन्ताम् ।

## २९ कुण्डसमेखलस्थण्डिलपूजनम् ।

(भूमिगतगर्तनाभिकण्ठयोनिमेखलारूपपञ्चाङ्गयुतं कुण्डम् । समेखलस्थण्डिले पक्षद्वयम्, कण्ठनाभि योनिसहितमेकं मेखलानिर्माणसञ्जातमानस्य गर्तमाने समावेशात्, कण्ठनाभियोनिरहितं केवलं मेखला युतमपरमिति पक्षद्वयम् । द्वितीयपक्षे कण्ठनाभियोनिदेवतानामावाहनाभावः । मेखलास्वपि क्रमद्वयम्- उपरिमेखलातो विष्णुब्रह्मरुद्रा देवता इति सर्वसम्मतः पक्षः, परशुराममते तु ब्रह्मविष्णुरुद्रा इति क्रमः । पञ्चमेखलासु श्वेतरक्तकृष्णपीतहरितवर्णासु विष्णुब्रह्मरुद्रसूर्येन्द्रदेवताः । एकमेखलायांतस्यामेव देवतात्रयम् मेखलाद्वये उपरिविष्णुः द्वितीयस्यां ब्रह्मरुद्रौ । शैवे योन्यां गौरी, वैष्णवे लक्ष्मीश्चेति ।)

कुण्डं वस्त्रेणाच्छाद्य यजमानः पश्चिमत उपविश्य । एकाधिककुण्डसत्त्वे तत्तत्कुण्डाचार्यः कुण्डपश्चिमत उपविश्य-जलमादाय-कर्माङ्गभूतं कुण्डदेवतापूजनमहं करिष्ये । अक्षतानादाय-ॐ विश्वकर्म्मन् हविषाव्वर्द्धनेन त्रातारमिन्द्रमकृणोरव्वद्ध्यम् । तस्मै व्विशः समनमन्त पूर्व्वीर यमुग्रो व्विहव्योयथासत् ॥८-४६॥ (कुण्डमध्ये) ॐ भू० विश्वकर्म्मणे० विश्वकर्माणम्० २ (उपरिमेखलायांश्वेतवर्णायां-ॐ इदं विष्णुर्व्विचक्रमेत्रेधानिदधेपदम् । समूढमस्य पाᳪसुरे स्वाहा ॥५-१५॥ ॐ भू० विष्णवे० विष्णुम्० ॥३ ॐ ब्रह्मजज्ञानम्प्रथमं पुरस्ताद्विसीमतः सुरुचोव्वेनऽआवः सबुध्न्याऽउपमाऽअस्यव्विष्ठाः सतश्चयोनिमसतश्चव्विवः ॥१२-१३॥ मध्यमेखलायां रक्तवर्णायां-ॐ भू० ब्रह्मणे० ब्रह्माणं० ॥४ ॐ नमस्ते रुद्र मन्यवऽउतोत इषवे नमः । बाहुभ्यामुतते नमः ॥१६-१॥ अधोमेखलायां कृष्णवर्णायां- ॐ भू० रुद्राय० रुद्रं० ॥ "शैवे योन्यां-ॐ अम्बे अम्बिकेऽम्बालिके न मा नयतिकश्चन । ससंस्त्यश्वकः

Scanned by CamScanner

सुभंद्रिकां काम्पीलवासिनीम् ॥२३-१८॥ (सुभगायै विद्महे काम मालिन्यै धीमहि । तन्नो गौरी प्रचोदयात् ॥ गौरीर्मिमाय०ऋ०) ॐ भू० गौर्यै० गौरीम्० ॥ वैष्णवे योन्यां ॐ श्रीश्चते० इषाण ॥३१-२२॥ ॐ भू० लक्ष्म्यै० लक्ष्मीम्०) ॥ ६ कण्ठे-ॐ नीलग्रीवाः शितिकण्ठा दिवं रुद्राऽउपश्रिताः । तेषां ँ सहस्रयोजनेव धन्वानि तन्मसि ॥१६-५६॥ ॐ भू० कण्ठाय० कण्ठं० ॥ ७ नाभ्याम्-ॐ नाभिर्म्मे चित्तं व्विज्ञानम्पायुर्म्मेपचितिर्मसत् ॥ आनन्दनन्दावाण्डौ मे भगः सौभाग्यम्पसः । जङ्घाभ्याम्पदभ्यान्धर्म्मोऽस्मि व्विशि राजा प्रतिष्ठितः ॥२०-९॥ ॐ भू० नाभ्यै० नाभिम्० ॥ ८ कुण्डनैर्ऋत्ये-ॐ वास्तोष्पते० ॐ भू० वास्तुपुरुषाय० वास्तुपुरुषं० ॥ ॐ विश्वकर्माद्यावाहितकुण्डदेवताः सुप्रतिष्ठिता वरदा भवत । ॐ विश्वकर्माद्यावाहित-कुण्डदेवताभ्यो नमः इति संपूज्य प्रार्थयेत् । आवाहयामि तत्कुण्डं विश्वकर्म विनिर्मितम् । शरीरं यच्च ते दिव्यमग्न्यधिष्ठान मुत्तमम् ॥१॥ ये च कुण्डे स्थिता देवाःकुण्डाङ्गे याश्च संस्थिताः । ऋद्धिं यच्छन्तु ते सर्वे यज्ञसिद्धिं मुदान्विताः ॥२॥ हे कुण्ड तव रूपं तु रचितं विश्वकर्मणा । अस्माकं वाञ्छितां सिद्धिं यज्ञसिद्धिंददस्व नः ॥३॥ इति प्रार्थ्य जलमादाय-अनया पूजया विश्वकर्माद्यावाहितकुण्डदेवताः प्रीयन्ताम् ॥ (कण्ठनाभियोनियुते समेखले स्थण्डिले सर्वासां देवतानां स्थापनम् कण्ठनाभियोनिरहिते समेखल स्थण्डिले तु कण्ठनाभिगौरीदेवतास्थापनं न विधेयमिति विशेषः ।)

## ३० पञ्चभूसंस्कारपूर्वकमग्निस्थापनम् ।

(त्रिधाऽग्निसम्प्राप्तिः १ स्त्रीयारणिभ्यामग्न्युत्पादनम् । २ सूर्यकान्तादग्न्युत्पादनम् । ३ बहुपशुवैश्यगृहभाष्ट्रगृह-अम्बरीषगृह-बहुयाजिब्राह्मणमहानस-बहून्नपाकस्थलान्यतमस्थलाहृतश्च । एककुण्डे पञ्चकुण्डयां नवकुण्डयां वा स्थापनसाक्षेपमग्निं सम्पाद्य कुण्डे कुण्डेषु वा पञ्चभूसंस्कारान् कृत्वाऽचार्यकुण्डे समग्रमग्निं संस्थाप्य तत उदधृत्य पूर्वादिक्रमेण कुण्डान्तरेष्वग्निस्थापनमित्येकाग्निपक्षः । स्थापनात् पूर्वं अग्निं विभज्य आचार्यपूर्वकुण्डादिक्रमेणाग्निस्थापनमिति भिन्नाग्निपक्षः । उभयत्राप्यग्नेरेकत्वमेवेति न विवादावसरः । एकपञ्चनवकुण्डादीनां प्रधानकर्मसम्पादकत्वमुपलक्ष्यात्र न काचिदनुपपत्तिः । सर्वकुण्डेषु पृथक् पृथक् पञ्चभूसंस्काराग्निस्थापनदक्षिणतोब्रह्मासनादिप्रणीताविमोकान्त कर्म प्रधानकर्माङ्गत्वेनैव भवति । पञ्चभूसंस्काराणां कुशकण्डिकायाश्च 'एष एव विधिर्यत्र क्वचिद्धोमः इति सूत्रभाष्ये 'अयं विधिरेव न मन्त्राः' इति स्पष्टमुपपादितत्वात् नित्याचारप्रदीपे श्रौतातिदेशमादाय तत्तत्संस्कारेषु मन्त्रा अपि निरुक्ताः । तेषां नावश्यकत्वम्, करणे न दोषः ।)

यजमान आचार्यकुण्डपश्चिमतोऽन्यकुण्डसत्त्वे तत्तत्कुण्डाचार्याः कुण्डपश्चिमत उपविश्य कुण्डाच्छादितं वस्त्रं कुण्डकारयित्रे द्विजाय शिल्पिने वा दद्यात् । जलमादाय-अद्य० पू० तिथौ अमुककर्माङ्गत्वेन अस्मिन् कुण्डे पञ्चभूसंस्कारपूर्व कमग्निस्थापनं करिष्ये । मूलधृतैरैशानीमारभ्य प्राभितैः प्रतीचीमा रम्य प्राक्संस्थैः निःसारितैः त्रिभिर्दर्भैः परिसमुह्य परिसमुह्य परिसमुह्य । (यदं देवा देव

Scanned by CamScanner

हेडनं०) । गोमयोदकेन प्रदक्षिणमुपलिप्य उपलिप्य उपलिप्य) (मानस्तोके०) । स्रुवेण यज्ञियकाष्ठेन दर्भेण वा (परशुराममते स्रुवमूलेन) प्रतीचीमारभ्य प्रागन्तं त्रिरूर्ध्वरेखाकरणमुदक्संस्थम् । प्रादेशपरिमिता वा रेखाः कुर्यात्उल्लिख्य-उल्लिख्य-उल्लिख्य । (ॐ त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वांकाष्ठास्वर्वत) ॥२७-३७-२॥ अनामिकाङ्गुष्ठाभ्यां मृदमुदधृत्य उदधृत्य उदधृत्य (व्रजंगच्छ गोष्ठानम्) । न्यु ब्जपाणिना उदकेनाभ्युक्ष्य अभ्युक्ष्य अभ्युक्ष्य (देवस्य त्वा० अश्विनोर्भैषज्येन० । आनीतमग्निं कुण्डस्याग्नेय्यां दिशि निधाय-ॐ हुं फट् (धृष्टिरस्य० क्रव्यादमग्निं०) इति मन्त्रेण नैर्ऋत्यां दिशि आमक्रव्यादांशौ परित्यज्य, अग्निपात्रमादाय त्रिर्भ्रामयित्वा योनिमार्गेण नीत्वा आत्माभिमुखमग्निं कुण्डे स्थापयेत् ॐ अग्निन्दूतं पुरोदधेहव्य वाहमुपब्रुवे । देवाँ २ आसादयादिह ॥२२-१७॥ (अग्निर्म्मूर्धा०) इति मन्त्रेण निक्षिप्य-अग्न्यानीतपात्रे साक्षतोदकं निषिच्य अग्निमुखं कृत्वा ध्यायेत्-ॐ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्तहस्तासोऽअस्य । त्रिधाबद्धो वृषभो रोरवीतिमहो देवो मर्त्यां २ आविवेश ॥१७-९१॥ अग्ने, शाण्डिल्यगोत्र शाण्डिल्यासितदेवलेति त्रिप्रवरान्वित भूमिर्माता वरुणः पिता मेषध्वज प्राङ्मुख मम सम्मुखो भव-इति प्रार्थ्य-प्रतिष्ठायां-ॐ बलवर्धननाम्ने वैश्वानराय नमः - इति संपूज्य प्रार्थयेत् - सप्तहस्तश्चतुःशृङ्गो सप्तजिह्वो द्विशीर्षकः । त्रिपात् प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥१॥ स्वाहां तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा । बिभ्रद्दक्षिणहस्तैस्तु शक्तिमन्नं स्रुचं स्रुवम् ॥२॥ तोमरं व्यजनं वामे घृतपात्रञ्च धारयन् । आत्माभिमुख आसीन एवंरूपो हुताशनः ॥३॥ अग्निं प्रज्वलितं वन्दे जातवेदं हुताशनम् । हिरण्यवर्णममलं समिद्धं विश्वतोमुखम् ॥ ॐ भू० बलवर्धननामाग्नये० नमस्करोमि ॥ अनेन पञ्चभूसंस्कार पूर्वकमग्निस्थापनेन बलवर्धननामाग्निः प्रीयतां न मम ॥ (कुटीरहोमे वरदनामा-प्रासादवास्तुनि बलवर्धननामा-प्रासाददिग्घोमे वरदनामा) । इत्यग्निस्थापनम् ॥

## ३१ स्थालीपाकतन्त्रम् । कुशकण्डिका ।

स्वयं प्राङ्मुखो यजमान उदङ्मुखमुपविष्टं ब्रह्माणं-अस्मिन् कर्मणि त्वं ब्रह्मा भव, भवामि-इति तेनोक्ते उत्थाय ब्रह्मणो दक्षिणहस्तं गृहीत्वा अग्नेः पूर्वेण गत्वा अग्नेर्दक्षिणे हस्ताद् दूरे पूर्वास्तृतासनसमीपं नीत्वा-अत्रासने-उपविश-ब्रह्मा-उपविशामि-इत्युक्त्वा स्वासनात् किञ्चिद् दर्भमादाय ॐ निरस्तः परावसुः - इति दर्भं नैर्ऋत्यां दिशि निरस्य ब्रह्मा आसने अग्न्यभिमुख उपविशति । ॐ हिरण्यगर्भः० तं गन्धादिभिः संपूज्य । ब्राह्मणोपवेशनाभावे पञ्चाशत्कुशनिर्मितं सग्रन्थिब्रह्माणं निधाय तं पूजयेत् ॥ (ब्रह्मासनविध्यनन्तरं वास्तुकर्मणि विवाहकर्माङ्गचतुर्थीकर्मणि च प्रणीतास्थलं त्यक्त्वोत्तरत उदपात्र प्रतिष्ठापयेत् । प्रणीताप्रणयनम् - उत्तरतः प्रोक्षण्यासनम् । तदुत्तरे प्रणीतासनम् । तदवायव्यां द्वितीयासनम् । द्वादशाङ्गुलदीर्घं चतुरङ्गुलविस्तारं चतुरङ्गुलखातं प्रणीतापात्रं वामहस्ते धृत्वा दक्षिणहस्तस्थकलशेन आत्माभिमुखं जलं पायसहोमे क्षीरञ्च) (आपोहिष्ठा०) प्रपूर्य भूमौ वायव्यासने निधाय दक्षिणस्यानामिकया जलमालभ्य प्रणीतामग्नेरुत्तरत आसने स्थापयेत् ॥ परिस्तरणम् ॥ बर्हिर्मुष्टिमादाय त्रिभिस्त्रिभिर्दर्भैर्वा अग्नेः (कयानश्चित्र०) परिस्तरणम् । पुरस्तादुदगग्रैः, दक्षिणतः प्रागग्रैः, प्रत्यगुदगग्रैः उत्तरतः प्रागग्रैर्दर्भैः

Scanned by CamScanner

अग्निं परिस्तीर्य इतरथावृत्तिः ॥ अर्थवत्पात्रासादनम् । अग्नेः पश्चादुत्तरतो वा, प्राक्संस्थमुदक्संस्थं वा, दर्भानास्तीर्य, द्वन्द्वं द्वन्द्वमासादयेत् । १ पवित्रच्छेदना दर्भास्त्रयः २ पवित्रे द्वे ३ प्रोक्षणीपात्रम् ४ आज्यस्थाली ५ (चरुहोमे चरुस्थाली) ६ संमार्जनकुशाः पञ्च ७ उपयमनकुशाः सप्तपञ्च त्रयो वा ८ पालाश्यः समिधस्तिस्रः ९ स्रुवः १० स्रुक् ११ आज्यम् १२ (चरुहोमे तण्डुलाः) १३ पूर्णपात्रम्, वरो वा (वरोऽभिलषितं द्रव्यम्) उपकल्पनीयानि-समिधः, यवाः, तिलाः कर्महोमोपयुक्तानि अन्यद्रव्याणि (ॐ पूर्णादर्वि० इत्यासादयेत् ।)

पवित्रकरणम्-द्वयोः पवित्रयोरुपरि उदगग्रं पवित्रत्रयं निधाय द्वयोर्मूलेन द्वौ कुशौ प्रदक्षिणीकृत्य त्रयाणां मूलाग्राणि एकीकृत्य (ॐ पवित्रे स्थो वैष्णव्यौ) अनामिकाङ्गुष्ठेन द्वयोरग्रे प्रादेशमात्रेच्छेदयेत् । द्वयोर्मूलं त्रीणि चोत्तरतः क्षिपेत् ॥ प्रोक्षणीसंस्कारः-प्रोक्षणीपात्रे सपवित्रहस्तेन चतुर्वारं प्रणीतोदकमासिच्य अन्यज्जलं प्रपूर्य भूमौ निधाय वामकरे पवित्राग्रं दक्षिणे मूलं धृत्वा (सवितुर्वः प्रसव उत्पुनामि) मध्यतः पवित्राभ्यामुत्पवनम् । प्रोक्षणीनां सव्यहस्ते करणम्, दक्षिणहस्त मुत्तानं कृत्वा मध्यमानामिकाङ्गुल्योर्मध्यपर्वभ्यामपामुद्दिङ्गनम् ॥ प्रणीतोदकेन पवित्राभ्यां प्रोक्षण्याः प्रोक्षणम् । प्रोक्षण्युदकेन (दैव्याय कर्मणे शुन्धध्वम्) आज्यस्थाल्याः प्रोक्षणम्, (चरुस्थाल्याः प्रोक्षणम्), संमार्जनकुशानां प्रोक्षणम्, उपयमनकुशानां प्रोक्षणम्, समिधां प्रोक्षणम्, स्रुवस्य प्रोक्षणम्, स्रुचः प्रोक्षणम् आज्यस्य प्रोक्षणम् (तण्डुलानां प्रोक्षणम्) पूर्णपात्रस्य प्रोक्षणम् । उपकल्पनीयानां प्रोक्षणम्, असञ्चरे प्रणीताग्न्योर्मध्ये प्रोक्षणीनां निधानम्, पवित्रे प्रोक्षणीषु स्थापयेत् ॥ आज्यादिसंस्कारः- (इषेत्वो० तमाय कर्मणे) आज्यस्थाल्यामाज्यं निरुप्य सपवित्रके चरुपात्रे त्रिःप्रणीतोदकमासिच्य त्रिःक्षालित तण्डुलानां प्रक्षेपः पाकापेक्षजलप्रक्षेपश्च) पवित्रे प्रोक्षणीषु निधाय । ब्रह्मणो दक्षिणत आज्याधिश्रयणम्, आचार्यस्य मध्ये चरोरधिश्रयणम्, युगपत् आज्यस्योत्तरतः ॥

पर्यग्निकरणम्-(अन्तरितंरक्षोऽन्तरिता अरातयः । देवस्त्वा सविता श्रपयतु वर्षिष्ठेऽधिनाके) ज्वलदुल्मुकेन आज्यचर्वोः समन्तात् पृथक् पृथक् पर्यग्निकरणम्, ज्वलदुल्मुकस्याग्नौ प्रक्षेपः, इतरथाऽवृत्तिः अर्धशृते चरौ अधोमुखयोः स्रुवस्रुचोः प्रतपनम् (ॐ त्रातारमिन्द्र० उतानौ कृत्वा स्रुवस्य स्रुचश्च पृथक् संमार्जनकुशैः (अनिशितासि० चक्षुषाऽवपश्यामि) संमार्जनम् । उपरि अग्रैरग्रं यावत् मूलैर्मूलं यावदधः । स्रु वस्रु चोः पवित्राभ्यां प्रणीतोदकेनाभ्युक्षणम् । पुनरग्नौ प्रतपनम् (प्रत्युष्ट० अरातयः) । स्वदक्षिणदेशे निधानम् । आज्यमुत्थाप्य चरोः पूर्वेण प्रोक्षण्यपरेण च नीत्वा अग्नेरुत्तरतः स्थापयेत् । ततश्चरुं घृतेनाभिघार्यादाय आज्यस्य पश्चिमतो नीत्वा आज्यादुत्तरतो निदध्यात् । अग्नेः पश्चादाज्यमानीय चरुश्चानीय, पवित्राभ्यां (सवितुर्वः प्रसवऽउत्पुनामि) आज्योत्पवनम् । अवेक्षणम् । पवित्राभ्यामपद्रव्यं निरस्य । पवित्राभ्यां प्रोक्षण्याः प्रत्युत्पवनम् (सवितुर्वःप्रसव उत्पुनामि) । पवित्रे प्रोक्षणीषु निधाय ॥ इति कुशकण्डिकां यथाऽवसरं कुर्यात् ॥ (इयं कुशकण्डिका होमारम्भात् प्राग् यदा कदाचित् कर्तव्या । जलाधिवासः कुटीरहोमश्च समयमनुरुध्य ग्रहहोमान्ते यथासमयं वा सम्पादनीयः । तत्प्रयोगश्चाग्रे वक्ष्यते)

Scanned by CamScanner

## ३२ सर्वतोभद्रमण्डलदेवतास्थापनम् ।

(तन्त्रभद्रमार्तण्डादिग्रन्थेषु द्वादशाष्टादशैकविंशतित्रयोविंशतिपञ्चविंशतिकोष्ठात्मकान्यनेकानि मण्डलानि भिन्नानि प्रदर्शितानि, किन्तु तेषु सर्वत्र मण्डलस्वरूपभेदो न देवताभेदः । प्रतिष्ठात्रैविक्रम्यां भद्रमार्तण्डे च लतालिङ्गोद्भवगौरीतिलकायनेके मण्डलप्रकाराः प्रदर्शिताः, किन्तु स्वातन्त्र्येण देवताभेदो न निर्दिष्टः । शैवाग्रहिणःपुनरेकलिङ्गचतुर्लिङ्गाष्टलिङ्गद्वादश लिङ्गभद्रमण्डलानि पुरस्कुर्वन्ति, तत्रापि सर्वतोभद्रदेवता आवाह्य कुत्रचित् पदधतिषु विशिष्ट देवातावाहनं दृश्यते । जलाशयातिदेशमादाय प्रतिष्ठापद्धतिकारा वारुणमण्डलकरणं निर्दिशन्ति । सर्वतोभद्रमण्डलस्य ब्रह्माण्डस्वरूपवत्त्वात् सर्वमण्डलानां प्रकृतिरूपत्वाच्च सर्वप्रतिष्ठासु सर्वतोभद्रमण्डलकरणं श्रेयः जलाशयातिदेशेन प्रतिष्ठासु वारुणमण्डलकरणेऽपि न दोषः । उभयोः स्थापनविधिः निर्दिश्यते ।)

मध्ये कुण्डसत्त्वे प्राच्यां प्रधानवेद्याम्, पञ्चनवकुण्डयोर्मध्यवेद्यां सर्वतोभद्रं विरचय्य-यजमानो मण्डलसमीपे उपविश्य-जलमादाय-अद्य० पू० तिथौ अमुकदेवताप्रतिष्ठाङ्गभूतं सर्वतोभद्रमण्डलदेवतानां स्थापनं पूजनञ्च करिष्ये । हस्ते अक्षतान् गृहीत्वा-मध्ये कर्णिकायाम्-ॐ ब्रह्म॑ जज्ञानम्प्र॑थमम्पुरस्ता॑द्विसीम॒तः सुरुचो॑ व्वेनऽआ॑वः । सबु॒ध्न्याउप॒मा ऽअ॑स्य व्वि॒ष्ठाः स॒तश्च॒ योनि॒ मस॑तश्च॒ व्विवः॑ ॥१३-३॥ ॐ भू र्भुवःस्वः भो ब्रह्मन् इहागच्छ इह तिष्ठ, ब्रह्मणे नमः ब्रह्माणं आवाहयामि ॥२ उत्तरे वाप्याम्-ॐ व्वयः सोम॑व्व्र॒ते तव॒ मन॑स्त॒नूषु॒ बिभ्र॑तः । प्र॒जाव॑न्तः सचेमहि ॥३-५६॥ ॐ भू० भो सोम इहा० सोमाय० सोमम्० ॥३ ईशान्यां खण्डेन्दौ-ॐ तमीशा॑नं॒ जग॑तस्त॒स्थुष॒स्पतिं॑धियञ्जि॒न्व मव॑से हूमहे व्वयम् । पू॒षा नो॒ यथा॒ व्वेद॑सा॒मस॑द्व्वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥२५-१८॥ ॐ भू० भो ईशान इहा० ईशानाय० ईशानम्० ॥४ पूर्वे वाप्यां ॐ त्रा॒तार॒मिन्द्र॑मवि॒तार॒मिन्द्र॒ꣳ ह॑वेहवे सु॒हव॒ꣳ शूर॒मिन्द्र॑म् । ह्वया॑मि श॒क्रम्पु॑रुहू॒तमिन्द्र॑ꣳ स्व॒स्ति नो॑ म॒घवा॑ धा॒त्विन्द्रः॑ ॥२०-५०॥ ॐ भू० भो इन्द्रइहा० इन्द्राय० इन्द्रम्० ॥५ आग्नेय्यां खण्डेन्दौ-ॐ त्वन्नो॑ अग्ने॒ तव॑ देव पा॒युभि॑र्म्म॒घोनो॑ रक्ष त॒न्वश्च॒ व्वन्द्य । त्रा॒ता तो॒कस्य॒ तन॑ये॒ गवा॑म॒स्य निमे॑षꣳ रक्ष॑माण॒स्तव॑ व्व्र॒ते ॥३४-१३॥ ॐ भू० भो अग्ने इहा० अग्नये० अग्निम्० ॥ दक्षिणे वाप्याम् ॐ य॒माय॒त्वाङ्गि॑रस्वते पितृ॒मते॒ स्वाहा॑ । स्वाहा॑ ध॒र्म्मा॑य॒ स्वाहा॑ घ॒र्म्मः पि॒त्रे ॥३८-९॥ ॐ भू० भो यम इहा० यमाय० यमम्० ॥७ नैर्ऋत्यां खण्डेन्दौ-ॐ असु॑न्न्वन्त॒म य॑जमानमिच्छस्ते॒ न॒स्ये॒ त्यामन्वि॑ हि॒ तस्क॑रस्य । अ॒न्यम॒स्मदि॑च्छ॒ सा त॑ इ॒त्या नमो॑ देवि निर्ऋते॒ तुभ्य॑मस्तु ॥१२-६२॥ ॐ भू० भो निर्ऋते इहा० निर्ऋतये० निर्ऋतिम्० ॥ ८ पश्चिमे वाप्याम्-ॐ तत्त्वा॑ यामि॒ ब्रह्म॑णा॒ व्वन्द॑मान॒स्तदाशा॑स्ते॒ यज॑मानो ह॒विर्भिः॑ । अहे॑डमानो व्वरुणे॒ह बो॒ध्युरु॑शꣳ स॒मान॒ आयुः॒ प्रमो॑षीः ॥१८-४९॥ ॐ भू० भो वरुण इहा० वरुणाय० वरुणम् ॥ ९ वायव्यां खण्डेन्दौ-ॐ आनो॑नि॒युद्भिः॑ श॒तिनी॑भिरध्व॒रꣳ स॑ह॒स्रिणी॑भि॒रुप॑याहि य॒ज्ञम् । व्वायो॑ऽअ॒स्मिन् सव॑ने मादयस्व यू॒यम्पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥२७-२८॥ ॐ भू० भो वायो इहा० वायवे० वायुम् ॥१० वायुसोममध्ये भद्रे-

Scanned by CamScanner

ॐ सु गावो देवाःसदना अकर्म्म य ऽआजुग्मेदꣳसवनं जुषाणाः । भरमाणाव्वहमाना हवी७ष्य स्मे धत्त व्वसवो व्वसूनि स्वाहा ॥८-१८॥ ॐ भू० भो अष्ट वसवः इहागच्छत इह तिष्ठत, अष्टवसुभ्यो० अष्टवसून्० ॥११ सोमेशानमध्ये भद्रे-ॐ रुद्राः सꣳसृज्य पृथिवीम्बृहज्ज्योतिःसमीधिरे । तेषाम्भानुरजस्रऽइच्छुक्रो देवेषु रोचते ॥११-५४॥ ॐ भू० भो एकादश रुद्राः इहागच्छत इहतिष्ठत, एकादशरुद्रेभ्यो० एकादशरुद्रान्० ॥१२ ईशानपूर्वमध्ये भद्रे-ॐ यज्ञो देवानाम्प्रत्येति सुम्नमादित्यासो भवता मृडयन्तः । आ वोर्व्वाची सुमतिर्व्ववृत्यादꣳहोश्चिद्या व्वरिवो व्वित्तरासदादित्येभ्यस्त्वा ॥८-४॥ ॐ भू० भो व्दादशादित्याः इहागच्छत इहतिष्ठत, व्दादशादित्येभ्यो० द्वादशादित्यान्० ॥१३ इन्द्राग्निमध्ये भद्रे ॐ यावाङ्कशा मधुमत्यश्विनासूनृतावती । तया यज्ञम्मिमिक्षतम् ॥७-११॥ ॐ भू० भो अश्विनौ इहागच्छतम्, इह तिष्ठतम्, अश्विभ्यां० अश्विनौ० ॥१४ अग्नियममध्ये भद्रे-ॐ ओमासश्चर्षणीधृतो व्विश्वेदेवासऽआगत । दाश्वा७सो दाशुषः सुतम् ॥७-३३॥ ॐ भू० भो सपैतृका विश्वेदेवाः इहागच्छत इहतिष्ठत, सपैतृकेभ्यो विश्वेभ्यो देवेभ्यो० सपैतृकान् विश्वान् देवान्० ॥१५ यमनिर्ऋतिमध्ये भद्रे- ॐ अभित्यं देवꣳ सवितारमोण्योः कविक्रतुमर्चामि सत्यसवꣳरत्नधामभि-प्रियम्मतिङ्कविम् । ऊर्ध्वा यस्यामतिर्भाऽअदिद्युतत् सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपास्वः । प्रजाभ्यस्त्वा प्रजास्त्वानुप्राणन्तु प्रजास्त्वमनु प्राणिहि ॥४-२५॥ ॐ भू० भो सप्तयक्षाः इहागच्छत इहतिष्ठत, सप्तयक्षेभ्यो० सप्तयक्षान्० ॥१६ निर्ऋतिपश्चिममध्येभद्रे-ॐ भूतायत्वा नारातये स्वरभिविख्येषन्दꣳहन्तान्दुर्य्याः पृथिव्यामुर्व्वन्तरिक्षमन्वेमि पृथिव्यास्त्वानाभौ सादयाम्यदित्याऽउपस्थेग्ने हव्यꣳरक्ष ॥१-११॥ ॐ भू० भो भूतनागाः इहागच्छत इहतिष्ठत, भूतनागेभ्यो० भूतनागान्० ॥१७ वरुणवायुमध्ये भद्रे-ॐ ऋताषाडृतधामाग्निर्गन्धर्व्वस्तस्यौषधयोऽप्सरसो मुदो नाम । सनऽइदम्ब्रह्म-क्षत्रम्पातुतस्मै स्वाहा व्वाट्ताभ्यः स्वाहा ॥१८-३८॥ ॐ भू० भो गन्धर्वाप्सरसः इहागच्छत इहतिष्ठत, गन्धर्वाप्सरोभ्यो० गन्धर्वाप्सरसः० ॥

१८ ब्रह्मसोममध्ये वाप्याम्-ॐ यदक्रन्दः प्रथमञ्जायमानऽउद्यन्त्समुद्रादुत वा पुरीषात् । श्येनस्य पक्षा हरिणस्य बाहूऽउपस्तुत्यम्महिजातन्ते अर्व्वन् ॥२९-१२॥ ॐ भू० भो स्कन्द इहा० स्कन्दाय० स्कन्दम्० ॥१९ स्कन्दादुत्तरे-ॐ आशुःशिशानो व्वृषभो न भीमो घनाघनःक्षोभणश्चर्षणीनाम् । सङ्क्रन्दनो निमिषऽएकवीरःशतꣳसेनाऽअजयत्साकमिन्द्रः ॥१७-३३॥ ॐ भू० भो नन्दीश्वर इहा० नन्दीश्वराय० नन्दीश्वरम्० ॥२० नन्दीश्वररादुत्तरे-ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि । समापोऽ-अद्भिरग्मतसमोषधीभिरोषधीः ॥६-२८॥ ॐ भू० भो शूलमहाकालौ, इहगच्छतम्, इहतिष्ठतम्, शूलमहाकालाभ्यां० शूलमहाकालौ० ॥२१ ब्रह्मेशानमध्ये वल्लीषु-ॐ अदितिर्द्यौरदिति रन्तरिक्षमदितिर्म्माता सपिता स पुत्रः । विश्वेदेवाऽअदितिःपञ्चजनाऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥२५-२३॥ ॐ भू० भो दक्षादिसप्तकानि, इहागच्छत इहतिष्ठत, दक्षादिसप्तकेभ्यो० दक्षादि सप्तकानि० ॥२२ ब्रह्मेन्द्रमध्ये वाप्याम्-ॐ अम्बेऽअम्बिकेम्बालिके न मा नयतिकश्चन । ससस्त्यश्वकःसुभद्रिकाङ्काम्पीलवासिनीम् ॥२०-१८॥

Scanned by CamScanner

ॐ भू० भो दुर्गे इहा० दुर्गायै० दुर्गाम् ॥२३ दुर्गोत्तरतः-ॐ इदं विष्णुर्व्विचक्रमे त्रेधा निंदधेपदम्। संमूढमस्य पाᳪसुरे स्वाहा ॥५-१६॥ ॐ भू० भो विष्णो इहा० विष्णवे० विष्णुम्० ॥२४ ब्रह्माग्नि मध्ये वल्लीषु-ॐ पितृभ्यः स्वधायिभ्यः स्वधा नमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः । अक्षन् पितरोमीमदन्त पितरोतीतृपन्त पितरः पितरः शुन्धध्वम् ॥१९-३६॥ ॐ भू० भो स्वधे इहा० स्वधायै० स्वधाम्० ॥२५ ब्रह्मयममध्येवाप्यां-ॐ परम्मृत्योऽअनुपरेहि पन्थाँ यस्तेऽअन्यऽइतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाᳪरीरिषो मोत व्वीरान् ॥३५-७॥ ॐ भू० भो मृत्युरोगौ इहागच्छतम् इहतिष्ठतम्, मृत्युरोगाभ्यां० मृत्युरोगौ० ॥ २६ ब्रह्मनिर्ऋतिमध्ये वल्लीषु-ॐ गणानान्त्वा गणपतिह हवामहे प्रियाणान्त्वा प्रियपतिहहवामहे निधीनान्त्वा निधि पतिह हवामहे व्वसो मम । आहमजानि गर्भधमात्वमजासि गर्भधम् ॥२३-१९॥ ॐ भू० भो गणपते इहा० गणपतये० गणपतिम्० ॥२७ ब्रह्मवरुणमध्ये वाप्याम्-ॐ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये। शंय्योरभिस्रवन्तु नः ॥ ३६-१२॥ ॐ भू० भो आपः इहागच्छत इह तिष्ठत, अद्भ्यो० अपः० ॥२८ ब्रह्मवायुमध्ये वल्लीषु ॐ मरुतो यस्य हि क्षये पाथा दिवो व्विमहसः । स सु गोपातमो जनः ॥८-३१॥ ॐ भू० भो मरुतः इहागच्छत इहतिष्ठत, मरुद्भ्यो० मरुतः० ॥ २९ ब्रह्मणः पादमूले-ॐ स्योना पृथिवि नो भवानृक्षरा निवेशनी । यच्छानः शर्म्मस प्रथाः ॥३६-१३॥ ॐ भू० भो पृथिवि इहा० पृथिव्यै० पृथिवीम्० ॥३० ब्रह्मणःपादमूले कर्णिकाधः-ॐ पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥३४-११॥ ॐ भू० भो गङ्गादिनद्यः इहागच्छत इहतिष्ठत, गङ्गादिनदीभ्यो० गङ्गादिनदीः० ॥३१ ब्रह्मणः पादमूले कर्णिकाधः-ॐ इमम्मे व्वरुण श्रु धी हवमद्या च मृडय । त्वामवस्युराचके ॥२१-१॥ ॐ भू० भो सप्तसागराः, इहागच्छत इहतिष्ठत, सप्तसागरेभ्यो० सप्तसागरान्० ॥३२ कर्णिकोपरि-ॐ प्रपर्व्वतस्य वृषभस्य पृष्ठान्नावश्चरन्ति स्वसिच इयानाः । ता आववृत्रन्नधरागुदक्ताऽअहिम्बुध्न्यमनुरीयमाणाः । विष्णो व्विक्रमणमसि व्विष्णोर्विक्रान्तमसि विष्णोः क्रान्तमसि ॥१०-१९॥ ॐ भू० भो मेरो इहा० मेरवे० मेरुम्० ॥

ततो बहिरुत्तरादिक्रमेणायुधानि विन्यसेत्-प्रथमपरिधौ-सोमसमीपे-३३ ॐ गणानान्त्वा० ॐ भू० गदे इहा० गदायै० गदाम्० ॥ ३४ ईशानसमीपे ॐ त्रिंशद्धाम व्विराजतिव्वाक् पतङ्गाय धीयते । प्रति वस्तोरहद्युभिः ॥३-८॥ ॐ भू० भो त्रिशूल इहा० त्रिशूलाय० त्रिशूलं ॥३५ इन्द्रसमीपे ॐ महाँ २ इन्द्रोव्वज्रहस्तः षोडशी शर्म यच्छतु । हन्तु पाप्मानं योऽस्मान् व्द्वेष्टि ॥२६-१०॥ ॐ भू० भो वज्र० इहा० वज्राय० वज्रम्० ॥३६ अग्निसमीपे ॐ व्वसुच मे व्वसतिश्च मे कर्म्म च मे शक्तिश्च मेर्त्थश्च म एमश्च म इत्या चमेगतिश्च मे यज्ञेन कल्पन्ताम् ॥१८-१५॥ ॐ भू० भो शक्ते इहा० शक्तये, शक्तिम्० ॥३७ यमसमीपे-ॐ इडऽएह्यदितऽएहिकाम्याऽएत । मयिवः कामधरणं भूयात् ॥३-२७॥ ॐ भू० भो दण्ड इहा० दण्डाय० दण्डम्० ॥३८ निर्ऋतिसमीपे-ॐ खड्गो, वैश्वदेवः० (पृ-२४४) ॐ भू० भो खड्ग, इहा० खड्गाय,० खड्गम्० ॥३९ वरुण समीपे ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं

Scanned by CamScanner

व्विमध्यम७श्रथाय। अथा व्वयमादित्यव्रते तवानागसोऽअदितयेस्याम ॥१२-१२॥ ॐ भू० भो पाश इहा० पाशाय० पाशम्० ॥४०॥ वायु समीपे-ॐ अहशुश्चमेरश्मिश्च मेऽदाभ्यश्चमेऽधिपतिश्चमउपा७शुश्च मेंऽन्तर्य्यामश्च म ऐन्द्रवायवश्च मे मैत्रावरुणश्चम आश्विनश्च मे प्रति प्रस्थानश्च मे शुक्रश्च मे मन्थी च मे यज्ञेन कल्पन्ताम् ॥१८-१९॥ ॐ भू० भो अङ्कुश इहा० अङ्कुशाय० अङ्कुशम्० ॥

४१ द्वितीयपरिधावुत्तरे-ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरं पुरः। पितरञ्च प्रयन्त्स्वः ॥३-६॥ ॐ भू० भो गौतम इहा० गौतमाय० गौतमम्० ॥४२ ईशानसमीपे-ॐ अयं दक्षिणा व्विश्वकर्म्मा तस्य मनो व्वैश्वकर्म्मणं ग्रीष्मो मानसस्त्रिष्टुव् ग्रैष्मी त्रिष्टुभः स्वार७ स्वारादन्त र्य्यामोऽन्तर्यामात् पञ्चदशः पञ्चदशाद् बृहद्भरद्वाजऽऋषिः प्रजापतिगृहीतया त्वया मनो गृह्णामि प्रजाभ्यः ॥१३-५५॥ ॐ भू० भो भरद्वाज इहा० भरद्वाजाय० भरद्वाजम्० ॥३३ इन्द्रसमीपे-ॐ इदमुत्तरात् स्वस्तस्यश्रोत्रंसौवशः- रच्छौत्र्यनुष्टुप् शारद्यनुष्टुभ ऐडमैडान् मन्थी मन्थिनऽ एकविंश एकविंशाद् वैराजं विश्वामित्र ऋषिःप्रजापतिगृहीतया त्वया श्रोत्रं गृह्णामि प्रजाभ्यः ॥१३-५७॥ ॐ भू० भो विश्वामित्र इहा० विश्वामित्राय० विश्वामित्रम्० ॥४४ अग्निसमीपे ॐ त्र्यायुषञ्जमदग्नेः कश्यपस्य- त्र्यायुषम्। यद्देवेषुत्र्यायुषं तन्नोऽअस्तु त्र्यायुषम् ॥३-६२॥ ॐ भू० भो कश्यप इहा० कश्यपाय० कश्यपम्० ॥४५ यमसमीपे ॐ अयं पश्चाद्विश्वव्यचास्तस्य चक्षुर्व्वैश्व्यव्यचसं वर्षाश्चाक्षुष्यो जगती व्वार्षी जगत्या ऋक्समम्कृसमाच्छुक्रः शुक्रात् सप्तदशः सप्तदशाद्वैरूपं जमदग्निर्ऋषिः प्रजापतिगृहीतया त्वया चक्षुर्गृह्णामि प्रजाभ्यः ॥१३-५६॥ ॐ भू० भो जमदग्ने इहा० जमदग्नये० जमदग्निम्० ॥४६ निर्ऋतिसमीपे- ॐ अयं पुरो भुवस्तस्य प्राणो भौवायनो व्वसन्तः प्राणा यनो गायत्री वासन्ती गायत्र्यै गायत्रं गायत्रादुपा७शुरुपा७शोस्त्रिवृत्त्रिवृतो रथन्तरं वसिष्ठ ऋषिः प्रजापतिगृहीतया त्वया प्राणं गृह्णामिप्रजाभ्यः ॥१३-५४॥ ॐ भू० भो वसिष्ठ इहा० वसिष्ठाय० वसिष्ठम्० ॥४७ वरुणसमीपे- अत्र पितरो मादयद्ध्वं यथाभागमावृषायध्वम्। अमीमदन्त पितरो यथा भागमावृषायिषत ॥२-३१॥ ॐ भू० भो अत्रे इहा० अत्रये० अत्रिम्० ॥४८ वायुसमीपे ॐ तम्पत्नीभिरनु गच्छेम देवाः पुत्रैर्भ्रातृभिरुत वा हिरण्यैः। नाकङ्गृभ्णानाः सुकृतस्यलोके तृतीये पृष्ठेऽअधिरोचने दिवः ॥१५-५०॥ ॐ भू० भो अरुन्धति इहा० अरुन्धत्यै० अरुन्धतीम्० ॥

४९ पूर्वे-ॐ अदित्यै रास्नासीन्द्राण्याऽउष्णीषः। पूषासि धर्म्माय दीष्व ॥३८-३॥ ॐ भू० भो ऐन्द्रि इहा० इन्द्राण्यै० इन्द्राणीम्० ॥५० आग्नेय्यां-ॐ यत्रबाणाः सम्पतन्ति कुमारा व्विशिखा इव। तन्नऽइन्द्रो बृहस्पतिरदितिः शर्म्म यच्छतु व्विश्वाहाशर्म्म यच्छतु ॥१७-४८॥ ॐ भू० भो कौमारि इहा० कौमार्यै० कौमारीम्० ॥५१ दक्षिणे-ॐ इन्द्रायाहि तूतुतान उप ब्रह्माणिहरि वः सुते दधिष्वनश्चनः ॥२०-८९॥ ॐ भू० भो ब्राह्मि इहा० ब्राह्म्यै० ब्राह्मीम्० ॥५२ नैर्ऋत्याम्० ॐ आयङ्गौः पृश्निरक्रमीदसदन्मातरम्पुरः। पितरञ्च प्रयन्त्स्वः ॥३६॥ ॐ भू० भो वाराहि इहा० वाराह्यै० वाराहीम्० ॥५३ पश्चिमे-ॐ अम्बे अम्बिके० (पृ-२२९) ॥२०-१८॥ ॐ भू० भो चामुण्डे इहा० चामुण्डायै०

चामुण्डाम्० ॥५४ वायव्याम्-ॐ आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम्। भवा वाजस्य सङ्गथे ॥१२-११२॥ ॐ भू० भो वैष्णवि इहा० वैष्णव्यै० वैष्णवीम् ॥५५ उत्तरे ॐ या ते रुद्र शिवा तनूरघोरा पापकाशिनी। तया नस्तन्वा शन्तमया गिरिशन्ताऽभिचाकशीहि ॥१६-२॥ ॐ भू० भो माहेश्वरि इहा० माहेश्वर्यै० माहेश्वरीम्० ॥५६ ईशाने-ॐ समख्ये देव्या धिया सन्दक्षिणयोरुचक्षसा। मामऽआयुः प्रमोषीर्म्मोऽअहं तव वीरं विदेय तव देविसन्दृशि ॥४-२३॥ ॐ भू० भो वैनायकि इहा० वैनायक्यै० वैनायकीम् आवाहयामि स्थापयामि ॥ एवं ५६ षट्पञ्चाशद्देवता आवाह्य-ॐ मनोजूति० ब्रह्मादिसर्वतोभद्रमण्डलदेवताः सुप्रतिष्ठिताः वरदाः भवत। ततः ॐ भू० ब्रह्मादिसर्वतोभद्र मण्डलदेवताभ्यो नमः-इति पूजयेत्। अनया पूजया ब्रह्मादिसर्वतोभद्रमण्डलदेवताः प्रीयन्ताम् ॥ (केचि दत्र पायसबलिदानमिच्छन्ति। सदीपं पायसबलिं निधाय-बलिद्रव्याय नमः-इति सम्पूज्य-ॐ ब्रह्मणे नमः पायसबलिं समर्पयामि-इति प्रतिनाम अथवा एकतन्त्रेण-ॐ भू० ब्रह्मादिसर्वतोभद्रमण्डलदेवताभ्यो नमः एकतन्त्रेण सदीपपायसबलिं समर्पयामि। जलमादाय-अनेन बलिदानेन ब्रह्मादिसर्वतोभद्रमण्डलदेवताः प्रीयन्ताम्-इति बलिदानम् ॥ स्थापितदेवताहोमावसरे-ॐ ब्रह्मणे स्वाहा-इति प्रतिनाम आज्येनैकैकामाहुति वा दश दश धृताक्ततिलाहुतीर्जुहुयात् ॥) इति सर्वतोभद्रमण्डलदेवतास्थापनपूजनादि।

## ३३ एकलिङ्गतोभद्रचतुर्लिङ्गतोभद्राष्टलिङ्गतोभद्रेषु विशिष्टदेवताः।

त्रिप्रकारेषु लिङ्गतोभद्रमण्डलेषु पूर्वं सर्वतोभद्रनिर्दिष्ट ५६ षट्पञ्चाशद्देवतावाहनं कृत्वा ततो विशिष्टदेवतानामावाहनम्। तत्रैकलिङ्गतोभद्रेलिङ्गे-१ महादेवाय ईशानाय नमः महादेवमीशानं०। चतुर्लिङ्गेषु सत्सु-१ पश्चिमलिङ्गे-ॐ सद्योजातं० ब्रह्मजज्ञानं० सद्योजाताय० सद्योजातं०। २ उत्तरलिङ्गे-ॐ वामदेवाय नमो० वाममद्य० वामदेवाय० वामदेवम्०। ३ दक्षिणलिङ्गे-ॐ अघोरेभ्यो० याते रुद्र शिवा० अघोराय० अघोरं०। ४ पूर्वलिङ्गे-ॐ तत्पुरुषाय० हसःशुचिषद्० तत्पुरुषाय० तत्पुरुषम्० ५ मध्ये ॐ ईशानः सर्वविद्यानां० तमीशानं० ॐ ईशानाय० ईशानम्०। अष्टलिङ्गेषु सत्सु पूर्वालिङ्गयोःउत्तरलिङ्गे-१ ॐ भवाय० भवं०। २ दक्षिणलिङ्गे० शर्वाय० शर्वम्०। दक्षिणलिङ्गयोः पूर्वलिङ्गे-३ ईशानाय० ईशानं०। पश्चिमलिङ्गे ४ पशुपतये० पशुपतिम्० ५ पश्चिमलिङ्गयोर्दक्षिणलिङ्गे-रुद्राय० रुद्रं०। उत्तरलिङ्गे-६ उग्राय० उग्रम्०। उत्तरलिङ्गयोः पश्चिमलिङ्गे-७ भीमाय० भीमम्०। तत्पूर्वलिङ्गे-८ महते० महान्तम्०। अथ द्वादशलिङ्गेषु-ईशानादिप्रादक्षिण्येन-१ वीरभद्राय० वीरभद्रं०। २ शम्भवे शम्भुम्० ३ अजैकपदे० अजैकपदम्०। दक्षिणलिङ्गेषु ४ अहिर्बुध्न्याय० अहिर्बुध्न्यम्०। ५ पिनाकिने० पिनाकिनम्० ६ शूलपाणये० शूलपाणिम्०। पश्चिमलिङ्गेषु-७ भुवनाधीश्वराय० भुवनाधीश्वरं०। ८ कपालिने० कपालिनं०। ९ दिक्पतये० दिक्पतिम्०। उत्तरलिङ्गेषु-१० रुद्राय० रुद्रं०। ११ शिवाय० शिवं०। १२ महेश्वराय० महेश्वरम्०। इति पार्थक्येन एकचतुरष्ट द्वादशलिङ्गदेवतास्तस्मिँस्तस्मिन् मण्डल आवाहयेत्। अथ लिङ्गतोभद्रमण्डलेषु सामान्यदेवताः० पूर्वे-१ असिताङ्ग भैरवाय० असिताङ्ग भैरवम्०। २ आग्नेये रुरुभैरवाय० रुरुभैरवाय०। दक्षिणे-३ चण्डभैरवाय० चण्डभैरवम्०। नैर्ऋत्यै-४ क्रोध भैरवाम्० क्रोधभैरवम्०। पश्चिमे-५ उन्मत्त

भैरवाय० उन्मत्तभैरवम्० । वायव्ये-६ कपालभैरवाय० कपालभैरवम्० । उत्तरे-७ भीषणभैरवाय० भीषणभैरवम्० । ईशान-८ संहारभैरवाय० संहारभैरवम्० ॥ पूर्वादिक्रमेणाष्टनागान्-पू-९ अनन्ताय० अनन्तं० । १० आ० वासुकये० वासुकिम्० । ११ तक्षकाय० तक्षकं० । १२ नै-कुलिशाय० कुलिशम्० । १३ प-कर्कोटकाय० कर्कोटक० वा-१४ शङ्खपालाय० शङ्खपालम्० । १५ उ-कम्बलाय० कम्बलम् ॥ १६ ई-अश्वतराय० अश्वतरम्० तत ईशानपूर्वाद्यन्तरालेषु १७ शूलिने० शूलिनम्० । १८ चन्द्रमौलये० चन्द्रमौलिम्० ॥ अग्निनैर्ऋत्यान्त रालेषु-१९ वृषध्वजाय० वृषध्वजम्० २० त्रिलोचनाय० त्रिलोचनम्० ॥ नैर्ऋतवायव्यान्तरालेषु-२१ शक्तिधराय- शक्तिधरम्० । २२ महेश्वराय० महेश्वरम्० । वायव्यैशानान्तरालेषु-२३ शूलपाणये० शूलपाणिम्० । २४ महादेवाय० महादेवम्० ॥ परिधौ-२५ परिधये० परिधिम्० । २६ परिधिसमन्तात्-चतुःपुरीभ्यो० चतुःपुरीः० ॥ आग्नेयकोणे शृङ्खलायां-२७ ऋग्वेदाय० ऋग्वेदम्० नैर्ऋत्यकोणे २८ यजुर्वेदाय० यजुर्वेदम्० ॥ वायव्यकोणे २९ सामवेदाय-सामवेदम्० । ईशानकोणे शृङ्खलासु ३० अथर्ववेदाय० अथर्ववेदम्- ॥ पूर्वादिक्रमेण वापीषु अष्टशक्तीरावाहयेत्-पूर्वे ३१ भवान्यै० भवानीम्० ३२ शर्वाण्यै० शर्वाणीम् ॥ दक्षिणे-३३ पाशुपत्यै० पाशुपतीम्० । ३४ ईशान्यै० ईशानीम्० ॥ पश्चिमे० ३५ उग्रायै० उग्राम्० । ३६ रुद्राण्यै- रुद्राणीम्० ॥ उत्तरे-३७ भीमायै० भीमाम्० । ३८ महत्यै० महतीम्० ॥ (एवं सर्वतोभद्रदेवतानन्तरं तत्तत्संख्याकलिङ्गदेवताआवाह्य सामान्या असिताङ्गभैरवादिमहत्यन्ता अष्टात्रिंशद्देवता आवाहयेत् । शुक्लयजुः शाखीयकर्म काण्डप्रदीपोक्तदेवतानां विनिमयं कृत्वैष प्रकारो निर्दिष्टः । प्राचीनहस्तलिखितपद्धतिषु लेखकस्वातन्त्र्येण देवतानिर्देशभेदाद्, देवतानिर्देशकप्रत्यक्ष-वचनानुपलम्भात् पद्धतिषु पारस्परिक-विरोधदर्शनाचार्य पक्षः समादृतः । महारुद्रादिपद्धतिषु व्दादशलिङ्गतोभद्रमण्डलदेवतानां वैशिष्ट्येन स्वीकारात् तत्प्रयोगो ग्रन्थान्तरादवसेयः) ॐ मनोजूतिरिति प्रतिष्ठाप्य ॐ ब्रह्मादिलिङ्गतोभद्रदेवताभ्यो नमः इति सम्पूज्य बलि दद्यात् । प्रतिष्ठायां सर्वतोभद्रस्य प्राधान्यमिति विवेकः ।

इति लिङ्गतोभद्रमण्डलदेवतास्थापनम् ।

## ३४ वारुणमण्डलदेवतास्थापनम् ।

(प्रतिष्ठायां सर्वतोभद्रमण्डलाकरणे जलाशयातिदेशाद् वारुणमण्डलकरणं पद्धतिकृद्भिः प्रपञ्चितम् । तद्रचनाप्रकारस्तु ग्रन्थान्तरादनुसन्धेयः)

जलमादाय-अद्य० तिथौ अमुकप्रतिष्ठाङ्गभूतं वारुणमण्डलदेवतास्थापनं पूजनं च करिष्ये । हस्ते अक्षतान् गृहीत्वा-

१ पूर्वे आरायां-ॐ आकृष्णेन० ॐ भूः० भो सूर्य इहा० सूर्याय० सूर्यम्० ॥
२ आग्नेये आरायां-ॐ इमन्देवा० ॐ भू० भो सोम इहा० सोमाय० सोमम्० ॥
३ दक्षिणे आरायां-ॐ अग्निर्मूर्धा० ॐ भू० भो भौम इहा० भौमाय० भौमम् ॥

Scanned by CamScanner

४ नैर्ऋत्ये आरायां-ॐ उद्बुध्यस्वाग्ने० ॐ भू० भो बुध इहा० बुधाय० बुधम् ।
५ पश्चिमे आरायां-ॐ बृहस्पते अति० ॐ भू० भो बृहस्पते इहा० बृहस्पतये० बृहस्पतिम्०
६ वायव्ये आरायां-ॐ अन्नात् परिस्रुतो० ॐ भू० भो शुक्र इहा० शुक्राय० शुक्रम्० ॥
७ उत्तरे आरायां-ॐ शन्नोदेवी० ॐ भू० शनैश्चर इहा० शनैश्चराय० शनैश्चरं०
८ ईशाने आरायां-ॐ कयानश्चित्र० ॐ भू० भो राहो इहा० राहवे० राहुम्० ॥
९ ईशान एव आरायां-ॐ केतुं कृण्वन्न० ॐ भू० भो केतो इहा० केतवे० केतुम्० ॥
१० पूर्वे आरायां सूर्याग्रे-ॐ त्रातारमिन्द्र० ॐ भू० भो इन्द्र इहा० इन्द्राय० इन्द्रम् ॥
११ आ-॥ सोमाग्रे-ॐ त्वन्नो अग्नेतव० ॐ भू० भो अग्ने इहा० अग्नये० अग्निम् ॥
१२ द-॥ भौमाग्रे-ॐ यमायत्वाऽङ्गिर० ॐ भू० भो यम इहा० यमाय० यमम्० ॥
१३ नै-॥ बुधाग्रे-ॐ असुन्वन्त० ॐ भू० भो निर्ऋते इहा० निर्ऋतये० निर्ऋतिम्० ॥
१४ प-॥ गुर्वग्रे-ॐ तत्त्वायामि० ॐ भू० भो वरुण इहा० वरुणाय० वरुणम्० ॥
१५ नि-॥ शुक्राग्रे-ॐ आनो नियुद्भिः० ॐ भू० भो वायो इहा० वायवे० वायुम्० ॥
१६ उ-॥ शन्यग्रे-ॐ वयꣳसोम० ॐ भू० भो सोम इहा० सोमाय० सोमम्० ॥
१७ ई-॥ राहुकेत्वग्रे-ॐ तमीशानं० ॐ भू० भो ईशान इहा० ईशानाय० ईशानं० ॥
१८ वायुसोममध्ये आरायां-ॐ सुगावो देवाः० ॐ भू० भो अष्टवसवः इहा० अष्टवसुभ्यो० अष्टवसून्० ॥
१९ सोमेशानान्तराले-ॐ रुद्राः सꣳसृज्य० ॐ भू० भो रुद्रा इहा० रुद्रेभ्यो० रुद्रान्० ॥
२० ईशानेन्द्रान्तराले ॐ यज्ञो देवानां० ॐ भू० भो आदित्या इहा० आदित्येभ्यो० आदित्यान्० ॥
२१ इन्द्राग्न्यन्तराले ॐ यावाङ्कशा० ॐ भू० भो अश्विनौ इहा० अश्विभ्यां० अश्विनौ० ॥
२२ अग्नियमान्तराले ॐ ओमासश्चर्ष० ॐ भू० भो विश्वेदेवा इहा० विश्वेभ्यो देवेभ्यो० विश्वान् देवान्० ॥
२३ तत्रैव-॥ ॐ उदीरतामवर० ॐ भू० भो पितर इहा० पितृभ्यो० पितॄन्० ॥
२४ यमनिर्ऋत्यन्तराले० ॥ ॐ अभित्यं देव ꣳ ० ॐ भू० भो यक्षा इहा० यक्षेभ्यो० यक्षान्० ॥
२५ निर्ऋतिवरुणान्तराले ॥ ॐ आयङ्गौः० अन्तश्चरति० ॐ भू० भो भूतनागा इहा० भूतनागेभ्यो भूतनागान्० ॥
२६ वरुणवाय्वन्तराले ॥ ॐ ऋताषाडृत० ॐ भू० भो गन्धर्वाप्सरस इहा० गन्धर्वाप्सरोभ्यो० गन्धर्वाप्सरसः० ॥
२७ सौम्याद्यष्टदलेषु उत्तरदले-ॐ यदक्रन्दः ॐ भू० भो स्कन्द इहा० स्कन्दाय० स्कन्दम्० ॥
२८ ईशानदले-ॐ अदितिर्द्यौ० ॐ भू० भो दक्षादिसप्तकानि इहा० दक्षादिसप्तकेभ्यो० दक्षादिसप्तकानि० ॥
२९ पूर्वदले-ॐ अम्बे अम्बिके० ॐ भू० भो दुर्गे इहा० दुर्गायै० दुर्गाम्० ॥
३० पूर्वदलएव-ॐ इदं विष्णु० ॐ भू० भो विष्णो इहा० विष्णवे० विष्णुम्० ॥

३१ आग्नेयदले-ॐ पितृभ्यः० भू० भो स्वधे इहा० स्वधायै० स्वधाम्० ॥

३२ दक्षिणदले-ॐ परंमृत्यो० ॐ भू० भो मृत्यो इहा० मृत्यवे० मृत्युम्० ॥

३३ नैर्ऋत्यदले-ॐ गणानान्त्वा० ॐ भू० भो गणपते इहा० गणपतये० गणपतिम्० ॥

३४ पश्चिमदले-ॐ शन्नो देवी० ॐ भू० भो आपः इहा० अद्भ्यो० अपः० ॥

३५ वायव्यदले-ॐ मरुतोयस्य० ॐ भू० भो मरुतः इहा० मरुद्भ्यो० मरुतः० ॥

३६ कर्णिकायां-ॐ तत्त्वायामि० ॐ भू० भो वरुण इहा० वरुणाय० वरुणम्० ॥

३७ उत्तरकेसरमूले-ॐ ब्रह्मजज्ञानं० ॐ भू० भो ब्रह्मन् इहा० ब्रह्मणे० ब्रह्माणम्० ॥

३८ ईशान्ये ॥ ॐ विष्णोरराटमसि० ॐ भू० भो विष्णो इहा० विष्णवे० विष्णुम्० ॥

३९ पूर्वे ॥ ॐ मानस्तोकेतनये० ॐ भू० भो रुद्र इहा० रुद्राय० रुद्रम्० ॥

४० आग्नेये ॥ ॐ श्रीश्चतेलक्ष्मीश्च० ॐ भू० भो लक्ष्मि इहा० लक्ष्म्यै० लक्ष्मीम्० ॥

४१ दक्षिणे ॥ ॐ अम्बे अम्बिके० ॐ भू० भो अम्बिके इहा० अम्बिकायै० अम्बिकाम्० ॥

४२ नैर्ऋत्ये ॥ ॐ तत्सवितु० ॐ भू० भो सावित्रि इहा० सावित्र्यै० सावित्रीम्० ॥

४३ पश्चिमे ॥ ॐ पञ्चनद्यः ॐ भू० भो नद्यः इहा० गङ्गादिनदीभ्यो० गङ्गादिनदीः० ॥

४४ वायव्ये ॥ ॐ इमम्मे व्वरुण० ॐ भू० भो सप्तसागरा इहा० सप्तसागरेभ्यो सप्तसागरान्० ॥

४५ ब्रह्मणःपादमूले ॐ भूतायत्वा० ॐ भू० भो भूतग्राम इहा० भूतग्रामाय० भूतग्रामम्० ॥

४६ कर्णिकोपरि-ॐ प्रपर्वतस्य० ॐ भू० भो मेरो इहा० मेरवे० मेरुम्० ॥

४७ बाह्यपरिधौ सोमादिसमीपे ॐ गणानान्त्वा० ॐ भू० भो गदे इहा० गदायै० गदाम्० ॥

४८ ईशानसमीपे-ॐ त्रिद्दशद्धाम० ॐ भू० भो त्रिशूल इहा० त्रिशूलाय० त्रिशूलम्० ॥

४९ इन्द्रसमीपे ॥ ॐ महाँ इन्द्रो वज्र० ॐ भू० भो वज्र इहा० वज्राय० वज्रम्० ॥

५० अग्नि ॥ ॐ वसुचमे० ॐ भो भू० भो शक्ते इहा० शक्तये० शक्तिम्० ॥

५१ यम-॥ ॐ इडएह्यदित० ॐ भू० भो दण्ड इहा० दण्डाय० दण्डम्० ॥

५२ निर्ऋति ॥ ॐ खड्गो वैश्वदेवः० ॐ भू० भो खड्ग इहा० खड्गाय० खड्गम्० ॥

५३ वरुण ॥ ॐ उदुत्तमं० ॐ भू० भो पाश इहा० पाशाय० पाशम्० ॥

५४ वायु ॥ ॐ अद्दशुश्च मे० ॐ भू० भो अङ्कुश इहा० अङ्कुशाय० अङ्कुशम्० ॥

५५ तद्वाह्य उत्तरे० ॐ आयङ्गौः० ॐ भू० भो गौतम इहा० गौतमाय० गौतमम्० ॥

५६ ईशाने-ॐ अयं दक्षिणा० (पृ-२५१) ॐ भू० भो भरद्वाज इहा० भरद्वाजाय० भरद्वाजम्० ॥

५७ पूर्वे-ॐ इदमुत्तरात्० (पृ-२५१) ॐ भू० भो विश्वामित्र इहा० विश्वामित्राय० विश्वामित्रम्० ॥

५८ आग्नेये-ॐ त्र्यायुषञ्जम० ॐ भू० कश्यप इहा० कश्यपाय० कश्यपम्० ॥

५९ दक्षिणे-ॐ अयं पश्चाद्० (पृ०२५१) ॐ भू० भो जमदग्ने इहा० जमदग्नये० जमदग्निम्० ॥

६० नैर्ऋत्ये-ॐ अयम्पुरो भुव० (पृ-२५१) ॐ भू० भो वसिष्ठ इहा० वसिष्ठय० वसिष्ठम्० ॥

६१ पश्चिमे-ॐ अत्र पितरो० ॐ भू० भो अत्रे इहा० अत्रये० अत्रिम्० ॥

Scanned by CamScanner

६२ वायव्यां-ॐ तम्पत्नीभि० ॐ भू० भो अरुन्धति इहा० अरुन्धत्यै० अरुन्धतीम्० ॥
६३ पूर्वे ॐ अदित्यै रास्ना० ॐ भू० भो ऐन्द्रि इहा० ऐन्द्र्यै० ऐन्द्रीम्० ॥
६४ आग्नेये ॐ यत्रबाणा० ॐ भू० भो कौमारि इहा० कौमार्यै० कोमारीम्० ॥
६५ दक्षिणे-ॐ इन्द्रायाहितूतुजान० ॐ भू० भो ब्राह्मि इहा० ब्राह्म्यै० ब्राह्मीम्० ॥
६६ नैर्ऋत्ये-ॐ आयङ्गौः० ॐ भू० भो वाराहि इहा० वाराह्यै० वाराहीम्० ॥
६७ पश्चिमे-ॐ अम्बे अम्बिके० ॐ भू० भो चामुण्डे इहा० चामुण्डायै० चामुण्डाम्० ॥
६८ वायव्ये-ॐ आप्यायस्व० ॐ भू० भो वैष्णवि इहा० वैष्णव्यै० वैष्णवीम्० ॥
६९ उत्तरे-ॐ याते रुद्र० ॐ भू० भो माहेश्वरि इहा० माहेश्वर्यै० माहेश्वरीम्० ॥
७० ईशाने-ॐ समख्ये देव्या० ॐ भू० भो वैनायकि इहा० वैनायक्यै० वैनायकीम्०

इति ७० सप्ततिसंख्याका देवता आवाह्य-ॐ मनोजूति० सूर्यादिवारुणमण्डलदेवताः सुप्रतिष्ठिता वरदा भवत । ॐ भू० सूर्यादिवारुणमण्डलदेवताभ्यो नमः इति षोडशोपचारैः पूजयेत् । ततः सदीपपायसबलिं-ॐ बलिद्रव्याय नमः-इति सम्पूज्य-ॐ सूर्याय नमः पायसबलिं समर्पयामि-इति प्रणवादिचतुर्थ्यन्तप्रतिदैवतनामभिः बलिं दद्यात् । अनेन बलिदानेन सूर्यादिवारुणमण्डलदेवताः प्रीयन्ताम् । जलमादाय-अनेन प्रतिष्ठाङ्गभूतवारुणमण्डलपूजनेन सूर्यादि वारुणमण्डलदेवताः प्रीयन्ताम् ॥ (मन्त्राः सर्वतोभद्रमण्डलप्रयोगादवतारणीयाः ॥ प्रतिनाम एकतन्त्रेण वा पायसबलिदानम् ।) स्थापितदेवताहोमावसरे-ॐ सूर्यायस्वाहा-इत्यादिनामभिः प्रतिमन्त्रमेकैकामाज्याहुतिं वा दश दश घृताक्ततिलाहुतीर्जुहुयात् ॥

## ३५ प्रधानदेवतास्थापनम् ।

(ऋग्वेदिनां प्रधानदेवतास्थापनानन्तरमग्निस्थापनम्, याजुषाणां पुनर्जपपूर्वक दशांशहवनरूपनवचण्डीशतचण्डीविष्णुयागादिजपप्रधानकर्मणि पूर्वं प्रधानदेवतास्थापनं ततो दिग्रक्षणाद्यग्निस्थापनान्तं होमप्रधान लघुरुद्रमहारुद्रप्रतिष्ठादिकर्मसु पूर्वं दिग्रक्षणाद्यग्निस्थापनान्तं कृत्वा ततः प्रधानदेवतास्थापनं कर्तव्यम् । पद्मनाभादिपद्धतिषु ग्रहयज्ञं प्रकृतिं मत्वा पूर्वं ग्रहस्थापनं ततः प्रधानदेवतास्थापनं निरुक्तम् । वस्तुतस्तु ग्रहयज्ञस्य प्रकृतित्वेऽपि प्रधानकर्माङ्गत्वात् पूर्वं प्रधानदेवतास्थापनं युक्ततमम् । केवलं रुद्रयजने विशेषवचनबलेन पूर्वं ग्रहस्थापनं भवति ।) पीठमध्ये ताम्रादिकलशं सपूर्णपात्रं निधाय क्षौमवस्त्रमावेष्ट्य प्रासादे स्थापयिष्यमाणदेवतानां प्रतिमासु पूगीफलेषु वा तास्ता देवता आवाहयेत् । जलमादाय-अद्य० तिथौ सकलजनपदश्रेयसे प्रारब्धसग्रहमखसप्रासाददिनत्रयसाध्य-अचलप्रतिष्ठाङ्गत्वेन प्रधानदेवतास्थापनं पूजनञ्चाहं करिष्ये । ताम्रपात्रे सुवर्णरजतान्यतरप्रतिमाः पूगीफलानि वा निधाय (शैवे-१ ॐ गणानान्त्वा० गणपतिं० २ ॐ अग्निंहृदयेना० अस्मेरुद्रा० हनुमन्तं० ३ ॐ आशुः शिशानो० नन्दीश्वरं० ४ ॐ यस्यकुर्मो० कूर्मं० ५ ॐ अम्बेऽअम्बिके० गौरीम्० ६ ॐ

Scanned by CamScanner

गौरीर्मिमाय० आयङ्गौः० पिण्डिकाम्० ७ ॐ नमः शम्भवाय० भगवन्तं शिवम्० ८ ॐ केतु कृण्वन्न० ध्वजम्० ९ ॐ आजिघ्रकलशं० शिखरम्० इत्यावाहयेत् । वैष्णवे-केवले विष्णौ-ॐ इदं विष्णु-विष्णुम्-श्रीश्चते० पिण्डकाम्० गरुडश्चेत् ॐ सुपर्णोऽसि० गरुत्मन्तम्० । लक्ष्मीनारायणयोःराधाकृष्णयोश्च-इदं विष्णु० नारायणं कृष्णं वा, श्रीश्चतेलक्ष्मीश्च० लक्ष्मी राधा वा० श्रीणामुदारो- पिण्डिकाम्० । लक्ष्मणरामसीतासु-इदं विष्णु० पुत्रमिव पितरा० रामं, नमोऽस्तुसर्पेभ्यो० लक्ष्मणम्० घृतेन सीता० सीताम्-श्रीश्चते० पिण्डिकाम्-दासहनुमाँश्चेत्-अग्निꣳहृदयेना० हनुमन्तम् । सत्यारुक्मिणी विठ्ठलप्रतिमासु-भूरसि० सत्याम्० श्रीश्चते० रुक्मिणीम्० इदं विष्णु० विठ्ठलम्० श्रीणामुदारो० पिण्डिकाम् गरुडश्चेत्-सुपर्णोऽसि० गरुडम्० । केवलदुर्गायां-अम्बे अम्बिके० श्रीश्चते० पावकानः सरस्वती० जातवेदसे० तामग्निवर्णां० एतदन्यतमेन दुर्गां लक्ष्मीं वा० गौरीर्मिमाय० श्रीणामुदारो० पिण्डिकायां० सिंहश्चेत्-खड्गो वैश्वदेवः० सिंहम्० । दत्तात्रेये-यद्दत्तं० ब्रह्मजज्ञानं० इदंविष्णुः० त्र्यम्बकं० दत्तात्रेयम्-श्रीश्चते० पिण्डिकाम्० । केवलं गणेशे-गणानान्त्वा० गणपतिम, श्रीश्चते० पिण्डिकाम् । केवलहनुमतिअस्मे रुद्रा० अग्निꣳहृदयेन० हनुमन्तम्० श्रीश्चते० पिण्डिकाम् । केवलभैरवे-यो भूताना० भैरवम्० गौरीर्मिमाय० पिण्डिकाम्० । अन्यासु देवतासु तत्तन्मन्त्रोहः । सर्वत्र एवं सपरिवारप्रधानदेवतापूजनेन सपरिवारा अमुकदेवताः प्रीयन्ताम् ॥

## ३६ ग्रहमण्डलदेवता-शेषादिमनुष्यान्तदेवतास्थापनम् ।

(याज्ञवल्क्यदिनकरमते केवलनवग्रहाः, मात्स्यपरिशिष्टमते नवग्रहाः, नवाधिदेवताः नवप्रत्यधिदेवताः, पञ्च सप्त वा क्रतुसाद्गुण्यदेवताः, अष्टौ दश वा दिक्पालदेवताः, तत्र दिक्पालेषु ऋग्वेदिनां प्रथमोऽनन्तः द्वितीयो ब्रह्मा, याजुषाषां पुनः प्रथमो ब्रह्मा ततोऽनन्तः, एवं ४०, ४२, ४४ वा देवता ग्रहस्थापने भवन्ति । प्रयोगदर्पणवासिष्ठीहवनपद्धत्यादिमतेन ग्रहमण्डले निर्दिष्टस्थानेषु शेषादिमनुष्यान्त देवतानामावाहनं कृताकृतम् । ग्रहयज्ञहविर्भिः सह हविर्वैषम्यात् । अयुतलक्षकोटिहोमेषु तु शेषादि देवतानामावश्यकत्वम् । सर्वपद्धतिकृद्भिर्ग्रहमण्डलदेवतावाहनान्ते मण्डलैशाने कलशं संस्थाप्य तत्र वरुणावाहनम्, साङ्गरुद्रजपश्चोक्तः, वासिष्ठहवनपद्धतौ असंख्यातेति मन्त्रेण रुद्रो रुद्रघटाम्भसि, इतिवचनेन रुद्रावाहनं प्राप्नोति, कलशदैवतत्वाद्वरुणमावाह्य रुद्रावाहने न कश्चिद्विरोधः ॥)

पीठसमीप उपविश्य-यज० सग्रहमखसप्रासादामुकदेवताचलप्रतिष्ठाङ्गभूतग्रहमण्डलदेवतावाहनं पूजनञ्च करिष्ये । सूर्यादि-अनतान्तदेवतानामावाहनं तत्तन्मन्त्रैः कृत्वा ईशानकलशे ॐ तत्त्वायामि० इति वरुणमावाहयेत् । ॐ सूर्यादिग्रहमण्डलदेवताभ्यो नमः इति षोडशोपचारैः पूजयेत् । ईशानकलशे साङ्गरुद्रजपं रौद्राध्यायं नमस्ते० इति षोडशर्चं वा कश्चिदृत्विक् कलशं स्पृष्ट्वा जपेत् । शेषादिमनुष्यान्तदेवतानामावाहनम्-तत्रतत्राक्षतपुञ्जान् कृत्वाऽवाहयेत् १ सूर्यपूर्वे-१ शेषाय० शेषम्० । २ सोमाग्रे-वासुकये० वासुकिम्० ३ भौमाग्रे-तक्षकाय० तक्षकम्० ४ बुधोत्तरे ४ कर्कोटकाय०

कर्कोटकम्० । ५ बृहस्पत्यग्रे-पद्माय० पद्मम्० । ६ शुक्रोत्तरे महापद्माय० महापद्मम्० ७ शनिपश्चिमे शङ्खपालाय० शङ्खपालम्० । ८ राहुपुरतः-कम्बलाय० कम्बलम्० । ९ केतुपुरतः- कुलिकाय० कुलिकं० ।

मण्डलपूर्वे उदक् संस्थेषु पञ्चसु अक्षतपुञ्जेषु क्रमेण-१० अश्विन्यादिसप्तनक्षत्रेभ्यो० अश्विन्यादिसप्तनक्षत्राणि० । ११ विष्कुम्भादिसप्तयोगेभ्यो० विष्कुम्भादिसप्तयोगान्० । १२ बवबालवकरणाभ्यां० बवबालवकरणे० । १३ सप्तद्वीपेभ्यो० सप्तद्वीपान्० १४ ऋग्वेदाय० ऋग्वेदम्० ॥

मण्डलदक्षिणे पञ्चसु अक्षतपुञ्जेषु प्राक्संस्थं-१५ पुष्यादिसप्तनक्षत्रेभ्यो० पुष्यादिसप्तनक्षत्राणि० । १६ धृत्यादिसप्तयोगेभ्यो० धृत्यादिसप्तयोगान्० । १७ कौलवतैतिलकरणांभ्यां० कौलवतैतिलकरणे० १८ सप्तसागरेभ्यो० सप्तसागरान्० । १९ यजुर्वेदाय यजुर्वेद० ।

मण्डलपश्चिमे पञ्चस्वक्षतपुञ्जेषु उदक्संस्थम्-२० स्वात्यादिसप्तनक्षत्रेभ्यो० स्वात्यादिसप्त नक्षत्राणि० २१ वज्रादिसप्तयोगेभ्यो० वज्रादिसप्तयोगान्० । २२ गरवणिजकरणाभ्यां० गरवणिजकरणे० । २३ सप्तपातालेभ्यो० सप्तपातालानि० २४ सामवेदाय० सामवेदं० ।

मण्डलोत्तरे पञ्चस्वक्षतपुञ्जेषु प्राक् संस्थम्-२५ अभिजिदादिसप्तनक्षत्रेभ्यो० अभिजिदादिसप्तनक्षत्राणि० । २६ साध्यादिषड्योगेभ्यो० साध्यादिषड्योगान्० २७ विष्टिकरणाय० विष्टिकरणम्० । २८ भूरादिसप्तलोकेभ्यो० भूरादिसप्तलोकान्० २९ अथर्ववेदाय० अथर्ववेदम्० ।

वायव्यां पञ्चसु अक्षतपुञ्जेषु-३० ध्रुवाय० ध्रुवं० । ३१ सप्तर्षिभ्यो० सप्तर्षीन्० ३१ गङ्गादिसरिद्भ्यो० गङ्गादिसरितः० ३३ सप्तकुलाचलेभ्यो० सप्तकुलाचलान्० ३४ अष्टवसुभ्यो० अष्टवसून्० ॥ ईशान्याम् ३५ एकादशरुद्रेभ्यो० एकादशरुद्रान्० । ३६ द्वादशादित्येभ्यो० द्वादशादित्यान्० । ३७ मरुद्भ्यो० मरुतः० ३८ षोडशमातृभ्यो० षोडशमातॄः० ३९ षड्ऋतुभ्यो० षड्ऋतून्० ॥ आग्नेय्यां पञ्चस्वक्षतपुञ्जेषु-४० द्वादशमासेभ्यो० द्वादशमासान्० । ४१ उदगयनदक्षिणायनाभ्यां० उदगयन दक्षिणायने० । ४२ पञ्चदशतिथिभ्यो० पञ्चदशतिथीन्० । ४३ षष्टिसंवत्सरेभ्यो० षष्टिसंवत्सरान्० ४४ सुपर्णेभ्यो० सुपर्णान्० ॥ नैर्ऋत्याम्-४५ नागेभ्यो० नागान्० । ४६ सर्पेभ्यो० सर्पान् । ४७ यक्षेभ्यो० यक्षान्० ॥ ४८ गन्धर्वेभ्यो० गन्धर्वान्० । ४९ सिद्धेभ्यो० सिद्धान्० । ५० विद्याधरेभ्यो० विद्याधरान्० । पूर्वे० ५१ अप्सरोभ्यो० अप्सरसः० दक्षिणे० ५२ राक्षसेभ्यो० राक्षसान्० । पश्चिमे-५३ भूतेभ्यो० भूतान्० । उत्तरे-५४ मनुष्येभ्यो० मनुष्यान्० ॥ एवं चतुःपञ्चाशद्देवता आवाह्य ॐ मनोजूति० शेषादिमनुष्यान्तदेवताः सुप्रतिष्ठिता वरदा भवत । ततः केवलग्रहमण्डलसत्त्वे-ॐ सूर्यादिग्रहमण्डल देवताभ्यो नमः- (शेषादिमनुष्यान्तसहितपक्षे) ॐ शेषादिमनुष्यान्तदेवतासहित-सूर्यादिग्रहमण्डल देवताभ्यो नमः- इति षोडशोपचारैः पूजयेत् । जलमादाय-अनेन पूजनेन (शेषादिमनुष्यान्तदेवता सहिताः) सूर्यादिग्रहमण्डलदेवताः प्रीयन्ताम् । वासिष्ठीहवनपद्धतौ

Scanned by CamScanner

ग्रहस्थानमुखाकारवर्णगोत्र देशवस्त्रगन्ध पुष्पधूपदीपनैवेद्यफलादिकं ग्रहाणां पार्थक्येन निरुक्तम् तत्ततोऽनुसन्धेयम् । )

## ३७ योगिनीमण्डलम् ।

(तन्त्रादिषु काशीखण्डे पुराणादिषु च यज्ञकालिकविघ्नविध्वंसनार्थ योगिनीपूजनं विहितम् । एतच्च कृताकृतम्, कुत्रचिदुक्तत्वात् कुत्रचिदनुक्तत्वाच्च । आग्नेय्यां हस्तमात्रे योगिनीपीठेश्वेतवस्त्रे पञ्चवर्णैस्तण्डुलैरेकत्रिपञ्चसप्तनवैकादशत्रयोदशपञ्चदशत्रिकोणात्मिकाः परस्परसंलग्ना अष्टपङ्क्तयो विधेयाः । अथवाऽष्टाष्टत्रिकोणानामष्टपङ्क्तयः प्राक्संस्थाः कार्याः । तत्परितोऽष्ट दिक्षु अष्ट देवताः अग्रभागे च महाकालीमहालक्ष्मीमहासरस्वतीतिदेवतात्रयम् । एवं ७५ पञ्च सप्ततिदेवता भवन्ति । योगिनीभैरवपूजनयोर्देवीरुद्रयागयोरावश्यकत्वम् । देवीरुद्रभिन्नयागेषु भैरवस्थाने क्षेत्रपालस्थापनमिति याज्ञिकसम्प्रदायः । पदधतिकृद्भिर्योगिनीपूजने १ रुद्रकल्पद्रुमोक्ता गजाननादयः ६४ । २ शान्तिसाराद्युक्ता जयादयः । ३ आग्नेयोक्ता-अक्षोभ्यादयः । ४ प्रतिष्ठातिलकोक्ता अघोरादयः । ५ दिव्ययोगिन्या-दयोऽन्यत्रोक्ता । ६ प्राचीनपद्धत्युक्ता विश्वदुर्गादयः एवं षड्भेदाः योगिनीस्थापने । यासामावाहनं तासां होमः स्थापितदेवताहोमकाले कर्तव्य इति सावधानैर्भाव्यम् ।)

जलमादाय अद्य-तिथौ यज्ञकालिकसमस्तविघ्नविध्वंसनार्थं प्रतिष्ठाङ्गत्वेन योगिनीस्थापनं पूजनञ्चाहं करिष्ये । हस्ते अक्षतान् गृहीत्वा-ॐ योगे॑ योगे त॒वस्त॑रं॒ वाजे॑वाजे हवामहे । सखा॑य॒ऽइन्द्र॑मू॒तये॑ ॥१९-१४॥ पुरतः पूगीफलेषु ॐ ऐं महाकाल्यैनमः महाकालीम्० । २ ह्रीं महालक्ष्म्यै० महालक्ष्मीम्० । ३ क्लीं महासरस्वत्यै० महासरस्वतीम्० । पुरतस्त्र्यस्रेषु क्रमेण आदौप्रणवः सर्वत्रअन्ते नमः पदम् ।

| | | |
|---|---|---|
| १ विश्वदुर्गायै० विश्वदुर्गाम्० | २८ भुवनेश्वर्यै० भुवनेश्वरीम्० | ५५ गगनायै० गगनाम्० |
| २ उद्योतिन्यै० उद्योतिनीम्० | २९ खड्गपाण्यै० खड्गपाणिम्० | ५६ मेघवाहनायै० मेघवाहनाम्० |
| ३ मालाधर्यै० मालाधरीम्० | ३० शूलिन्यै० शूलिनीम्० | ५७ मेघघोषायै० मेघघोषाम्० |
| ४ महामायायै० महामायाम्० | ३१ दण्डिकायै० दण्डिकाम्० | ५८ नारसिंह्यै० नारसिंहीम्० |
| ५ मायावत्यै० मायावतीम्० | ३२ अम्बिकायै अम्बिकाम्० | ५९ कालिन्द्यै० कालिन्दीम्० |
| ६ शुभायै० शुभाम्० | ३३ शूलेश्वर्यै० शूलेश्वरीम्० | ६० श्रीधर्यै० श्रीधरीम्० |
| ७ यशस्विन्यै० यशस्विनीम्० | ३४ बाणवत्यै० बाणवतीम्० | ६१ तैजस्यै० तैजसीम्० |
| ८ त्रिनेत्रायै० त्रिनेत्राम्० | ३५ धनुर्धरायै० धनुर्धराम्० | ६२ श्यामायै० श्यामाम्० |
| ९ लोलजिह्वायै० लोलजिह्वाम्० | ३६ महोल्लासायै० महोल्लासाम्० | ६३ मातङ्ग्यै० मातङ्गीम्० |
| १० शङ्खिन्यै० शङ्खिनीम्० | ३७ विशालाक्ष्यै० विशालाक्षीम्० | ६४ नरवाहनायै० नरवाहनाम्० |

Scanned by CamScanner

११ यमघण्टायै० यमघण्टाम्०
१२ कालिकायै० कालिकाम्०
१३ चर्चिकायै० चर्चिकाम्०
१४ यक्षिण्यै० यक्षिणीम्०
पृ. २६०
पृ. २५९ तः
१५ सरस्वत्यै० सरस्वतीम्०
१६ चण्डिकायै० चण्डिकाम्०
१७ चित्रघण्टायै० चित्रघण्टाम्०
१८ सुगन्धायै० सुगन्धाम्०
१९ कामाक्ष्यै० कामाक्षीम्०
२० भद्रकाल्यै० भद्रकालीम्०
२१ परायै० पराम्०
२२ कान्ताक्ष्यै० कान्ताक्षीम्०
२३ कोटराक्ष्यै० कोटराक्षीम्०
२४ नीलाङ्कायै० नीलाङ्काम्०
२५ सर्वमङ्गलायै० सर्वमङ्गलाम्०
२६ ललितायै० ललिताम्०
२७ त्वरितायै० त्वरिताम्०
पृ-२५९ तः

३८ त्रिपुरायै० त्रिपुराम्०
३९ भगमालिन्यै० भगमालिनीम्०
४० दीर्घकेश्यै० दीर्घकेशीम्०
४१ घोरघोणायै० घोरघोणाम्०
पृ. २६०
पृ. २५९ तः
४२ वाराह्यै० वाराहीम्०
४३ महोदर्यै० महोदरीम्०
४४ कामेश्वर्यै० कामेश्वरीम्०
४५ गुह्येश्वर्यै० गुह्येश्वरीम्०
४६ भूतनाथायै० भूतनाथाम्०
४७ महारवायै० महारवाम्०
४८ ज्योतिष्मत्यै० ज्योतिष्मतीम्०
४९ कृत्तिवाससे० कृत्तिवाससम्०
५० मुण्डिन्यै० मुण्डिनीम्०
५१ शववाहिन्यै० शववाहिनीम्०
५२ शिवाङ्कायै० शिवाङ्काम्०
५२ लिङ्गहस्तायै० लिङ्गहस्ताम्०
५४ भगवक्त्रायै भगवक्त्राम्०
पृ-२५९ तः

मण्डलाद्वहिः
१ पू-इन्द्राण्यै० इन्द्राणीम्०
२ आ दुर्गायै० दुर्गाम्०
३ द जयायै० जयाम्०
पृ. २६०
पृ. २५९ तः
४ नै-विजयायै० विजयाम्०
५ प-अजितायै० अजिताम्०
६ वा-विश्वमङ्गलायै० विश्वमङ्गलाम्०
७ उ-भद्ररुपिण्यै० भद्ररूपिणीम्०
८ ई-भुवनेश्वर्यै० भुवनेश्वरीम्०
९ म-राजराजेश्वर्यै० राजराजेश्वरीम्०

मध्ये कलशं निधाय तदुपरि मूर्तो समष्टिरूपेण पूजयेत् ।

ॐ मनोजूति० ॐ महाकाल्यादिसहितविश्वदुर्गादियोगिन्यः सुप्रतिष्ठिता वरदा भवत ।

ॐ भू० महाकाल्यादिसहितविश्वदुर्गादियोगिनीभ्यो नम इति षोडशोपचारैः सम्पूज्य प्रार्थयेत्-ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले वा, पाताले वा तले वा सलिलपवनयोर्यत्र कुत्र स्थिता वा । क्षेत्रे पोठोपपीठादिषु च कृतपदा धूपदीपादिकेन, प्रीता देव्यः सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः ॥ अनेन पूजनेन महाकाल्यादिसहितविश्वदुर्गादियोगिन्यः प्रीयन्ताम् । पायसबलिद्रव्याय नम इति सम्पूज्य-ॐ महाकाल्यादिसहितविश्वदुर्गादि देवताभ्यो नमः पायसबलिं समर्पयामि । अनेन बलिदानेन योगिन्यः प्रीयन्ताम् ।

Scanned by CamScanner

(गजाननाद्यन्यप्रकाराः देवताप्रकरणतो बोध्याः) होमकाल एकैकामाज्याहुतिं दश दश तिलाहुतीर्वा जुहुयात्)

## ३८ भैरवस्थापनम्।

(देवीयजने भैरवाणाम् रुद्रयजने भैरवक्षेत्रपालान्यतरेषाम् अन्ययजनेषु क्षेत्रपालानां स्थापनम्। मण्डपे वायव्ये कृष्णश्वेतान्यतरवस्त्रे पञ्चवर्णतण्डुलैः स्थापनम्। चतुःषष्टिभैरवाः एकपञ्चाशत् क्षेत्रपाला वा। श्रेक्षपालेषु कुत्रचित् संख्याभेदः)

श्वेतकृष्णान्यतरवस्त्रे पञ्चवर्णैस्तण्डुलैरष्टदलं कृत्वा प्रतिदलमष्टाष्टाक्षतपुञ्जान् वा अष्टाना मष्ट पङ्क्तीः कृत्वा चतुःषष्टिभैरवान् मध्ये कलशे मूर्तौ समष्टिरूपेण आवाह्य पूजयेत्-जलमादाय-अद्य-तिथौ यज्ञकालिकविघ्नविनाशनार्थं प्रतिष्ठाङ्गभूतं चतुःषष्टिभैरवाणां स्थापनं पूजनञ्च करिष्ये।

हस्तेऽक्षतान् गृहीत्वा ॐ षो भूतानामधिपतिर्य्यस्मिँल्लोका अधिश्रिताः। य ईशेमहतो महाँस्तेनंगृहृणा मित्वामहम्मयिंगृ हृणामित्वामहम् ॥२०-२२॥ ॐ नम उग्राय च भीमाय च-

| | पृ. २६२ तः | पृ. २६२ तः |
|---|---|---|
| १ श्रीमद्भैरवाय० | २३ निर्भयभैरवाय० | ४५ विष्णुभैरवाय० |
| २ शम्भुभैरवाय० | २४ विगीतभैरवाय० | ४६ बटुकनाथभैरवाय |
| ३ नीलकण्ठभैरवाय० | २५ प्रेतभैरवाय० | ४७ भूतनाथ भैरवाय० |
| ४ विशालभैरवाय० | २६ लोकपालभैरवाय० | ४८ वेतालभैरवाय० |
| ५ मार्तण्डभैरवाय० | २७ गदाधरभैरवाय० | ४९ त्रिनेत्रभैरवाय० |
| ६ मनुप्रभभैरवाय० | २८ वज्रहस्तभैरवाय० | ५० त्रिपुरान्तकभैरवाय० |
| ७ स्वच्छन्दभैरवाय० | २९ महाकालभैरवाय० | ५१ वरदभैरवाय० |
| ८ असिताङ्गभैरवाय० | ३० प्रचण्डभैरवाय० | ५२ पर्वतवासभैरवाय० |
| ९ खेचरभैरवाय० | ३१ अजेयभैरवाय० | ५३ शशिशकलभूषणभैरवाय० |
| १० संहारभैरवाय० | ३२ अन्तकभैरवाय० | ५४ सर्वभूतहृदयभैरवाय० |
| ११ विरूपभैरवाय० | ३३ भ्रामकभैरवाय० | ५५ घोरसायकभैरवाय० |
| १२ विरूपाक्षभैरवाय० | ३४ संहारभैरवाय० | ५६ भयङ्करभैरवाय० |
| १३ नानारूपधरभैरवाय० | ३५ कुलपालभैरवाय० | ५७ भुक्तिमुक्तिप्रदभैरवाय० |
| १४ वराहभैरवाय० | ३६ चण्डपालभैरवाय० | ५८ कालाग्निभैरवाय० |
| १५ रुरुभैरवाय० | ३७ प्रजापालभैरवाय० | ५९ महारुद्रभैरवाय० |
| १६ कुन्दवर्णभैरवाय० | ३८ रक्ताङ्गभैरवाय० | ६० भयानकभैरवाय० |

Scanned by CamScanner

पृ. २६२ तः

| | | |
|---|---|---|
| १७ सुगात्रभैरवाय० | ३९ वेगवीक्षणभैरवाय० | ६१ दक्षिणमुखभैरवाय० |
| १८ उन्मत्तभैरवाय० | ४० अरूपभैरवाय० | ६२ भीषणभैरवाय० |
| १९ मेधनादभैरवाय० | ४१ धरापालभैरवाय० | ६३ क्रोधभैरवाय० |
| २० मनोजवभैरवाय० | ४२ कुण्डलभैरवाय० | ६४ सुखसम्पत्तिदायकभैरवाय नमः |
| पृ. २६२ | पृ. २६२ | |
| पृ. २६१ तः | पृ. २६१ तः | |
| २१ क्षेत्रपालभैरवाय० | ४३ मन्त्रनाथभैरवाय | |
| २२ विषापहारभैरवाय | ४४ रुद्रपितामहभैरवाय० (पृ. २६१ तः) | |

ॐ मनोजूति० श्रीमद्भैरवादिचतुःषष्टिभैरवाः सुप्रतिष्ठिता वरदा भवत । मध्ये कलशे मूर्तौ समष्टिरूपेण-ॐ श्रीमद भैरवादिचतुःषष्टि भैरवेभ्यो नमः इति षोडशोपचारैः सम्पूज्य प्रार्थयेत्-ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरुकुरु बटुकाय ह्रीं ॐ । करकलितकपालःकुण्डली दण्डपाणि, स्तरुण तिमिरनीलव्यालयज्ञोपवीती । क्रतुसमयसपर्याविघ्न विच्छेदहेतुर्जयति बटुकनाथः सिद्धिदः साधकानाम् ॥ ॐ श्रीमद्भैरवादि० नमस्कारान् नम० । पायसबलिं निधाय-बलिद्रव्याय नमः-इति सम्पूज्य ॐ श्रीमद् भैरवादिचतुःषष्टिभैरवेभ्यो नमः पायसबलिं समर्पयामि । अनेन पूजनेन श्रीमद् भैरवादिचतुःषष्टिभैरवाः प्रीयन्ताम् ॥ होमकाले एकैकाज्याहुतिर्वा दशदश तिलाहुतयः ॥

## ३९ क्षेत्रपालस्थापनम् ।

(काशीखण्डे क्षेत्रपालपूजनमुक्तम् । वायव्यां पीठे श्वेतवस्त्रे पञ्चवर्णैस्तण्डुलैरष्टदलं पद्मं विधाय तत्र प्रतिकोष्ठं षट्षडक्षतपुञ्जान् मध्ये च त्रीन् पुञ्जान् विधाय पूजयेत् । मध्ये कलशे मूर्तौक्षेत्रपालं समष्टिरूपेणावाहयेत्) ॥ जलमादाय० अद्य० तिथौ यज्ञकालिक विघ्नोत्सादनार्थं प्रतिष्ठाङ्गत्वेन क्षेत्रपालानां स्थापनं पूजनञ्च करिष्ये-हस्तेऽक्षतान् गृहीत्वा-ॐ नहिस्पशमविदन्नन्य मस्माद् वैश्वानरात् पुरएतारमग्नेः । एमेनमवृधन्नमृताऽअमर्त्यं व्वैश्वानरं क्षैत्रजित्याय देवाः ॥३३-६०॥ ॐ नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमः ॥१६-१८॥

पूर्वकोष्ठे

| | | | | |
|---|---|---|---|---|
| १ अजराय० | ५ उक्षाय० | ८ बटुकाय० | १२ एकदंष्ट्राय० | १५ बन्धनाय० |
| २ व्यापकाय० | ६ कूष्माण्डाय | ९ विमुक्ताय० | दक्षिणकोष्ठे० | १६ दिव्यकाय० |
| ३ इन्द्रचौराय | आग्नेयकोष्ठे | १० लिप्तकायाय० | १३ ऐरावताय० | १७ कम्बलाय० |
| ४ इन्द्रमूर्त्तये | ७ वरुणाय. | ११ लीलालोकाय० | १४ ओषधिघ्नाय० | १८ भीषणाय० |
| नैर्ऋत्यकोष्ठे | पश्चिमकोष्ठे | वायव्यकोष्ठे | उत्तरकोष्ठे | ईशानकोष्ठे |
| १९ गवयाय० | २५ जटालाय० | ३१ डामराय० | ३७ महाबलाय० | ४३ मेघवाहनाय० |

| | | | | |
|---|---|---|---|---|
| २० घण्टाय० | २६ क्रतवे० | ३२ ढुण्ढिकर्णाय० | ३८ फेत्काराय० | ४४ तीक्ष्णोष्ठाय० |
| २१ व्यालाय० | २७ घण्टेश्वराय० | ३३ स्थविराय० | ३९ चीकराय० | ४५ अनलाय० |
| २२ अणवे० | २८ विटङ्काय | ३४ दन्तुराय० | ४० सिंहाय० | ४६ शुकतुण्डाय० |
| २३ चन्द्रवारुणाय० | २९ मणिमानाय० | ३५ धनदाय० | ४१ मृगाय० | ४७ सुधालापाय० |
| २४ घटाटोपाय० | ३० गणबन्धवे० | ३६ नागकर्णाय० | ४२ यक्षाय० | ४८ बर्बरकाय० |

मध्ये-४९ पवनाय० ५० पावनाय० मूर्तौ-ॐ नहिस्पश० क्षेत्रपालाय नमः क्षेत्रपालं० ॐ मनोजूति० अजरादिक्षेत्रपालाः सुप्रतिष्ठिता वरदा भवत । ॐअजरादिक्षेत्रपालेभ्यो नमः- इति षोडशोपचारैः सम्पूज्य प्रार्थयेत्-ॐ यं यं यं यक्षरूपं दशदिशिवदनं भूमिकम्पायमानं, सं सं संहारमूर्तिं शिरसि धृतजटाशेखरं चन्द्रविम्बम् । दं दं दं दीर्घकायं धृतनरवपुषम्, ऊर्ध्वरेखाकरालम्, पं पं पं पापनाशं प्रणमत सततं भैरवं क्षेत्रपालम् ॥ इति नत्वा बलिं दद्यात्-बलिद्रव्याय नमः संपूज्य-ॐ अजरादिक्षेत्रपालेभ्यो नमः पायसबलिं समर्पयामि । अनेन पूजनेन अजरादिक्षेत्रपालाः प्रीयन्ताम् ।

## ४० कुटीरहोमः १ (शान्तिहोमः)

(जयपुरादिनगरेभ्यः क्रीत्वा स्वग्राममानीतानां प्रतिमानां प्रतिमानिर्माणस्थलं गत्वा कुटीर होमकरणस्य सर्वथाऽसम्भवाद् मण्डपाद् बहिःस्थण्डिलं विधाय तत्र जलाधिवासः कुटीरहोमश्च ग्राम नगरप्रादक्षिण्येन मण्डपमानीतासु प्रतिमासु प्रथमेऽहनि यथासमयं कार्यः । जीर्णप्रतिमोद्धारोऽपि चिकीर्षितश्चेत् प्रथमेऽहनि नान्दीश्राद्धोत्तरं कार्यः अस्यैव शान्तिहोम इत्यपरा संज्ञा)

यजमानो मण्डपाद बहिरुपविश्य-आचम्य प्राणानायम्य-द्यौः शान्तिः० सुमुखश्चेत्यादि । संकल्पः- अद्य० तिथौ प्रतिमानिर्माणे अशुचिदेश-अशुचिकाल अशुचिस्पर्शादिजन्यदोषपरिहारार्थं प्राणि वधादिदोषोपशमनार्थं प्रतिमापिण्डिकादिषु न्यूनातिरिक्तदोषशान्तये सकलदुर्निमित्तोपशमनार्थं प्रतिष्ठाङ्गत्वेन कुटीरहोमं करिष्ये । तदङ्गभूतं स्थण्डिले पञ्चभूसंस्कारपूर्वकमग्निस्थापनं करिष्ये । पञ्चभूसंस्काराः । वरदनामाग्निस्थापनं-वरदनामाग्नये नमः । इति सम्पूज्य-दक्षिणतो ब्रह्मासनादि-आघाराज्यभागान्तं कृत्वा । अग्निं संपूज्य । त्यागसंकल्पः- इदं सम्पादितं हविस्तेन या या यक्ष्यमाणा देवताः ताभ्यः ताभ्यः मया परित्यक्तम् । न मम । यथादैवतमस्तु । आज्येन घृताक्ततिलैर्वा होमः) १ प्रासादे स्थापयिष्यमाणदेवताः तत्तत्पिण्डिकाश्चोद्दिश्य-स्थाप्यदेवमन्त्रेण शतद्वयं २०० प्रतिदैवत माहुतीर्दद्यात् । २ ॐ परं मृत्योऽअनुपरेहिपन्थाँ यस्तेऽअन्य इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजा ७ रीरिषो मोत वीरान् स्वाहा-इदं मृत्यवे न मम । १०८ आहुतयः २८ वा । ३ ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः स्वाहा-इदमघोराय नमम-१०८ आहुतयः २८ वा । (याते रुद्र शिवा तनू० चाकशीहि) ४ ॐ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् स्वाहा-इदं रुद्राय नमम । १०८

Scanned by CamScanner

आहुतयः २८ वा । ९ ॐ यद्ग्रामेयदरण्ये यत् सभायां यदिन्द्रिये । यदेनश्चकृमाव्व यमिदन्तदवयजामहे स्वाहा इदमेनसे न मम ॥ १०८ आहुतयः २८ वा ॥

तत आज्यहोमे प्रथमं नवाहुतयः ततः स्विष्टकृत । तिलहोमे प्रथमं तिलाज्याभ्यां स्विष्टकृत् तत आज्येन नवाहुतयः । मूर्धानं० पूर्णाहुतिः । संस्त्रवप्राशनादि प्रणीताविमो कान्तंकृत्वा । अनेन कुटीरहोम (शान्तिहोम) करणेन प्रतिमानिर्माणे अशुचिदेशकाल स्पर्शादिजन्यदोषप्राणिवधादिदोषप्रतिमा-पिण्डिकादिन्यूनाधिक्यदोष निवृत्तिपूर्वकं सकलदुर्निर्मित्तदुरितो पशमनमस्तु ॥ इति शान्तिहोमः (कुटीरहोमः) ॥

## ४१ जलाधिवासः ।

(अयं जलाधिवासविधिः प्रतिष्ठापद्धतिकल्पलतोक्तो वासुदेवीकृता निरूपितः । प्रतिमासन्धा नछिद्रापकसशर्कर पाषाणादिपरीक्षापूर्वकमर्चाशुध्यर्थे विहितः । केचिदत्र घृताधिवासं कुर्वन्ति किन्तु प्रयोगे 'मूर्तिं घृतेनाभ्यज्य जलधारां कुर्याद्' इत्युक्तत्वाद् घृतेनाभ्यञ्जनमात्रं विहितम् न घृते निक्षेपः । शिवलिङ्गादिकं घृतपात्रे निक्षिपन्ति घृतग्रहणहेतुना याज्ञिकाः, जलधारां न कुर्वन्ति । घृतनिक्षेपणनिष्कासनादिना चैक्कण्यवशाद् मूर्त्तीनां वर्णलोपः, स्खलनादिना प्रतिमाभङ्गसम्भवश्च । एवं 'काकिणीलोभेन गजो हतः इतिवद् घृतग्रहणलोभं पुरस्कृत्य घृताधिवासं ये कुर्वन्ति, ते वन्ध्या एव ।)

साचार्यो यजमानो वेदनिनादछत्रचामरादिरथादियानसहितः शिल्पिशालां सन्निधापितप्रतिमागृहं वा गत्वा तत्र प्रतिमा वस्त्रादिना विभूष्य गन्धपुष्पमालादिना संपूज्य शिल्पिनः प्रतिमानिर्मातॄंश्च वस्त्रगन्धादिना संतोष्य कुद्दालादिशिल्पिशस्त्राणि च हरिद्रादिना भूषयित्वा ॐ व्विश्वकर्म्मन् हविषावर्द्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् । तस्मै व्विशः समनमन्त पूर्व्वीरयमुग्रो व्विहव्यो यथासत् ॥८-४६॥ इति विश्वकर्माणं नत्वा याने प्रतिमामारोप्य ग्रामनगरादिप्रादक्षिण्येन जलाधिवासमण्डपमानयेत् । शाकुन्तसूक्तं पठेत्-

ॐ कनिक्रदज्जनुषंप्रब्रुवाण ईयर्ति वाचमरितेव नावम् । सुमङ्गलश्च शकुने भवासि मा त्वा काचिदभिभा विश्व्या विदत् ॥१॥ मा त्वा श्येन उद्वधीन्मा सुपर्णो मा त्वा । विददिषुमान् वीरो अस्ता । पित्र्यामनु प्रदिशं कनिक्रदत्सुमङ्गलोभद्रवादीवदेह ॥२॥ अवक्रन्द दक्षिणतो गृहाणां सुमङ्गलो भद्रवादी शकुन्ते । मा नः स्तेन ईशतमाघशंसो बृहद्वदेम विदथे सुवीराः ॥३॥ ऋ० मं-२० सू० ४२॥ प्रदक्षिणिवदभिगृणन्ति कारवो वयो वदन्तऋतुथा शकुन्तयः । उभे वाचो वदति सामगा इव गायत्रं च त्रैष्टुभञ्चानु राजति ॥१॥ उदगातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि । वृषैव वाजी शिशुमतीरपीत्या सर्वतोनः शकुने भद्रमावद विश्वतोनः शकुने पुण्यमावद ॥२॥ आ वदंस्त्वं शकुने भद्रमावद तूष्णीमासीनः सुमतिं चिकिद्धिनः । तदुत्पतन् वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः ॥३॥ ऋ० मं० २ सू०-४३॥

Scanned by CamScanner

ॐ आनोभद्राः० इति भद्रसूक्तं पठेत् ॥ आनीतासुमूर्तिषु ताः ॐ अनाधृष्टा० इति नीराज्य जलाधिवासमण्डपे स्वसम्मुखं प्राङ्मुखीः स्थापयेत् ।

साचार्यो यजमानः - आचम्य । प्राणायामः । शान्तिपाठः । जलमादाय-अद्य० पू० तिथौ-प्रतिष्ठाङ्गत्वेन प्रतिमाशुद्ध्यर्थं जलाधिवासाख्यं कर्म करिष्ये । ॐ गणानान्त्वा० गणपतये नमः सर्वोपचारार्थंनमस्करोमि । प्रैषात्मकपुण्याहवाचनं कृत्वा । सर्षपानादाय-ॐ रक्षोहणं ०४ वा कृणुष्वपाजः० शत्रून्-५ अपसर्पन्तु० देवयागंकरोम्यहम्-इति सर्षपान् विकीर्य वामपादेन त्रिवारं भूमि ताडयित्वा उदकमुपस्पृशेत् । मन्त्रैः पञ्चगव्यं सम्पाद्य मण्डपं प्रतिमा ब्राह्मणाँश्च प्रोक्षेत् ॐ आपोहिष्ठा० ३ ॥ सर्वेषां पवित्रताऽस्तु ।

अग्न्युत्तारणम्-अद्य० आसां प्रतिमानां (अस्याः प्रतिमायाः) अङ्गप्रत्यङ्गसन्धि समुत्पन्नकुद्दालकादि-टङ्कादि-आतपाग्निसंयोगजनितदोषपरिहारार्थं घनादिदोषपरिहारार्थं अग्न्युत्तारणमहं करिष्ये । मूर्त्ती घृतेनाभ्यज्योपरि जलधारां कुर्यात् । आग्वैदिकमग्निपदरहितमग्निपदसहितश्चाग्निसूक्तं पठेत् ॥ अग्निपदरहितम्-ॐ सप्तिंवाजं भरं ददाति वीरं श्रुत्यं कर्मनिष्ठाम् । रोदसी विचरत् समञ्जन्नारीं वीर कुक्षिंपुरन्धिम् ॥१॥ अप्नसः समिदस्तु भद्रा महीरोदसी आविवेश । एकश्चोदयत् समत्सु वृत्राणि दयते पुरूणि ॥२॥ हत्यं जरतः कर्णमवाद्भ्यो निरदहज्जरूथम् । अत्रिघर्मउरुष्यदन्तर्नृ मेघंप्रजया सृजत्सम् ॥३॥ दाद्रविणं वीरपेशा ऋषिं यः सहस्रा सनोति । दिविहव्यमाततानधामानि बिभृतापुरुत्रा ॥४॥ उक्थैर्ऋषयो विह्वयन्तेनरो यामनिबाधितासः । वयोअन्तरिक्षेपतन्ता सहस्रा परियातिगोनाम् ॥५॥ विश ईळते मानुषीर्या मनुष्यो नहुषो विजाताः । गान्धर्वीपन्था मृतस्य गव्यूतिर्घृतमानिषत्ता ॥६॥ ब्रह्मत्रभवस्ततक्षुर्महामवोचामासुवृक्तिम् । प्रावजरितारं यविष्ठमहिद्रविणमायजस्व ॥७॥

अग्निपदसहितम्-ॐ अग्निःसप्तिंवाजंभरददात्यग्निवीरश्रुत्यंकर्मनिष्ठाम् । अग्नी रोदसी विचरत् समजन्नग्निर्नारींवीरकुक्षिंपुरन्धिम् ॥१॥ अग्नेरप्नसः समिदस्तु भद्राग्निर्मही रोदसी आविवेश । अग्निरेकं चोदयत्समत्स्वग्निर्वृत्राणि दयते पुरूणि ॥२॥ अग्निर्हत्यं जरतः कर्णमावाग्निरद्भ्यो निरदहज्जरूथम् । अग्निरत्रिं घर्म उरुष्यदन्तरग्निर्नृमेघं प्रजया सृजत्सम् ॥३॥ अग्निर्दाद्द्रविणंवीरपेशा अग्निर्ऋषिंयःसहस्रासनोति । अग्निर्दिवि हव्यमाततानाग्नेर्धामानि बिभृता पुरुत्रा ॥४॥ अग्निमुक्थैर्ऋषयो विह्वयन्तेग्निर्नरो यामनिबाधितासः । अग्निर्वयो अन्तरिक्षे पतन्तोग्निः सहस्रा परियातिगोनाम् ॥५॥ अग्निर्विशईळते मानुषीर्याअग्निं मनुषो नहुषो विजाताः । अग्निर्गान्धर्वीपथ्यामृतस्याग्नेर्गव्यूतिर्घृत मानिषत्ता ॥६॥ अग्नये ब्रह्मऋभवस्ततक्षुरग्निमहामवोचामासुवृक्तिम् । अग्ने प्रावजरितारं यविष्ठाग्ने महि द्रविणमायजस्व ॥७॥

शुक्लयजुर्वेदे-ॐ अश्मन्नूर्जं० तृषाणो अजरः=इति १ ०शमन्त्रानुवाक वा समुद्रस्य त्वा वकयाग्ने० शिवोभव ४ तः १५ मन्त्रान् अनुवाकद्वयं वा पठेत् ॥

Scanned by CamScanner

ॐ अश्मन्नूर्ज्जम्पर्व्वते शिश्रियाणामद्भ्यऽओषधीभ्यो व्वनस्पतिभ्योऽअधि सम्भृतम्पयः । तान्नऽइषमूर्ज्जन्धत्त मरुतः सद्दरराणाऽअश्मँस्तेक्षुन्मयि त ऊर्ग्यन्द्विष्मस्तन्ते शुगृच्छतु ॥१७-१॥ इमामेऽअग्नऽइष्टका धेनवः सन्त्वेका च दशच दशच शतञ्च शतञ्च सहस्रञ्च सहस्रञ्चायुतञ्चायुतञ्च नियुतञ्च नियुतञ्च प्रयुतञ्चार्ब्बु दञ्चन्यर्ब्बु दञ्च समुद्रश्च मद्ध्यञ्चान्तश्च परार्द्धश्चैता मेऽअग्नऽइष्टका धेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥२॥ ऋतवस्त्थऽऋतावृधऽऋतुष्ठास्त्थऽऋतावृधः । घृतश्चुतोमधुश्चुतो बिराजो नाम कामदुघाऽअक्षीयमाणाः ॥३॥ समुद्रस्य त्वावकयाग्ने परिव्ययामसि । पावको अस्मभ्यः शिवो भव ॥४॥ हिमस्य त्वा जरायुणाग्ने परिव्ययामसि । पावकोऽअस्मभ्यःशिवो भव ॥५॥ उपज्मन्नुपवेतसेवतरनदीष्वा । अग्ने पित्तमपामसि मण्डूकिताभिरागहिसेमन्नो यज्ञम्पावकवर्ण्णः शिवङ्कृधि ॥६॥ अपामिदन्न्ययनः समुद्रस्य निवेशनम् । अन्याँस्तेऽअस्मत्तपन्तु हेतयः पावकोऽअस्मभ्यः शिवो भव ॥७॥ अग्ने पावक रोचिषा मन्द्रया देवजिह्वया । आदेवान्वक्षि यक्षिच ॥८॥ सनः पावकदीदिवोग्ने देवाँ २ इहावह । उपयज्ञ हविश्चनः ॥९॥ पावकया यश्चितयन्त्या कृपाक्षामन्नुरुचऽउषसो न भानुना । तूर्वन्नयामन्ने तशस्य नूरणऽआयो घृणेनततृषाणोऽअजरः ॥१०॥ (१०-१) ॥ नमस्ते हरसे शोचिषे नमस्तेऽअस्त्वर्चिषे । अन्याँस्तेऽअस्मत्तपन्तु हेतयःपावकोऽअस्मभ्यःशिवो भव ॥११॥ नृषदे व्वेडप्सुषदे व्वेड्बर्हिषदेव्वेड्वनसदे व्वेट्स्वर्विदे व्वेट् ॥१२॥ ये देवा देवानां यज्ञिया यज्ञियानाᳪ संवत्सरीणमुपभागमासते । अहुतादो हविषो यज्ञेऽअस्मिन् स्वयम्पिबन्तु मधुनो घृतस्य ॥१३॥ ये देवा देवेष्वधिदेवत्वमायन्ये ब्रह्मणः पुर एतारोऽअस्य । येभ्यो नऽऋते पवते धाम किञ्चन न ते दिवो न पृथिव्याऽअधिस्नुषु ॥१४॥ प्राणदाऽअपानदा व्यानदा वर्चोदा व्वरिवोदाः । अन्याँस्तेऽअस्मत्तपन्तु हेतयःपावकोऽअस्मभ्यःशिवो भव ॥१५॥ (५-२) ॥

ततो देवं प्रार्थयेत् - ॐ त्वयि संपूजयामीशं नारायणमनामयम् । रहितः सर्वदोषैस्त्वं ऋद्धियुक्तः सदा भव ॥१॥ इति प्रार्थ्य प्रतिमां कुशैः संमार्ज्य (ॐ प्रत्युष्टःरक्षः०) मध्वाज्याभ्यङ्गेन सतूर्यनिनादं देवस्य व्रणभङ्गः कार्यः । ततो मृदा गोमयेन गोमूत्रेण भस्मना क्षीरेण च पृथक् पृथक् जलान्तरितेन स्नापयित्वा गन्धादिभिरभ्यर्च्य सितपुष्पैः संपूज्य सुवर्णपात्रे मधुसर्पिषी संस्थाप्य सुवर्णशलाकया मधुसर्पिर्भ्यां नेत्रे आपूर्य मधूच्छिष्टेन (मीण) नेत्रावरणञ्च कृत्वा पश्चात् कलशोदकेन देवं संस्नाप्य यजमानाय दापयेत् । ततो यजमानः प्रतिमां गृहीत्वा-भो गुरो, प्रतिमां सावयवां निरीक्षस्व-इत्यनुज्ञाप्य, आचार्यः-(ॐ मित्रस्यत्वाचक्षुषा प्रतीक्षे) इति सावयवां प्रतिमां निरीक्षेत । यजमानः प्रतिमां मूलमन्त्रेण षोडशोपचारैः पञ्चोपचारैर्वा संपूज्य कौतुकसूत्रबन्धनं कुर्यात् ।

## कौतुकसूत्रबन्धनम् ।

आचार्यः - (सूर्याचन्द्रमसौ यावद्) देवरक्षार्थं कौतुकबन्धनं करिष्ये-इति संकल्प्य उदकपूर्णं कुम्भं निधाय सितोर्णादिसूत्रनिर्मितं वितस्तिमात्रं पञ्चाङ्गुलं अष्टाङ्गुलं वा हरिद्राक्तं कौतुकसूत्रं सर्वौषधिसहितं कुम्भोदकेन सूत्रं वक्ष्यमाणैर्मन्त्रैरभिषिञ्चेत् ।

ॐ अग्निमीळे० १ इषेत्वा० २ अग्न आयाहि० ३ शन्नोदेवी० ४ राजन्तमध्वराणां० ५ सनः पितेव सूनवे० ६ आपोहिष्ठा० ७-८-९ स्वादिष्ठया० १० रक्षोहा विश्व० १ कृणुष्वपाजः० १२ तः १६ सहस्रशीर्षा० १७ तः ३२ विष्णोर्नुकं० ३३ इरावती० ३४ हिरण्यवर्णां० ३५ तः ४९ यज्जाग्रतो० ५० तः ५५ नतद्रक्षाꣳसि० ५६ द्रविणोदा० ५७ तः ६०, एभ्यो यथासम्भवं मन्त्रान् प्रपठ्य सूत्रं गन्धेनानुलिप्य देवस्य दक्षिणहस्ते ॐ यदाबध्नन्० इति मन्त्रेण बध्नीयात् ।

ततो जलाधिवासं कुर्यात्-धान्यराशौ द्रोणिं कटाहं वा निधाय तदभावे जलधारार्थं शिक्यादि संपाद्य द्रोण्यादिकं गन्धोदकेनापूर्य तन्मध्ये अष्टाविंशतिदर्भमयं कूर्चं निधाय ॐ यदत्र संस्थितं० इति सर्षपैर्भूतशुद्धिं विधाय तस्मिन् कूर्चे हरिं हरं वा भावयित्वा चक्रमुद्रां प्रदर्श्य जलद्रोणितो दक्षिणदिशि धान्यपुञ्जे सवस्त्रं कलशं करकं च विधिना स्थापयेत् । तत्र कलशे-ॐ ब्रह्मणे नमः, करके ॐ सुदर्शनाय नमः इत्यावाह्य पूजयेत् ।

यजमानः-अद्य० तिथौ प्रतिष्ठाङ्गत्वेन वरुणप्रीतये जलमातृजीवमातृक्षेत्रपालवरुणपूजनं करिष्ये । जले अक्षतैरावाहयेत् - १ मत्स्यै० २ कच्छप्यै० ३ कूर्म्यै० ४ वाराह्यै० ५ दर्दुर्यै० ६ शिशुमार्यै० ७ ईश्वर्यै० ॥ अथ जीवमातृरक्षतपुञ्जेषु कटाहभित्तौ वा - १ मत्स्यै० २ हृद्यायै० ३ गोधायै० ४ मकर्यै० ५ डुण्डुभ्यै० ६ दर्दुर्यै० ७ जलूयै० । जले-चतुःषष्टियोगिनीभ्यो नमः । वायव्याम्-कुङ्कुमेन क्षेत्रपालं विलिख्य-ॐ क्षेत्रपालाय नमः । इत्यावाह्य सम्पूज्य बलिदानं दध्योदनेन-ॐ क्षेत्रपालाय नमः बलिं समर्पयामि । ततो जले-ॐ अद्भ्यो नमः । ॐ सप्तसागरेभ्यो नमः । ॐ मानसादिसरोभ्यो ममः । ॐ पुष्करादितीर्थेभ्यो नमः । ॐ गङ्गादिनदीभ्यो नमः । इति जले गन्धाक्षतान् क्षिपेत् । ततो जले ॐ वरुणाय नमः इति सम्पूज्य जले तत्तन्मन्त्रेण पञ्चामृतं क्षिपेत् । ततो जलद्रोण्यादेरुपरि सर्षपान् विकीर्य सम्भवेऽष्टकलशान् पात्रपरितः संस्थाप्य तत्र इन्द्रादीनावाह्य अग्रतः सुवर्चसं दीपं दद्यात् । जलान्तः शमीपीठं स्थापयित्वा तदुपरि वस्त्रमास्तीर्य प्रतिमां वस्त्रेणाच्छाद्यकुशैरावेष्ट्य वेदगीततूर्यनिनादैः प्राङ्मुखीं उदङ्मुखीं वा जलेऽधिवासयेत् । (अस्य कमलाधिवास इत्यागमप्रसिद्धिः । अयमेव सरोजसंघातनामकाधिवासः) जलद्रोण्यभावे सन्ततधारां कुर्यात् । जलाधिवासं सप्तपञ्चत्र्येकरात्राद्यन्यतमपक्षेण सद्यो यामं गोदोहनमात्रं वा कुर्यात् । ततो यथासम्भवं सूक्तानि पठेयुः-ॐ सहस्रशीर्षा० १६ । पञ्चाक्षररुद्रजपः । अघोरमन्त्रपाठः । अतो देवा० इदं विष्णु० त्रीणि पदा० विष्णोः कर्म्माणि) तद्विष्णोः- तद्विप्रासो० विष्णोर्नुकं० रक्षोहणं० रक्षोहणो वो० रक्षसां भागोऽसि० रक्षोहा० । अन्यप्रतिमासु तत्तत्सूक्तपाठः । आचार्यादिभ्यो दक्षिणां दद्यात् । इति जलाधिवासः । एकाध्वरपक्षे कृताकृतोऽयम् । अनेन जलाधिवासकर्मणा आसां प्रतिमानां सकलदोष निवृत्तिपूर्वकं अर्चाशुद्धिपूर्वकं भगवान् प्रीयताम् ॥ इति प्रतिष्ठापद्धतिकल्पलतानुसारी प्रतिष्ठावासुदेव्युक्तो जलाधिवासः ।

Scanned by CamScanner

## ४२ होमतन्त्रम् ।

यजमानः कुण्डाचार्यब्रह्माणश्च मण्डपमागत्य अग्न्यायतनात् पश्चिमतः-उपयमनान् कुशानादाय सोपयमनकुशं सव्यहस्तं हृदये निधाय । तिष्ठन् घृताक्तास्तिस्रः समिधः अग्नौ तूर्ष्णीं अभ्याधाय । प्रोक्षण्युदकशेषेण सपवित्र हस्तेन अग्नेः ईशानकोणादारभ्य प्रदक्षिणवत् पर्युक्षणम् । इतरथावृत्तिः । पवित्रयोः प्रणीतासु निधानम् । उपविश्य दक्षिणं जान्वाच्य ब्रह्मणा कुशेन प्रकोष्ठे अन्वारब्धः आज्येन आधारावाज्यभागौ च प्रतिकुण्डं जुहुयात्-समिद्धतमेऽग्नौ प्रजापतिं मनसा ध्यायन् वायवीमारभ्य आग्नेयीपर्यन्तम् । ॐ प्रजापतये स्वाहा-इदं प्रजापतये न मम-इति प्रोक्षण्यां संस्रवप्रक्षेपः । २ नैर्ऋतीमारभ्यैशानीपर्यन्तम् । ॐ इन्द्राय स्वाहा-इदमिन्द्राय न मम (संस्रवः)। ततः मध्ये समिद्धतमेऽग्नौ । ३ ॐ अग्नये स्वाहा- इदमग्नये न मम (संस्रवः) । ४ ॐ सोमाय स्वाहा-इदं सोमाय न मम (संस्रवः) यजमानोऽग्निं पूजयेत्-ॐ बलवर्धननामाग्नये नमः इति पञ्चोपचारैः पूजयेत् । (वायव्यां बहिर्नैवेद्यम्) अनेन पूजनेन वालवर्धननामाग्निः प्रीयताम् । ततः ॐ ब्रह्मजज्ञानं० अणिमाद्यष्टशक्तिसहित ब्रह्मणे नमः इति ब्रह्माणं पूजयेत् । (पुराणवचनादाचाराच्च) ॐ गणानान्त्वा० (आज्येन) गर्भधं स्वाहा-इदं गणपतये न मम (संस्रवः) । ततः त्यागसंकल्पः (अनेकर्त्विक्साध्ये कर्मणि प्रत्याहुति त्यागस्य कर्तुमशक्यत्वात्) केवलो यजमानः-जलमादाय-इदं सम्पादितं समिच्चरुतिलाज्यादि हविर्द्रव्यं तेन या या यक्ष्यमाणा देवताः ताभ्यः ताभ्यः मया परित्यक्तम्, न मम, यथादैवतमस्तु-जलत्मुसृजेत् ।

## ४३ ग्रहहोमव्यवस्था ।

ग्रहहोमे-क्रमेण १ अर्क-पलाश-खदिर-अपामार्ग-पिप्पल-उदुम्बर-शमी-दूर्वाः कुशाश्च समिधः, अधिदेवताप्रत्यधिदेवतानामपि तत्तद्ग्रहविहिताः समिधः, गणेशाद्यनन्तान्त सप्तदशदेवतानां पलाशोदुम्बरान्यतरसमिधः, समिधस्त्रिमधुप्लुताः दधिमधुघृताक्ताः, समिधामभावे घृताक्ता यवाः, २ चरुः ३ तिलाः श्वेताः कृष्णा धूसरा वा ४ आज्यं गव्यम्, तदभावे माहिषं तदभावे तिलतैलं सार्षपतैल जार्तिलान्यतमतैलम् ।

एककुण्डे विभागप्रश्नाभावः । पञ्चकुण्ड्यां १०८-२८-८ पक्षे विभाग सम्भवः । नवकुण्डयां १००८-१०८-२८ क्रमस्वीकारे विभागसम्भवः । अन्यथाऽचार्यकुण्डे एव होमः । विभागसम्भवेऽपि कैश्चित् पद्धतिकृद्भि राचार्यकुण्ड एव होमः स्वीकृतः । समाध्युत्सर्गे गणेशादिसप्तक्रतुसंरक्षक देवतापेक्षया इन्द्रादिदशदिक्पालानामाहुतिसङ्ख्याऽर्धा स्वीकृता । चतुर्भि र्द्रव्यैः प्रत्येकं निर्दिष्ट संख्यया होमः । विभागविचारः शास्त्रार्थप्रकरणे निरूपितः ।

Scanned by CamScanner

## ४४ ग्रहहोमः ।

(ततः समिदाज्यचरुतिलद्रव्यैः प्रत्येकं प्रतिद्रव्येण ग्रहान्-१००८ अष्टोत्तर सहस्रसंख्यया अधिप्रत्यधिदेवताः प्रत्येकं १०८ अष्टोत्तरशतसंख्यया विनायकादिदिक्पालान्तान् सप्तदशदेवान् प्रत्येकं २८ अष्टाविंशतिसंख्यया तत्तन्मन्त्रैर्जुहुयात् । २ द्वितीयः पक्षः - नवग्रहान् प्रत्येकं १०८ संख्यया, अधिप्रत्यधिदेवताः २८ संख्यया विनायकादीन् सप्तदशदेवान्-८ संख्यया जुहुयात् । ३ तृतीयः पक्षः-ग्रहान् २८ संख्यया, अधिप्रत्यधिदेवताः ८ संख्यया, सप्तदशदेवान्-४ संख्यया जुहुयात् । ४ चतुर्थः पक्षः-ग्रहान्-८ संख्यया, अधिप्रत्यधिदेवताः ४ संख्यया, सप्तदशदेवान् २ संख्यया जुहुयात् । विवाहोपनयनादिकर्मसु चतुर्थः पक्षो बाहुल्येन आद्रियते) । एवं ग्रहहोमं कृत्वा समिदतिरिक्तमवशिष्टं हविराहुतिद्वयपर्याप्तं स्रुचि निक्षिप्य-दक्षिणं जान्वाच्य उपयमनकुशान् सव्यहस्तेन हृदये निधाय ब्रह्मणाऽन्वारब्धो यजमानः ॐ अग्नये स्विष्टकृते स्वाहा-इदमग्नये स्विष्टकृते नमम इति प्रतिदिनं स्विष्टकृद्धोमपक्षस्वीकारे जुहुयात् । समाप्तिदिने स्विष्टकृदधोमपक्षस्वीकार आहुतिद्वयपर्यान्तं हविर्घृतप्लुतं कृत्वा पात्रान्तरे संरक्षेत् । उपयमनकुशान्-संमार्जनकुशान् पवित्रद्वयञ्चसुरक्षितं रक्षेत् । प्रतिदिनं द्वितीयतृतीयादिसमाप्तिदिनान्तं नूतनहविषां संस्कारं स्रुक्स्रुवप्रतपनसंमार्जनाभ्युक्षणपुनः प्रतपनानि, आज्याद्यधिश्रयणोद्वासनोत्पवना-वेक्षणापद्रव्यनिरसनानि कुर्याद् । अवशिष्टहविषः स्विष्टकृद्, अथवा घृतप्लुतं कृत्वा पात्रे प्रक्षिपेत् ॥ इति ग्रहहोमः ॥

## ४५ सायन्तनपूजनम् ।

यजमानः सं०-आरब्धप्रतिष्ठाकर्मणोऽङ्गत्वेन प्रथमेऽहनि स्थापितदेवतानां सायन्तनं पञ्चोपचारैः पूजनं करिष्ये । तत्तन्मन्त्रैः स्थापनक्रमेण देवतानां प्रार्थनाक्षमापनान्तं कर्म कुर्यात्-स्थापनक्रमश्च गणेशमातृका-वास्तुमण्डल-अग्नि-मण्डलदेवताप्रधानदेवता-ग्रह-योगिनी-क्षेत्रपालभैरवान्य तरपूजनम् । यज० प्रथमदिनकर्मपरिपूर्तये आचार्यब्रह्मादिपूजनपूर्वकं भूयसीं दक्षिणां दास्ये । सं० यथाशक्ति ब्राह्मणसुवासिनी वटुककुमारिकातिथिदीनानाथान् भोजयिष्ये । तिलकाशीर्वादादि कुर्यात् ।

संकल्पः-समस्तभक्तजनग्रामजनदेशजनकल्याणाय सूर्याचन्द्रमसौ यावत् प्रतिमासु देवकलासान्निध्यहेतवे अद्य प्रथमे दिने स्वयं प्रतिनिधिद्वारा ब्राह्मणद्वारा च प्रतिष्ठाङ्गभूतं यत् कर्म सम्पादितं, तत् कालक्रियाभक्तिश्रद्धाहीनं ब्राह्मणवचनादिष्टदेवताप्रसादाच्च सर्वं परिपूर्णमस्त्विति भवन्तो ब्रुवन्तु । ब्राह्मणाः अस्तु परिपूर्णम् । यस्यस्मृत्या० विष्णवे नमो० ३ । समाप्तिं यावदग्निं रक्षेत् ।

इति प्रथमदिन कृत्यम् ।

Scanned by CamScanner

## ४६ अथ द्वितीयदिनकृत्यम् ।

तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । चतुर्वेद शान्तिपाठः । नमस्काराः सुमुखश्चेत्यादि । यज० जलमादाय-विष्णु० समस्त ग्रामजन देशजन प्रतिनिधिभूतः यजमानोऽहम्, मम० सर्वेषां जनानां च श्रेयसे प्रारब्ध सग्रहमखसप्रासाददिनत्रयसाध्याचलप्रतिष्ठाङ्गभूतं द्वितीयदिनसाध्यं कर्म स्वयं प्रतिनिधिद्वारा ब्राह्मणद्वारा च करिष्ये । पुनर्जलमादाय-तदङ्गभूतं स्थापितदेवतापूजनं ब्राह्मणपूजनं जलयात्रां निक्षेपान्तप्रासादवास्तुशान्तिं अर्चाशुद्ध्यर्थं स्नपनविधिं मूर्तिमूर्तिपति लोकपालावाहनं शय्याधिवासं तत्त्वन्यासहोमं शान्तिकपौष्टिक होम मूर्तिमूर्त्यधिपति लोकपालहोम स्थाप्यदेवताहोम-व्याहृति होमान्, तत्त्वन्यासान्, प्रासादस्नपनाधिवासनं पिण्डिकाधिवासनं सायन्तनपूजनान्तं कर्म करिष्ये । तत्रादौ आसनविधि दिग्रक्षणं कलशार्चनं दीपपूजनं (सूर्यपूजनं) चाहं करिष्ये ।

आसनबिध्यादि ब्राह्मणपूजनान्तं कर्म कृत्वा ।

## ४७ जलयात्राप्रयोगः ।

(कर्मार्थजलाहरणरूपोऽयं विधिर्विष्णवर्चनकल्पलतारुद्रकल्पद्रुम प्रतिष्ठातिलकादिषु प्रोक्तः । सति सम्भवे प्रथमेऽह्नि द्वितीयेऽह्नि प्रातर्वा जलयात्राविधिरेकत्र सम्पादनीयः, अन्यत्र नूतनप्रासादसत्त्वे निक्षेपान्तप्रासादवास्तुशान्तिरूपो विधिः स्वयं प्रतिनिधिद्वारा वा सम्पादनीयः । प्राचीनपद्धतिषु वाहुल्येनास्य विधेरदर्शनात् कृताकृतत्वम् ।

साचार्यर्त्विग् यजमानः पूजासम्भारान् अष्टौ नव वा कलशानादाय द्विजकुमारिका सुवासिनी सहितः शान्तिसूक्तादिकं पठन् मङ्गलगीतवाद्यघोषं कुर्वञ्जलाशयं वापीकूपतडागसरिदादिकं प्रति गच्छेत् ।

जलाशयसमीपे तीरे शुचौ देशे शुभ्रवस्त्रे तण्डुलैः सप्तसप्ताक्षतपुञ्जानां चतस्रः पङ्क्तीः) दिक्षु च दिक्पालानामक्षतपुञ्जान् कृत्वा तेषु पूगीफलानि निधाय प्राङ्मुख उदङ्मुखो वा यजमानः सपत्नीक उपविश्य । तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् शान्तिपाठादि । जलमादाय-अद्य-पू० तिथौ प्रतिष्ठाङ्गत्वेन करिष्यमाण प्रतिमा प्रासादस्नपनाद्यर्थं जलाहरणरूपं जलयात्राकर्म करिष्ये । तत्रादौ गणेशस्मरणं ॐ प्राच्यै दिशे स्वाहा० इति सर्षपविकरणं कुर्यात् । वामपाद पार्ष्णिना त्रिवारं भूमिं ताडयित्वा । उदकोपस्पर्शः । श्वेतवस्त्रे गोधूमैस्तण्डुलैर्वाऽष्टदलं पद्मं कृत्वा-तत्र पूगीफलं निधाय-ॐ भूरसीति मन्त्रेण-ॐ सपरिवारायै भूम्यै नमः-इति भूमिमाबाह्य षोडशोपचारैः पञ्चोपचारैर्वा भूमिं पूजयेत् । इति भूमिपूजा ।

द्विजकुमारिकासुवासिनीभिः स्वयञ्चानीतान् कलशान् शुद्धजलेनापूर्य तेषु सर्वौषधी पञ्चपल्लवदूर्वामृत्तिकापूगीफलहिरण्यपञ्चरत्नादिकं प्रक्षिप्य तेषु नारिकेलानि निधाय मण्डलपरितः स्थापयित्वा

Scanned by CamScanner

महीद्यौ रित्यादि पूर्णपात्रनिधानान्तं कृत्वा वरुणं आवाहयेत्-ॐ तत्त्वायामि ब्रह्मणा व्वन्दमानस्तदाऽशास्ते यजमानो हविर्ब्भिः । अहेडमानो व्वरुणेह बोद्ध्युरुशꣳसमान आयुः प्रमोषीः ॥१८-४९॥ ॐ इमम्मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सच ता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयाऽऽ र्जीकीये शृणुह्या सुषोमया ॥ऋ० १०-७५-५॥ ॐ ये तीर्त्थानि प्रचरन्ति सृका हस्ता निषङ्गिणः । तेषाꣳ सहस्रयोजनेवधन्वानि तन्मसि ॥१६-६१॥ ॐ प्रपद्ये वरुणं देवं यादसां पतिमीश्वरम् । याचितं देहि मे तीर्थं सर्वपापापनुत्तये ॥ गङ्गे त्वं सर्वतीर्थानामाश्रयासि यतस्ततः । देवपूजाभिषेकार्थं पापं मे हि विनाशय । सरस्वति नमस्तुभ्यं महेश्वरि हरिप्रिये । देवपूजाभिषेकार्थं पापं मे हि व्यपोहय ॥ ॐ भू० एषु कलशेषु साङ्गं सपरिवारं सतीर्थं वरुणमावाहयामि स्थापयामि । मनोजूति० इति प्रतिष्ठाप्य पञ्चोपचारैः पूजयेत् । ततः प्रार्थना-कलशस्य मुखे० देवदानवसंवादेनमो नमस्ते० ॐ कुम्भो व्वनिष्ठुर्ज्जनिता शचीभिर्य्यस्मिन्नग्रे योन्यांगर्भोऽअन्तः । प्लाशिर्व्यक्तः शतधारऽउत्सो दुहे न कुम्भी स्वधाम्पितृभ्यः ॥१९-८७॥ ॐ शङ्खस्फटिकवर्णाभ श्वेतहाराम्बरावृत । पाशहस्त महाबाहो दयाङ्कुरु दयानिधे ॥ ॐ भू० साङ्गसपरिवारसतीर्थवरुणाय नमः नमस्करोमि ॥ अनया पूजया साङ्गः सपरिवारः सतीर्थः वरुणः प्रीयताम् ॥ इति वरुणपूजा ।

ततो जलमातृका जीवमातृकास्थलमातृकासप्तसागरानक्षतपुञ्जेषु पूगीफलेषु वा क्रमेण पङ्क्तिषु उदक्संस्थमावाहयेत् । जलमातृकाः-अक्षतान् गृहीत्वा १ ॐ भू० मत्स्यैनमः मत्सीम् आवाहयामि । २ कूर्म्यै० कूर्मीम्० । ३ वाराह्यै० वाराहीम्० । ४ दर्दुर्यै० दर्दुरीम्० । ५ मकर्यै० मकरीम्० । ६ जलूक्यै० जलूकीम्० । ७ तन्तुक्यै० तन्तुकीम्० । द्वितीयपङ्क्तौ क्रमेण जीवमातृकाः-१ कौमार्यै० कौमारीम्० । २ धनदायै० धनदाम्० । ३ नन्दायै० नन्दाम्० । ४ विमलायै० विमलाम्० । ५ मङ्गलायै० मङ्गलाम्० । ६ चलायै० चलाम्० । ७ पद्मायै० पद्मामम्० । तृतीयपङ्क्तौ स्थानमातृकाः क्रमेण-१ ऊर्म्यै० ऊर्मिम्० । २ लक्ष्म्यै० लक्ष्मीम्० । ३ महामायायै० महामायाम्० । ४ पानदेव्यै० पानदेवीम्० । ५ वारुण्यै० वारुणीम्० । ६ निर्मलायै० निर्मलाम्० । ७ गोधायै० गोधाम्० । ततश्चतुर्थपङ्क्तौ सप्तसागरान् क्रमेण-१ क्षारोदाय० क्षारोदम्० । २ क्षीरोदाय० क्षीरोदम्० । ३ इक्षुसमुद्राय० इक्षुसमुद्रम्० । ४ दधिसमुद्राय० दधिसमुद्रम्० । ५ गुडोदाय० गुडोदम्० । ६ घृतसमुद्राय० घृतसमुद्रम्० । ७ स्वादुसमुद्राय० स्वादुसमुद्रम्० । ॐ समुद्रादूर्म्मि० इत्यावाह्य ततो दश दिक्षु दिक्पालान् क्रमेण-पूर्वे-१ ॐ इन्द्राय० इन्द्रम्० । आ० २ अग्नये० अग्निम्० । द० यमाय० यमम्० । नै० ४ निर्ऋतये० निर्ऋतिम्० । प० ५ वरुणाय० वरुणम्० । वा० ६ वायवे० वायुम्० । स० ७ सोमाय० सोमम्० । ई० ईशानाय० ईशानम्० । ऊर्ध्वायां-९ ब्रह्मणे० ब्रह्माण्० । अधः-१० अनन्ताय० अनन्तम्० । ॐ मनोजूति० इति प्रतिष्ठाप्य ॐ मत्स्याद्यावाहितदेवताभ्यो नमः-इति सम्पूज्य बलिं दद्यात् । बलिं निधाय संपूज्य-ॐ मत्स्याद्यावाहितदेवताभ्यो नमः बलिं समर्पयामि । जलमादाय-अनया पूजया मत्स्याद्यावाहितदेवताः प्रीयन्ताम् ।

जलाश्रित वरुणपूजनम् । जले घृतहोमः ।

Scanned by CamScanner

जलसमीपं गत्वा-ॐ एह्येहि यादोगणवारिधीनां गणेन पर्जन्य सहाप्सरोभिः । विद्या धरेन्द्रामरगीयमान पाहि त्वमस्मान् भगवन्नमस्ते ॥ ॐ उरुᳬहि राजा व्वरुणश्चकार सूर्य्याय पन्थावमन्न्वेतवाऽउ । अपदेपादा प्रतिधातवे करुता पवक्ता हृदयाव्विधश्चित् । नमो व्वरुणायाभिष्ठितो व्वरुणस्य पाशः ॥८-२३॥ ॐ भू० वरुणाय० इत्यावाह्य, संपूजयेत् । ॐ वरुणाय नमः-इति नैवेद्ये घृतं दधि पञ्चामृतं वा समर्पयेत् । अनेन पूजनेन वरुणः प्रीयताम् ॥

ऋजुकुशचतुष्टयेन चतुरस्रां वेदीं कृत्वा जले निधाय तत्राज्येन स्रुवेण होमः । त्यागोच्चारणमात्रम् । न संस्रवः । १ ॐ अद्भ्यः स्वाहा इदमद्भ्यो न मम । २ ॐ वार्भ्यः स्वाहा-इदं वार्भ्यो न मम । ३ ॐ उदकाय स्वाहा-इदमुदकाय न मम । ४ ॐ तिष्ठन्तीभ्यः स्वाहा-इदं तिष्ठन्तीभ्यो न मम । ५ ॐ स्रवन्तीभ्यः स्वाहा इदं स्रवन्तीभ्यो न मम । ६ ॐ स्यन्दमानाभ्यः स्वाहा-इदं स्यन्दमानाभ्यो न मम । ७ ॐ कूप्याभ्यः स्वाहा इदं कूप्याभ्यो न मम । ८ ॐ सूद्याभ्यः स्वाहा-इदं सूद्याभ्यो न मम । ९ ॐ धार्य्याभ्यः स्वाहा-इदं धार्याभ्यो न मम । १० ॐ अर्णवाय स्वाहा-इदमर्णवाय न मम । ११ ॐ समुद्राय स्वाहा-इदं समुद्राय न मम । १२ ॐ सरिराय स्वाहा-इदं सरिराय न मम ॥

इति द्वादशाहुतीः स्रुवेण जले हुत्वा-ॐ नमो नमस्ते स्फटिक० इमम्मे० इति नत्वा-नारिकेलार्धं गृहीत्वा-प्रतीचीश नमस्तुभ्यं सर्वाघौघनिषूदन । पवित्रं कुरु मां देव सर्वकालेषु सर्वदा ॥१॥ ज्ञानतोऽज्ञानतो वाऽपि भगवन् यन्मया कृतम् । तत्सर्वं पूर्णतां यातु त्वत्प्रसादाज्जलाधिप ॥२॥ ज्ञानतोऽज्ञानतो वाऽपि यावान् विधिरनुष्ठितः । स सर्वस्त्वत्प्रसादेन पूर्णो भवत्वपाम्पते ॥३॥ इति नारिकेलं जले प्रक्षिप्य । जलमादाय-अनेन पूजनपूर्वकं होमकर्मणा सपरिवारो वरुणः प्रीयताम् ॥

## ४८ मण्डपप्रत्यागमनम् ।

मण्डलपरितः स्थापितान् कलशान् गन्धमाल्य सौभाग्य द्रव्यैरलंकृत्य हस्ते-अक्षतान् गृहीत्वा-यान्तु देवगणाः० उत्तिष्ठ ब्रह्मणस्पते० इति मंत्राभ्यां ॐ मत्स्यादिदेवताः स्वस्वस्थानं गच्छत- इति विसर्जयेत् । दक्षिणादानम् । आशीर्वादः । ततः कलशान् कुमारिकासुवासिनीनां शिरसि निधाय भद्रसूक्तं शकुन्त सूक्तं शान्तिसूक्तादिकं पठन् सऋत्विग्यजमानः शिरसि धृतकलशाः सुवासिनीरग्रतः कृत्वा यागमण्डपं प्रति गच्छेत् ।

अर्धमार्गे भूमिं जलेन प्रोक्ष्य-अक्षतपुञ्जे पूगीफलं निधाय ॐ नहिस्पश० देवाः)-क्षेत्रपालाय नमः क्षेत्रपालमावाहयामि स्थापयामि-इत्यावाह्य संपूज्य समीपे माषमक्तादिसदीपं बलिं निधाय बलिद्रव्याय नमः-इति संपूज्य-जलमादाय-ॐ नमो भगवन् क्षेत्रपाल भासुरनेत्र ज्वालामुख अवतर अवतर पिङ्गलोर्ध्वकेश जिह्वाललन छिन्धि धीं धीं धीं धीं कुरु कुरु कुरु मुरु मुरु चल चल लं लः हां हीं हूं हैं हौं हः मम यज्ञं रक्ष रक्ष बलिं गृहाण गृहाण स्वाहा ॐ क्षेत्रपालाय नमः सदीपबलिं समर्पयामि-इति जलमृत्सृज्य उदकोपस्पर्शः । ततः पुरो यज्ञमण्डपं गत्वा पश्चिमद्वारि स्थित्वा गन्धाक्षतपुष्पैः

Scanned by CamScanner

शिरोधृतकलशाः कुमारिकाः सुवासिनीश्च वर्धाप्य नीराजनं कुर्यात्-ॐ अनाधृष्टा पुरस्ता दग्नेराधिपत्यऽआयुर्म्मेदा ः पुत्रवती दक्षिणतऽइन्द्रस्याधिपत्ये प्रजाम्मेदाः । सुखदा पश्चाद् देवस्य सवितुराधिपत्ये चक्षुर्म्मेदाऽआश्रुतिरुत्तरतो धातुराधिपत्ये रायस्पोषम्मेदाः । व्विधृतिरुपरिष्टाद बृहस्पतेराधिपत्यऽओजोमेदा व्विश्वाभ्यो मानाष्ट्राभ्यस्पाहि मनोरश्वासि ॥३७-१२॥ इति नीराज्य मण्डपं प्रदक्षिणीकृत्य कुमारिकाः सुवासिन्यश्च मण्डपपश्चिमद्वारि तिष्ठेयुः । तासां शिरोभ्यः कलशान् गृहीत्वा शुद्धपात्रे जलं संरक्षेत् । अनेन जलेन प्रतिमाप्रासादस्नपन यजमानाभिषेकादि सम्पादयेत् । कलशद्रव्यं ब्राह्मणेभ्यो विभज्य दद्यात् ।

अनेन प्रतिष्ठाङ्गत्वेन प्रतिमास्नपनाभिषेकादिहेतवे जलानयनरूपजलयात्राकर्मणा भगवान् परमेश्वरः प्रीयताम् ॥

## ४९ निक्षेपान्तप्रासादवास्तुशान्तिः ।

(जलयात्राकाल एव यजमानोऽन्यः प्रतिनिधिर्वा ब्राह्मणैः सह वास्तुशान्तिकर्म सम्पादयेत् । प्रासादे चतुः षष्टिपदं शतपदं वा वास्तुमण्डलं काष्ठपीठे श्वेतवस्त्रे पञ्चवर्णै स्तण्डुलैर्यथा निर्दिष्टवर्णं वास्तुमण्डलं विरचयेत् । प्रासादसभामण्डपे चतुरस्रमेकहस्तं स्थण्डिलं चतुरङ्गुलोच्चं पक्वापक्वेष्टकाभि मृदा विरचयेत् । शतपदमण्डल एकादशरेखासत्त्वादन्तिमयोः सुरथा इन्द्राण्योरावृत्तिं कुर्यात् । प्रासादस्य स्थिरत्वाद् वास्तोष्पतिना सह ध्रुवमावाहयेत्-पूजयेच्च । रेखादेवतानां होमो नास्तीति प्रागुक्तम् ।)

### प्रासादाङ्गवास्तुशान्तिप्रयोगः ।

प्रासादगर्भगृहे सभामण्डपे वा यजमानः प्रतिनिधिर्वा हस्तमात्रं चतुरस्रं स्थण्डिलं विधाय श्वेतवस्त्रे पुरत श्चतुःषष्टिपदं शतपदं वा पञ्चवर्णतण्डुलपूरितं वास्तुपीठं निधाय प्राङ्मुख उपविश्य तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । शान्तिपाठादि । संकल्पः-अद्य० तिथौ समस्तभक्तजनग्रामजनदेशजनकल्याणाय आरब्धसप्रासादप्रतिष्ठाङ्गत्वेन अस्मिन् नूतनप्रासादे भूमिगत कांस्यरजतादि तुषपाषाणकेशास्थिकङ्कालाद्यष्टविधमेदिनी शल्यदोष-आय व्ययदिक्शूल दिङ्मूढवेधादि दोष-जीव हिंसादिदोषनिवारणपूर्वकं सूर्याचन्द्रमसौ यावद् वास्तोः स्थिरसिद्धिपूर्वकं देवकलासान्निध्यहेतवे सर्वदेवतास्वरूपाधिष्ठितवास्तुपुरुष ध्रुवदेवता प्रीत्यर्थं शालाकर्मसहितां वास्तुनिक्षेपान्तां वास्तुशान्तिमहं करिष्ये । पुनर्जलमादाय-तत्रादौ गणेशस्मरणपूर्वकं शालाकर्म दिग्रक्षणं पञ्चगव्यकरणं भूमिपूजनं पञ्चभूसंस्कारपूर्वकमग्निस्थापनं मण्डलदेवतास्थापनं प्रधानदेवतास्थापनं बलिदानं विहितं होमं निक्षेपान्तञ्च कर्म करिष्ये । ॐ गणानान्त्वा० गणपतये नमः सर्वोपचारार्थं नमस्करोमि । ब्राह्मणवरणम् । स्थण्डिलाद् दक्षिणे प्रादेशमात्रे स्थण्डिलेऽग्निं प्रतिष्ठाप्य कांस्यपात्रे आज्यमग्नावधिश्रित्य स्रुवं प्रतप्य सम्मृज्याज्यमुद्वास्य लौकिकदर्भेण उत्पूय अवेक्ष्य अपद्रव्यं निरस्य शालाकर्म कुर्यात् ।

Scanned by CamScanner

## शालाकर्म ।

प्रासादस्य चतुर्षु कोणेषु पक्का अपक्का वेष्टका निधाय स्तम्भावटेषु चतुर्षु आग्नेयकोणादारभ्य स्रुवेण जुहुयात्, स्तम्भोच्छ्रयणञ्च कुर्यात् । (इदं पूर्वं जातमेवेति) सम्प्रति संस्कारमात्रं कुर्यात् । आग्नेयकोणे आज्येन स्रुवेण इष्टकायां जुहुयात्-ॐ अच्युताय भौमाय स्वाहा- इदमच्युताय भौमाय नमम त्यागोच्चारमात्रम्) ततः कोणं स्पृष्ट्वा स्तम्भोच्छ्रयणं भावयन् मन्त्रं पठेत् । ॐ इमामुच्छ्रयामि भुवनस्य नाभिं वसोर्धारां प्रतरणीं वसूनाम् । इहैव ध्रुवां निमिनोमि शालां क्षेमे तिष्ठतु घृतमुक्षमाणा ॥१॥ अश्वावती गोमती सूनृतावत्युच्छ्रयस्व महते सौभगाय । आत्वा शिशुराक्रन्दत्वा गावो धेनवो वाश्यमानाः ॥२॥ आ त्वा कुमारस्तरुण आवत्सो जगदैः सह । आत्वा परिस्रुतः कुम्भ आदध्नः कलशैरुप ॥३॥ क्षेमस्य पत्नी बृहती सुवासा रयिं नो धेहि सुभगे सुवीर्यम् । अश्वावद् गोमदूर्जस्वत् पर्णं वनस्पतेरिव । अभि नः पूर्यताꣳरयिरिदमनुश्रेयो वसानः ॥४॥ इति जपेत् । एवमेव नैर्ऋत्यकोणे वायव्यकोणे ईशानकोणे च ॐ अच्युताय भौमाय स्वाहा इदमच्युताय भौमाय नमम-इति आज्याहुतिं हुत्वा कोणं स्पृष्ट्वा-ॐ इमामुच्छ्रयामि० श्रेयो वसानः-इति चतुरो मन्त्रान् पठेत् ।

स्वस्थान उपविश्य । दिग्रक्षणम् । पञ्चगव्यकरणम् । भूम्यादिपूजनम् । पञ्चभूसंस्कारपूर्वकमग्निं संस्थाप्य ॐ बलवर्धननामाग्नये नमः- इति पञ्चोपचारैः पूजयेत् । अनेन पूजनेन बलवर्धननामाग्निः प्रीयताम् ॥

जलमादाय-प्रासादाङ्गे अस्मिँश्चतुः षष्टिपदमण्डले शतपदमण्डले देवतास्थापनमहं करिष्ये । पीठचतुःकोणेषु आग्नेयादिक्रमेण चतुरः शङ्कून् रोपयेत्-ॐ विशन्तु भूतले नागा० इति मन्त्रावृत्त्या । शङ्कून् त्रिगुणीकृत सूत्रेण वेष्टयित्वा शङ्कुपार्श्वे माषभक्तबलीन् दद्यात् । ॐ अग्निभ्यो० २ नैर्ऋत्यधि० ३ नमो वै वायुरक्षोभ्यो० ४ रुद्रेभ्योऽप्यथ सर्पेभ्यो० इति मन्त्रैः १ ॐ अग्न्यादिभ्यो नमः बलिं समर्पयामि । २ निर्ऋत्यादिभ्यो० । ३ वाय्वादिभ्यो० । ४ रुद्रादिभ्यो० । इति बलिदानम् ।

हस्ते अक्षतान् गृहीत्वा-मण्डपवास्तुस्थापनवत् (पृ० २४१ रेखाकरणम् रेखादेवताऽवाहनम् ।) शतपदे तु-पश्चिमादिप्रागन्तमुदक्संस्थमेकादश रेखासु-१ शान्त्यै० २ यशोवत्यै० ३ कान्त्यै० ४ विशालायै० ५ प्राणवाहिन्यै० ६ सत्यायै० ७ सुमत्यै० ८ नन्दायै० ९ सुभद्रायै० १० सुरथायै० ११ सुरथायै० दक्षिणाद्युदगन्ताः प्राक्संस्थाः-१ हिरण्यायै० २ सुप्रभायै० ३ लक्ष्म्यै० ४ विभूत्यै० ५ विमलायै० ६ प्रियायै० ७ जयायै० ८ बालायै० ९ विशोकायै० १० इन्द्राण्यै० ११ इन्द्राण्यै०) इति रेखादेवता आवाह्य ॐ रेखादेवताभ्यो नमः-इति पूजयेत् । रेखादेवतानां होमो नास्ति ।

ततो मण्डपाङ्गवास्तु प्रकरणे (पृष्ठे-२४१ तः २४३) निर्दिष्टास्त्रिषष्टिदेवतास्त्रिसप्ततिदेवता वा तत्तन्मन्त्रैर्नाममन्त्रैर्वाऽवाह्य ॐ ब्रह्मादिवास्तुमण्डलदेवताभ्यो नमः इति पञ्चोपचारैः संपूज्य मध्ये

Scanned by CamScanner

सपूर्णपात्रं कलशं निधाय क्षौमवस्त्रेणाच्छाद्य तत्र-ॐ मण्डूकाय नमः-इत्यादि पीठदेवता आवाह्य गन्धपुष्पाभ्यां पूजयेत् । पात्रे वास्तोष्पतिप्रतिमां ध्रुवप्रतिमाञ्च निधाय-ॐ वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशो अनमीवो भवानः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शञ्चतुष्पदे । (ऋः) ॐ नमो व्वात्याय० चारुणाय च ॐ भू० वास्तोष्पते इहागच्छ इहतिष्ठ वास्तोष्पतये नमः वास्तोष्पतिमावाहयामि । स्थापयामि ॥ २ ॐ ध्रुवाऽसि ध्रुवोऽयँय्यजमानोऽस्मिन्नायतने प्रजया पशुभिर्ब्भूयात् । घृतेन द्यावापृथिवी पूर्य्येथामिन्द्रस्यच्छदिरसि व्विश्वजनस्यच्छाया ॥२॥ (५-२८) ॐ भू० ध्रुव० ध्रुवाय० ध्रुवम्० । ॐ मनोजूति० भो वास्तुपुरुष ध्रुवौ सुप्रतिष्ठितौ वरदौ भवतम् ॥ पुष्पाण्यादाय-ॐ ह्रीं नमो भगवते वास्तुपुरुषाय महाबलपराक्रमाय सर्वदेवाधिवासाश्रितशरीराय ब्रह्मपुत्राय सकलब्रह्माण्डधारिणे भूभारार्पितमस्तकाय पुरपत्तनप्रासादगृहवापी सरःकूपादिसन्निवेश-सान्निध्यकराय सर्वसिद्धिप्रदाय प्रसन्नवदनाय विश्वम्भराय परमपुरुषाय शक्रवरदाय वास्तोष्पते नमस्ते नमस्ते-इति पुष्पाणि समर्प्य-ॐ मण्डलदेवतासहितवास्तुपुपूरुष ध्रुवाभ्यां नमः-इति पुरुषसूक्तेन षोडशोपचारैः पूजयेत् । विशेषार्घं गृहीत्वा-ॐ नमस्ते वास्तुपुरुष भूशय्यानिरत प्रभो । प्रासादे (मद्गृहे) धनधान्यादि समृद्धिं कुरु सर्वदा ॥१॥ अयोने भगवन् भर्गललाटस्वेदसम्भव । गृहाणार्घं मया दत्तं वास्तो स्वामिन् नमोऽस्तु ते ॥ ॥ॐ मण्डलदेवतासहित वास्तुपुरुष ध्रुवाभ्यां नमः नमस्कारान् समर्पयामि । अनेन पूजनेन मण्डलदेवतासहितौ वास्तुपुरुषध्रुवौ प्रीयेताम् ।

मण्डलैशान्यामव्रणं कलशं संस्थाप्य तस्मिन्-ॐ इमम्मे व्वरुण० येतीर्थानि० सतीर्थं वरुणमावाहयामि । गन्धपुष्पाभ्यां पूजयेत् ।

एकतन्त्रेण बलिदानम्-मण्डपसमीपे सदीपमाषभक्तपायसबलिं निधाय-जलमादाय-वास्तुमण्डलदेवतानामेकतन्त्रेण पायसबलिदानं करिष्ये । बलिद्रव्याय नमः-इति संपूज्य-जलमादाय-ॐ एह्येहि ध्रुवसहितवास्तोन्यते सपरिवार इमं मयोपनीतं बलिं गृहाण प्रासाद (मम गृहम्) अच्छिद्रं कुरुकुरु सकलदुष्टेभ्यो मां रक्ष रक्ष नमः । इति बलिं दत्त्वा ब्रह्मादिदेवताभ्यो नाममन्त्रैः ॐ ब्रह्मणे नमः बलिं समर्पयामि-एवं (पृ०२२५ तः २२७) क्रमेण अनन्तान्तं क्षितिरूपान्तं वा बलिं दद्यात् । अनेन एकतन्त्रेण बलिदानेन मण्डलदेवतासहितौ वास्तुपुरुषध्रुवौ प्रीयेताम् ।

दक्षिणतो ब्रह्मासनम् । प्रणीतास्थलं त्यक्त्वा तदुत्तरे उदपात्रस्थापनं संस्रवार्थम् (पा. गृ. भाष्ये) ततः प्रणीताप्रणयनादि प्रोक्षणीप्रत्युत्पवनान्तां कुशकण्डिकां कृत्वा-यजमानः प्रासादद्वाराद् बहिर्गत्वा ब्रह्माणं पृच्छति-भो ब्रह्मन् प्रविशामि । ब्रह्मा-सुखेन प्रविश । यज० ॐ ऋतं प्रपद्ये शिवं प्रपद्ये-इत्युक्त्वा पत्नीपुरःसरं दक्षिणपादेन देहलीं दक्षिणांसेन द्वारवामशाखां स्पृशन् प्रविशेत् ॥

Scanned by CamScanner

## होमः ।

सोपयमनकुशं सव्यहस्ते हृदये धृत्वा दक्षिणहस्तेन तिष्ठन् तिस्रः समिधः तूष्णीम् अग्नौ अभ्याधाय प्रोक्षण्युदकशेषेण सपवित्रहस्तेन अग्नेरीशानकोणमारभ्य प्रदक्षिणवत् पर्युक्षणम् । इतरथाऽवृत्तिः । पवित्रयोः प्रणीतासु निधानम् । दक्षिणं जान्वाच्य आज्येन आदौ इहरतिरित्यादिषडाहुतीर्जुहुयात् । उदपात्रे संस्रवः । स्रुवेणाज्यमादाय-१ ॐ इहरतिरिहरमध्वमिह धृतिरिह स्वधृतिः स्वाहा इदमग्नये न मम । २ ॐ उपसृजन् धरुणं मात्रे धरुणो मातरं धयन् । रायस्पोषमस्मासुदी धरत् स्वाहा इदमग्नये न मम । ३ ॐ वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशो अनमीवो भवानः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे स्वाहा-इदं वास्तोष्पतये न मम । ४ ॐ वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति तन्नो जुषस्व शन्नो भव द्विपदे शश्चतुष्पदे-स्वाहा । इदं वास्तोष्पतये न मम । ५ ॐ वास्तोष्पते शग्मया स ह सदा ते सक्षीम हिरण्वया गातुमत्या । पाहि क्षेम उत योगे वरन्नो यूयम्पात स्वस्तिभिः सदा नः स्वाहा । इदं वास्तोष्पतये न मम । ६ ॐ अमीवहा व्वास्पोष्पते विश्वा रूपाण्याविशन् । सखा सुशेव एधि नः स्वाहा-इदं वास्तोष्पतये नमम ॥

ततो ब्रह्मणा प्रकोष्ठे दर्भेणान्वारब्ध आघारावाज्यभागौ चाज्येन जुहुयात् । प्रोक्षण्यां संस्रवः । १ ॐ प्रजापतये स्वाहा-इदं प्रजापतये नमम । २ ॐ इन्द्राय स्वाहा-इदमिन्द्राय नमम । ३ ॐ अग्नये स्वाहा-इदमग्नये नमम । ॐ सोमाय स्वाहा-इदं सोमाय नमम ।

सम्यगुपविश्य उपयमनकुशान् पुरतो निधाय-ॐ अग्निन्दूतं० बलवर्धन नामाग्नये नमः-इत्यग्निं संपूज्य स्थालीपाकेन षडाहुतीर्जुहुयात् । त्यागोच्चारमात्रम् । न संस्रवः । स्थालीपाकमादाय-१ ॐ अग्निमिन्द्रं बृहस्पतिं विश्वान् देवानुपह्वये । सरस्वतीं च वाजीं च वास्तु मे दत्त वाजिनः स्वाहा इदमग्नये इन्द्राय बृहस्पतये विश्वेभ्यो देवेभ्यो सरस्वत्यै वाज्यै च नमम । २ ॐ सर्पदेवजनान् सर्वान् हिमवन्त ह सुदर्शनम् । वसूँश्च रुद्रानादित्यानीशानं जगदैः सह । एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा- इदं सर्पदेवजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्य आदित्येभ्य ईशानाय जगदेभ्यश्च नमम । ४ ॐ कर्तारश्च विकर्तारं विश्वकर्माणमोषधींश्च वनस्पतीन् । एतान्त्सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा-इदं कर्त्रे विकर्त्रे विश्वकर्मण ओषधिभ्यो वनस्पतिभ्यश्च नमम । ५ ॐ धातारश्च विधातारं निधीनां पतिह सह । एतान्त्सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा-इदं धात्रे विधात्रे निधीनाञ्च पतये नमम । ६ ॐ स्योन ह शिवमिदं वास्तु दत्तं ब्रह्मप्रजापती । सर्वाश्च देवताः स्वाहा-इदं ब्रह्मणे प्रजापतये सर्वाभ्यो देवताभ्यश्च नमम । एवं षडाहुतीर्हुत्वा आज्येन । ॐ गणानान्त्वा० गर्भधम्-स्वाहा-इदं गणपतये नमम-इति वराहुतिं दत्त्वा त्यागसंकल्पं कुर्यात् ।

इदं सम्पादितं सिध्यौदनादि हविर्द्रव्यं, तेन या या यक्ष्यमाणदेवताः, ताभ्यः ताभ्यः मया परित्यक्तम्, न मम, यथादैवतमस्तु । इति त्यागसंकल्पः ।

Scanned by CamScanner

ततः प्रधानहोमः-१ ततः - १ सिध्धौदनेन २ मधुना ३ आज्येन ४ यवैः ५ कृष्णतिलैः ६ क्षीरवृक्षसमिद्भिः इति षड्द्रव्यैः वास्तुपुरुषं प्रतिद्रव्यं ॐ वास्तोष्पते० चतुष्पदे स्वाहा-इति मन्त्रेण १०८ वा २८ आहुतीर्जुहुयात् (मतान्तरेण-१ क्षीरवृक्षसमित् २ चरु ३ तिल ४ आज्यद्रव्यैः वास्तुपुरुषं प्रतिद्रव्येण १ वास्तोष्पते० इति ऋक्चतुष्टयेन प्रत्यृचं सप्तवारं सप्तविंशतिवारं वा जुहुयात् ।)

(२) १ चरुणा २ तिलैः ३ आज्येन इति त्रिभिर्द्रव्यैः प्रतिद्रव्यं-१०८ वा २८ संख्यया ॐ ध्रुवाऽसि ध्रुवो० जनस्य च्छाया-स्वाहा-इति मन्त्रेण जुहुयात् ।

(३) घृतेन तिलैर्वा १०८ वा २८ संख्यया ॐ अघोरेभ्यो० रुद्ररूपेभ्यः-स्वाहा इति मन्त्रेण वास्तुमर्मसन्धानार्थं जुहुयात् ।

(४) ततो घृताक्तानि पञ्च बिल्वफलानि - १ ॐ वास्तोष्पते० २ वास्तोष्पते प्रतरणो० ३ वास्तोष्पते शग्मया० ४ अमीवहा वास्तोष्पते० ५ ध्रुवासि० इति प्रतिमन्त्रमेककं जुहुयात् ।

(५) वास्तुमण्डलदेवतानां-१ आज्येन २ चरुणा ३ तिलैः ४ क्षीरसमिद्भिश्च प्रतिद्रव्यमष्टाष्टसंख्यया जुहुयान्नाममन्त्रैः । चरक्याद्यष्ट देवतानां नाममन्त्रैः प्रतिद्रव्यं चतुश्चतुः संख्यया जुहुयात् । इन्द्रादि-अनन्तान्तानां दशानां क्षितिरूपान्तानां वा विंशतेः प्रतिद्रव्यं द्विर्द्विर्जुहुयात् । (अथवा समयाभावे ब्रह्मादिसर्वासां देवतानां द्रव्यचतुष्टयेन नाममन्त्रेण प्रत्येकमेकैकाहुतिं जुहुयात् ।)

(६) ततः समस्तव्याहृतिभिः तिलैः १०८ वा २८ संख्यया जुहुयात् । (ततः सर्षपगुग्गुलुफललक्ष्मीहोमाः कृताकृताः) ।

मृडाग्नेः स्थापितवास्तुदेवतानां पूजनम् । स्विष्टकृत् । नवाहुतयः । दिक्पालानां मण्डलदेवतानाञ्च बलिदानम् । पूर्णाहुतिः । वसोर्धारा । भस्म धारणम् । होमसंकल्पः । संस्रवप्राशनम् । पवित्राभ्यां मुखमार्जनम् । अग्नौ पवित्रप्रतिपत्तिः । पूर्णपात्रदानम् । प्रणीताविमोकः । इत्यन्तं कृत्वा सार्वभौतिकबलिदानम् ।

वास्तुमण्डलात् पूर्वे शुचौ देशे सदीपं बलिं निधाय-जलमादाय-सर्वभूतप्रीत्यर्थं प्रासाद प्रतिष्ठाङ्गं सार्वभौतिकबलिदानं करिष्ये । सर्वभूतबलिद्रव्याय नमः इति संपूज्य जलमादाय-ॐ त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च । ब्रह्मविष्णुशिवैः सार्धं रक्षां कुर्वन्तु तानि मे ॥१॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः । ऋषयो मनवो गावो देवमातर एव च ॥२॥ सर्वेऽत्र मन्दिरे (मम गृहे) रक्षां प्रकुर्वन्तु मुदान्विताः । ब्रह्मा विष्णुश्च रुद्रश्च क्षेत्रपालगणैः सह । रक्षन्तु मन्दिरं (सदनं) सर्वे घ्नन्तु रक्षांसि सर्वतः ॥ जलं पात्रे क्षिपेत् - १ त्रैलोक्यस्थेभ्यः स्थावरेभ्यो भूतेभ्यो नमः बलिं समर्पयामि । २ ब्रह्मणे० । ३ विष्णवे० ४ शिवाय० ५ देवेभ्यो० ६ दानवेभ्यो० ७ गोभ्यो० ८ यक्षेभ्यो० ९ राक्षसेभ्यो० १० पन्नगेभ्यो० ११ ऋषिभ्यो० १२ मनुष्येभ्यो० १३ गोभ्यो० १४ देवमातृभ्यो० १५ भूतेभ्यो० १६ प्रेतेभ्यो० १७ पिशाचेभ्यो० १८ मातृभ्यो० १९ गणेभ्यो नमः बलिं समर्पयामि ।

Scanned by CamScanner

प्रार्थना-बलिं गृह्णन्त्विमे देवा आदित्या वसवस्तथा । मरुतोऽथाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ॥१॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः । डाकिन्यो यक्षवेताला योगिन्यः पूतनाः शिवाः ॥२॥ जृम्भकाः सिद्धगन्धर्वा माला विद्याधरा नगाः । दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः ॥३॥ जगतां शान्तिकर्तारो ब्रह्माद्याश्च महर्षयः ॥ मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः । सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः ॥३॥ अनेन बलिदानेन सर्वभूतानि प्रीयन्ताम् । ततो वास्तुदेवतानीराजनमन्त्रपुष्पाञ्जलिप्रदक्षिणाविशेषार्घप्रार्थनाक्षमापनानि कृत्वा वास्तुनिक्षेपं कुर्यात् ।

## वास्तुनिक्षेपः ।

प्रासादगर्भगृहस्याग्नेय्यामाकाशपद ऐशान्यां वा हस्तमात्रं वितस्तिमात्रं गर्तं वा खात्वा मृदं तत्रैव संरक्ष्य गोमयेन गर्तमुपलिप्य गन्धमाल्यादिभिरलङ्कृत्य मृत्पात्रे ताम्रपात्रे वा शाल्यादिसप्तबीजानि दध्योदनं दधिशैवालपुष्पपञ्चरत्नहिरण्य दूर्वासर्वौषध्युदपात्रजलादिकं प्रक्षिप्य पूर्व पूजितां वास्तुमूर्तिं पात्रेऽधोमुखीं ईशानशिरस्कां निधाय पात्रान्तरेण पिधाय मण्डलेशानस्थापितमव्रणं कलशमादाय गर्तसमीपं गच्छेत् । संकल्पः-अस्मिन् नूतनप्रासादे सूर्याचन्द्रमसौ यावद् वास्तोः स्थिरतासिद्ध्यर्थं वास्तुनिक्षेपमहं करिष्ये । अव्रणं कलशमादाय जानुभ्यामवनिं गत्वा-ॐ उदुत्तमं वरुणपाश० ॐ नमो वरुणाय-इति गर्ते कलशजलं सिञ्चेत् । वास्तुमूर्तिसहितं मृत्पात्रं ताम्रपात्रं वा सपिधानं गर्ते निधाय-ॐ स्थिरोभव० पुरीषवाहणः ॥ वास्तोष्पते प्रति० इति मन्त्रौ पठित्वा-स्थिरो भव । शाश्वतो भव । सुखदो भव । वरदो भव-इति प्रार्थ्य-द्यौः शान्ति० यतो यतः० पठन् यजमानो मृदा पत्नी, जलेन गर्तं प्रपूरयेत् । ततः प्रार्थयेत्-ॐ पूजितोऽसि मया वास्तो होमाद्यैरर्चनैः शुभैः । प्रसीद पाहि देवेश देहि नः सकलं सुखम् ॥ सशैलसागरां पृथ्वीं यथा वहसि मूर्धनि । तथा नो वह कल्याण संपत्सन्ततिभिः सह ॥ यथा मेरुगिरेः शृङ्गं देवानामालयः सदा । तथा ब्रह्मादि देवैस्त्वं प्रासादेऽस्मिन् स्थिरो भव-इति संप्रार्थ्य गर्ते गन्धपुष्पादिकं प्रक्षिपेत् । अनेन वास्तुनिक्षेपकर्मणा सूर्याचन्द्रमसौ यावत् प्रासादे वास्तोः स्थिरताऽस्तु ॥

## भित्त्यलंकरणम् । दिक्प्रार्थना ।

कांस्यपात्रे उदपात्रस्थजलं क्षीरौदुम्बरपल्लवान् शैवालं गोमयं दधिमधुघृतं कुशान् यवान् हरिद्रासर्षप गोरोचनकुङ्कुमदूर्वादिमङ्गलद्रव्याणि चादाय प्रागादिभित्तीः स्वहस्तयुगलेन दम्पती अङ्कयेताम्- १ पूर्वभित्तिम्-ॐ श्रीश्च त्वा यशश्च पूर्वे सन्धौ गोपायेताम् । २ दक्षिणभित्तिम्-यज्ञश्च त्वा दक्षिणा च दक्षिणसन्धौ गोपायेताम् । ३ पश्चिमभित्तिम्-अन्नं च त्वा ब्राह्मणाश्च पश्चिमसन्धौ गोपायेताम् । ४ उत्तरभित्तिम्-ऊर्क् च त्वा सूनृता चोत्तरसन्धौ गोपायेताम् । तेन मङ्गलजलेन आसनोपस्थानानि प्रोक्षेत् । द्वारशाखे चाङ्कयेत् ।

गृहाद् वहिर्निष्क्रम्य प्राचीमुपतिष्ठेत्-ॐ केता च मा सुकेता च पुरस्ताद् गोपायेतामग्निर्वै केताऽदित्यः सुकेता च तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पुरस्ताद् गोपायेताम् ॥ दक्षिणाम्-ॐ गोपायमानश्च मा

Scanned by CamScanner

रसमाणा च दक्षिणतो गोपायेतामित्यहर्वै गोपायमान ह रात्री रक्षमाणा ते प्रपद्ये ताभ्यां नमोऽस्तु ते मा दक्षिणतो गोपायेताम् ॥ प्रतीचीम्-ॐ दीदिविश्च मा जागृविश्च पश्चाद् गोपायेतामित्यन्नं वै दीदिविः प्राणो जागृविस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मा पश्चाद् गोपायेताम् । उदीचीम्-ॐ अस्वप्नश्च मानवद्राणश्चोत्तरतो गोपायेतामिति चन्द्रमा वा अस्वप्नो वायुरनवद्राणस्तौ प्रपद्ये ताभ्यां नमोऽस्तु तौ मोत्तरतो गोपयेताम् ॥ ततः प्रासादं प्रविशेत्-ॐ धर्मस्थूणा राज ७ श्रीस्तूपमहोरात्रे द्वारफलके । इन्द्रस्य गृहा वसुमन्तो वरूथिन स्तानहं प्रपद्ये सह प्रजया पशुभिः सह । यन्मे किञ्चिदस्त्युपहूतः सर्वगणसखायसाधुसंवृतः । तां वा शालेऽरिष्टवीरा गृहा नः सन्तु सर्वतः-इति प्रविश्य देवपिण्डिकास्थानं प्रणम्य स्वासने उपविशेत् ।

प्रासादं गृहं वा पूर्वादिक्रमेण पीतरक्तकृष्णनीलश्वेतधूम्रश्वेतश्वेतमेघरक्तवर्णैर्ध्वजैर्लोकपालमन्त्रै-स्तत्तद्दिक्षु शोभयेत् । प्रासादं त्रिसूत्र्या वेष्टयित्वा जलधारां पयोधाराञ्च-ॐ रक्षोहणं-४ कृणुष्वपाजः-५ पुनन्तुमा० ९ इति राक्षोघ्नपावमानसूक्तैः परितः सिञ्चेत् ।

दक्षिणा भूयसी संकल्प्यौ । पीठदानं शिल्पिने । आशीर्वादादि । अग्निस्थापितदेवताविसर्जनम् । जलमादाय-नूतनप्रासादे शल्यजीवहिंसा आयव्ययवेधादिदोषनिवृत्तिपूर्वकं वास्तोः स्थिरतासिद्ध्यर्थं कृतेन निक्षेपान्तवास्तुशान्तिकर्मणा परमेश्वरः प्रीयताम् ।

इति प्रासादाङ्गवास्तुशान्तिः ॥

## ५० स्नपनविधिः ।

(पूर्वं स्नपनप्रकारनिदर्शकपरिशिष्टात् प्रथमादिसप्तमप्रकारान्ताः पक्षा एकदिनसाध्यप्रतिष्ठायां सम्पादयितुं शक्यन्ते । अष्टमादित्रयोदशप्रकारान्ताः पक्षास्त्रिदिनसाध्यायामेकरात्राधिवासपक्षेण द्वितीयेऽहनि भवितुमर्हन्ति । सप्तपञ्चत्रिदिनाधिवासनपक्षेष्वर्चाशुद्धिरूपमातिदेशिकत्वं स्वीकृत्य सति सम्भवे चतुर्दशपञ्चदशषोडशप्रकाराः प्रयत्नेन सम्पादयितुमर्हाः सन्ति । प्रतिष्ठायां प्रधान मण्डपादुत्तरे तदर्धमानेन स्नानमण्डपः कार्य इति प्राक् शास्त्रार्थप्रकरण उक्तम् । एका वेदी, वेदीद्वयम्, वेदीत्रयं वा एकप्रतिमाप्रतिष्ठाकरण एव सम्भवति । सपरिवारशिवलक्ष्मीनारायण-लक्ष्मणरामचन्द्र-सीता-राधाकृष्णाद्येकाधिकप्रतिमाप्रतिष्ठाकरणे वेदीत्रयेण स्नपनमशक्यमिति वेद्यग्रे दोलादिकाष्ठपट्टका निधेयाः । यद्यपि शिल्पशास्त्रे प्रासादगर्भगृहमानेन मूर्त्तिदैर्घ्यादिकं निर्दिष्टम्, तथापि वर्तमानयुगे शिल्पशास्त्रमवगणय्य महत्यः पुरुषमात्राः प्रतिमाः स्थाप्यन्ते । ईदृशि प्रसङ्गे छायामण्डपे चालयितुमशक्यत्वे स्वस्थानस्थितानामेव प्राक्शिरसां वा स्नपनविधिः सम्पादनीयः । इतस्ततः सञ्चारणे महदापत्प्रसङ्गात् ।

एतस्मिन् प्रयोगप्रकरणे प्रतिष्ठामयूखोक्त नवतिकलशात्मकपक्षेण सार्क प्रतिष्ठावासुदेव्युक्तो द्वाविंशतिकलशस्नपनविधिः संकलितः । मयूखे समुद्रसंज्ञककलशचतुष्टयस्योक्तत्वाद् वासुदेव्यक्तं

Scanned by CamScanner

तक्षिणवेदीनिर्दिष्टं कलशचतुष्टयं परित्यज्य शेषाष्टादशकलशसंकलेनन १०८ अष्टोत्तरशतकलशा अन्ये च लौकिकाः कलशाः स्वीकृताः । एतद्भिन्नपक्षं स्वीकृत्य स्नपनेऽपि न कश्चिद् दोषः ।

एतदवधेयम्-एककलशादारभ्य तदधिककलशस्नपनपक्षस्वीकारेऽपि स्नपनविधौ सामान्यत्वेन विहिता विधयः-कलशासादनम्, अभिमन्त्रणम्, भद्रपीठनिवेशन स्वस्तिकविरचन दर्भास्तरणानि, दूर्वाक्षतपुष्पार्पण वस्त्राच्छादन नेत्रोन्मीलन-वस्त्रमार्जन-तैलाभ्यञ्जन पिष्टोद्वर्तन यक्षकर्दम जटामांस्यनुलेपन पूजनसामिधेनी कल्पोक्त स्तुत्यादिकं प्रयोगे तत्तदवसरेऽनुसन्धेयं यथासमयम् । स्नपनविध्युक्तां सकलां सामग्रीं सन्निधाप्य स्नपनविधिमारभेत ।

## ५१ वासुदेवीसंवलितो मयूखोक्तः स्नपनप्रयोगः ।

हस्तमात्रं द्वादशाङ्गुलोच्चं पक्वेष्टका विरचितं वेदीत्रयम् । तदुपरि पट्टकत्रयम् । अनेकमूर्त्तिसत्वे वेद्यग्रतो दीर्घाणि दोलापट्टकानि स्थापयेत् । दक्षिणवेदी, मध्यवेदी उत्तरवेदी च । दक्षिणवेद्याः पश्चाद् उदक्संस्थं १ मृत्तिका २ पल्लववृक्षीयकषाय ३ गोमूत्र ४ गोमय ५ भस्म ६ गन्धोदकपूरितान् षट्कलशानासादयेत् । तदुपरि पूर्वस्यां षट्कलशान्, तेभ्यः पञ्चसु गन्धोदकं षष्ठे च स्थपतिसंज्ञके कलशे सर्वतीर्थोदकं प्रक्षिपेदिति दक्षिणवेद्यां द्वादश कलशाः । मध्यवेद्याः पश्चिमेऽपि एवं दक्षिणवेदीवत् प्रथमपङ्क्तौ तत्तद्द्रव्य पूरिताः षट्, तत्पुरतो गन्धोदकपूरिताः पञ्च इत्येकादशकलशाः । उत्तरवेद्यां पूर्वादिक्रमेण १ क्षार २ क्षीर ३ दधि ४ सर्पिः ५ सुरा ६ इक्षुरस ७ स्वादु ८ गन्धोदक (पर्जन्योदक नारिकेलोदक युतानष्ट कलशानासादयेत् । उत्तरवेद्याः पश्चाद् उदक्संस्थं कलशासादनम् । तत्पुरतः प्राक् संस्थाः पङ्क्तयः । तत्र अधः प्रथमपङ्क्तौ १ मृत्तिका २ गोमय ३ गोमूत्र ४ भस्म ५ मीलितपञ्चगव्य ६ क्षीर ७ दधि ८ घृत ९ मधु १० शर्करायुतान् दश कलशान् उदक्संस्थं पङ्क्तिरूपेण आसादयेत् । तदुपरि द्वितीयपङ्क्तौ दश गन्धोदकपूरितान्, भेदेन अन्याँश्चतुरः समुद्रसंज्ञकान् कलशानासादयेत्-इति चतुर्दश । तत्पुरतः तृतीयपङ्क्तौ पञ्च १ पयः २ दधि ३ घृतं ४ मधु ४ शर्करायुतान् । तदुपरि चतुर्थपङ्क्तौ पञ्च शुद्धोदकपूरितान् । तदुपरि पञ्चमपङ्क्तौ पञ्च पल्लवकषाययुतान् । तदुपरि षष्ठपङ्क्तौ दश क्रमेण १ पुष्प २ फल ३ सुवर्णोदक ४ गोशृङ्गोदक ५ सप्तधान्य ६ सहस्रच्छिद्र ७ सर्वौषधी ८ पञ्चपल्लव ९ दूर्वा १० नवरत्नोदक युतान् । (तदुपरि अष्ट तीर्थोदकयुतान्० । तदुपरि सप्तम (अष्टम) पङ्क्तौ दश १ कदम्ब २ शाल्मलि ३ अम्बू ४ अशोक ५ प्लक्ष ६ आम्र ७ वट ८ बिल्व ९ नागवल्ली १० पलाशपत्रयुतान् लोकपाल कलशान् स्थापयेत् । (अत्र तीर्थोदककलशो लौकिकः, अष्ट वा भिन्ना इति पक्षद्वयम् ।

ततो वासुदेवीमतेन एषां कलशानामुत्तरतः नवानां नवानां प्राक्संस्थं पङ्क्तिद्वयम् । तेषु क्रमेण १ पाद्यम् २ अर्घः ३ आचमनीयम् ४ पञ्चगव्यम् ५ दधि ६ यवपिष्टम् ७ मधु ८ कषायः ९ पुण्यतीर्थोदकम् १० मण्युदकम् ११ फलम् १२ सुवर्णम् १३ यवाक्षताः १४ ब्रीहयः १५ घृतम् १६ मधु १७ पञ्चामृतम् १८ पुरुषसूक्ताभिमन्त्रितः देवसूक्ताभिमन्त्रितो वा-एतद्युतान् सम्पादयेत् । एवं तीर्थोदकातिरिक्ता

Scanned by CamScanner

अष्टोत्तरशतं कलशाः । १२, ११, १०, १०, ४, ५, ५, ५, १० (८), ८, १८ = १०८ कलशाः । अन्ये चावश्यका भिन्ना लौकिककलशाः ॥१६॥

(जलाधिवासो न कृतश्चेत् स्नपनात्पूर्वं पूर्वोक्तं कुटीरहोमं संपाद्य प्रतिमाः कुशैः संमार्ज्य मधुघृताभ्यङ्गेन देवस्य व्रणभङ्गं दूरीकृत्य पञ्चगव्येन पृथक् संस्नाप्य पुनः संपूज्य प्रतिमारक्षार्थं देवस्य दक्षिणहस्ते ॐ यदाबध्नन्० इति मन्त्रेण हरिद्राक्तं ऊर्णासूत्रं बध्नीयात् )

ततो जलाधिष्ठिताः प्रतिमाः शङ्खतूर्यवेदघोषैः ॐ उत्तिष्ठ ब्रह्मणस्पते० इति मन्त्रेण प्रबोध्य ॐ रथे तिष्ठन्नयति व्वाजिनं ÷ पुरो यत्र यत्र कामयते सुषारथिः । अभीशूनाम्महिमानम्पनायतमनं ÷ पश्चादनु यच्छन्ति रश्मयं ÷ ॥२९-४३॥ इति मन्त्रेण रथादिना जलाधिवासमण्डपात् कर्मकुटीतो देवता मण्डपप्रादक्षिण्येन स्नानमण्डपमानीय पीठे पट्टके वा पूज्यपूजकयोर्मध्ये प्राचीं प्रकल्प्य स्वसम्मुखं प्राङ्मुखीं देवदिगभिप्रायेण स्थापयेत् । तत्रादौ पञ्चगव्येन ॐ नमो नारायणाय (ॐ नमो भगवते वासुदेवाय-ॐ नमो भगवते रुद्राय-ॐ नमो भगवते रामभद्राय-ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे-) इत्यादि तत्तद्देवतामूलमन्त्रेण स्नपनभूमिं वेदिकात्रयञ्च संप्रोक्ष्य दक्षिणवेदिकायां वालुका आस्तीर्य ॐ स्वस्तिनऽइन्द्रो० अनेन व्रीह्यादिना स्वस्तिकं विरच्य तत्र ॐ भद्रं कर्णेभि० इति भद्रपीठं निधाय तत्र ॐ स्तीर्ण्णं बर्हिः सुष्टरीमाजुषाणोरु पृथु प्रथमानम्पृथिव्याम् । देवेभिर्युक्तमदिति ं सजोषां ं स्योनङ्कृण्वाना सुविते दधातु ॥२९-४॥ इति मन्त्रेण वेद्यां कुशाना स्तीर्य देवं स्थापयेत् । प्रतिष्ठोद्योते शुद्धदिगभिप्रायेण प्रत्यङ्मुखमित्युक्तम् ॥

## स्नपनप्रयोगः ।

उदङ्मुखो यजमानः आचम्य प्राणानायम्य । शान्तिपाठादि । जलमादाय-अद्य० पू० तिथौ आसां प्रतिमानां अशुचिदेशकालस्पर्शादिजनितसकलमालिन्यनिवृत्तिपूर्वकं शुचित्वसिद्धये देवकलासान्निध्यहेतवे अर्चाशुद्ध्यर्थं प्रतिष्ठाङ्गभूतं स्नपनविधिं करिष्ये । तत्रादौ गणपतिस्मरणपूर्वकं कलशासादनं करिष्ये । ॐ गणानान्त्वा० गणपतये नमः नमस्करोमि । ततः पूर्णपात्रवर्जं ॐ महीद्यौः० इत्यारभ्य-ॐ तत्त्वायामि० एषु कलशेषु वरुणं आवाहयामि स्थापयामि । कलशान् वरुणं गन्धपुष्पादिभिः सम्पूज्य-ॐ कलशस्य मुखे० ये तीर्थानि० इति सर्वकलशेषु तीर्थान्यावाह्य कलशाभिमन्त्रणम् । उत्तरवेदीपरितोऽष्टकलशान् पूर्वादिक्रमेण स्पृष्ट्वा ॐ हिरण्यगर्भः इत्यष्टमन्त्रैरभिमन्त्रयेत् ।

१ ॐ हिरण्यगर्भ ः समवर्त्तताग्ग्रे भूतस्य जात ः पतिरेकऽआसीत् । सदाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा व्विधेम ॥२३-१॥ २ उपयाम गृहीतोसि प्रजापतयेत्त्वा जुष्टङ्गृह्णाम्येपते योनि ं सूर्य्यस्ते महिमा । यस्तेहन्त्संवत्सरे महिमा सम्बभूव यस्ते व्वायावन्तरिक्षे महिमा सम्बभूव यस्ते दिवि सूर्य्ये महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये स्वाहा देवेब्भ्यः÷ ॥२३-२॥ ३ य ः प्राणतो निमिषतो महित्वैकऽइद्राजा जगतो बभूव । यऽईशेऽअस्य द्विपदश्चतुष्पद ं

कस्मै देवाय हविषा विधेम ॥२३-३॥ ४ उपयामगृहीतोसि प्रजापतये त्वा जुष्टङ्गृह्णाम्येष ते योनिश्चन्द्रमास्ते महिमा। यस्ते रात्रौ संवत्सरे महिमा सम्बभूव यस्ते पृथिव्या मग्नौ महिमा सम्बभूव यस्ते नक्षत्रेषु चन्द्रमसि महिमा सम्बभूव तस्मै ते महिम्ने प्रजापतये देवेभ्य ‹ स्वाहा ॥२३-४॥ ५ युञ्जन्ति ब्रध्नमरुषञ्चरन्तम्परि तस्थुषः। रोचन्ते रोचना दिवि ॥२३-५॥ ६ युञ्जन्त्यस्य काम्या हरी विपक्ष सारथे। शोणा धृष्णू नृवाहसा ॥२६-६॥ ७ यद्वातोऽअपोऽअगनीगन्प्रियामिन्द्रस्य तन्वम्। एत ७ स्तोतरनेन पथा पुनरश्वमावर्त्तयासि न ॥२३-७॥ ८ वसवस्त्वाञ्जन्तु गायत्रेण च्छन्दसा रुद्रास्त्वाञ्जन्तु त्रैष्टुभेन च्छन्दसाऽऽदित्यास्त्वाञ्जन्तु जागतेन च्छन्दसा। भूर्भुव ‹ स्वर्लाजी ३ च्छाचीं ३ न्यव्ये गव्यंऽएतदन्नमत्त देवाऽएतदन्नमद्धि प्रजापते ॥२३-८॥ इत्यष्टकलशाभिमन्त्रणम्।

ततः उत्तरवेद्यामन्तिमपङ्क्तौ स्थापितान् दशकलशान् क्रमेण-१ त्रातारमिन्द्र० २ त्वन्नो अग्ने तव० ३ यमायत्त्वाऽङ्गिरस्वते० ४ असुन्वन्तमयजमान० ५ तत्त्वायामि० ६ आनो नियुद्भिः० ७ वयह सोम० ८ तमीशानं० ९ अस्मे रुद्रा० (ब्रह्मजज्ञानं) १० स्योना पृथिवि० (नमोऽस्तु सर्पेभ्यो०) इति लोकपालमन्त्रैरभिमन्त्रणम्। वासुदेव्युक्त कलशेष्वन्तिममष्टादशं कलशं पुरुषसूक्तेन तत्तद्देवतासूक्तेन वाऽभिमन्त्रयेत् ॥ ततो दक्षिणवेदी समीपस्थित द्वितीयपङ्क्तेरन्तिमं हिरण्यादिसहितं स्थपतिसंज्ञकं द्वादशं कलशमादाय देवसमीपे निधाय तस्मिन् तीर्थान्यावाहयेत्।

ॐ काशी कुशस्थली मायाऽवन्त्योध्या मधोः पुरी। शालिग्रामं सगोकर्णं नर्मदा च सरस्वती ॥१॥ तीर्थान्येतानि कुम्भेऽस्मिन् विशन्तु ब्रह्मशासनात्। झषारुढा सरोजाक्षी पद्महस्ता शशिप्रभा ॥२॥ आगच्छतु सरिज्ज्येष्ठा गङ्गापापप्रणाशिनी। नीलोत्पलदलश्यामा पद्महस्ताम्बुजेक्षणा ॥३॥ आयातु यमुना देवी कूर्मयानस्थिता सदा। प्राची सरस्वती पुण्या पयोष्णी गौतमी तथा ॥४॥ ऊर्मिलाचन्द्रभागा च सरयूर्गण्डकी तथा। जम्बुका च शतद्रूश्च कलिङ्गा सुप्रभा तथा ॥५॥ वितस्ता च विपाशा च शर्मदा च पुनः पुनः। गोदावरी महावर्ता शर्कराऽऽवर्त्तमार्जनी ॥६॥ कावेरी कौशिकी चैव तृतीया च महानदी। विटङ्का प्रतिकूला च सोमनन्दा च विश्रुता ॥७॥ करतोया वेत्रवती देविका वेणुका च या। अत्रिगङ्गा वैतरणी काश्मीरी ह्लादिनी च या ॥८॥ प्लाविनी च शवित्रा सा कल्माषा शंसिनी तथा। वासिष्ठी चाप्यपापा च सिन्धुवत्यारुणी तथा ॥९॥ ताम्रा चैव त्रिसध्या च तथा मन्दाकिनी परा। तैलोष्णी चैव पारा च दुन्दुभिर्नकुली तथा ॥१०॥ नीलगन्धा च बोधा च पूर्णचन्द्रा शशिप्रभा। अमरेशं प्रभासश्च नैमिषं पुष्करं तथा ॥११॥ आषाढी टिष्टिभारत्नं भारभूतं बलाकुलम्। हरिश्चन्द्रं परं गुह्यं मध्यं मध्यमकेश्वरम् ॥१२॥ श्रीपर्वतं समाख्यातं जलेश्वरमतः परम्। आम्रातकेश्वरश्चैव महाकालन्तथैव च ॥१३॥ केदारमुत्तमं गुह्यं महाभैरवमेव च। गया चैव कुरुक्षेत्रं गुह्यं कनखलं तथा ॥१४॥ विमलं चन्द्रहासश्च माहेन्द्रं भीममष्टकम्। वस्त्रापदं रुद्रकोटिं ह्यविमुक्तं महाबलम् ॥१५॥ गोकर्णं भद्रकर्णश्च महेशस्थानमुत्तमम्। छागलाद्यं द्विरण्डं च कर्कोटं मण्डलेश्वरम् ॥१६॥ कालञ्जरवनं चैव देवदारुवनं तथा। शङ्कुकर्णं तथैवेह स्थलेश्वरमतः परम् ॥१७॥ एता नद्यश्च तीर्थानि गुह्यक्षेत्राणि सर्वशः। तानि सर्वाणि कुम्भेऽस्मिन् विशन्तु ब्रह्मशासनात् ॥१८॥ इति तीर्थान्यावाह्य स्थपतिर्यजमानो वा-ॐ ये तीर्थानि प्रचरन्ति सृका

हस्ता निषङ्गिर्णं ÷ । तेषां ७ सहस्रयोजनेव धन्वानि तन्मसि ॥१६-६०॥ ॐ इमम्मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं स च ता परुष्ण्या । असिक्न्या मरुद्वृधे वितस्तयार्जीकीये शृणुह्या सुषोमया ॥ (ऋ०) इति मन्त्राभ्यां देवं स्नपयेत् ।

यजमानो यथाशक्ति शिल्पिवर्गं संपूज्य मण्डपाद् बहिर्दिक्षु प्राच्यां वा सिद्धार्थघृतपायस बलिं दद्यात्-बलिद्रव्याय नमः-इति संपूज्य ॐ त्र्यम्बकं यजामहे० मृतात्-रुद्राय नमः बलिं समर्पयामि । अप उपस्पृश्य देवसमीपमागत्य-सर्षपैः ॐ त्रातारमिन्द्र० इति लोकपालमन्त्रैः ॐ प्राच्यै दिशे स्वाहा० दिशे स्वाहा इति मन्त्रेण वा मण्डपान्तर्दिग्रक्षणं कुर्यात् ।

देवस्याग्रे चतुरो ब्राह्मणानुपवेश्य-जलमादाय-आसां प्रतिमानां अर्चाशुद्धि देवकलासान्निध्य हेतवे स्नपनविध्यभ्युदयार्थं प्रैषात्मकपुण्याहवाचनं करिष्ये । सहिरण्यं पूगीफलमादाय-भो ब्राह्मणाः, प्रतिमाशुद्धिदेवकलासान्निध्यहेतवे करिष्यमाण प्रतिष्ठाङ्गभूतस्नपनकर्मणः पुण्याहं भवन्तो ब्रवन्तु इति त्रिः । कल्याणं० ३ ऋद्धिं० ३ स्वस्ति० ३ श्रीरस्त्विति० ३ । ब्राह्मणाः - अस्तु पुण्याहम् । अस्तु कल्याणम् । कर्म ऋध्यताम् । आयुष्मते स्वस्ति । अस्तु श्रीः - इति प्रतिप्रैषान् क्रमेण दद्युः । ब्राह्मणेभ्यो दक्षिणां दास्ये - दक्षिणां दत्त्वा स्नपनविधिमारभेत । स्नपनकलशेभ्यः किञ्चिद् वारि परिशेष्य पात्रान्तरे संरक्ष्य तेन प्रासादध्वजपिण्डिकाशिखरादि प्रोक्षेत् । उदङ्मुखः प्राङ्मुखो वा यजमानः । स्वसम्मुखः प्रत्यङ्मुखो देवः ।

## दक्षिणवेदी स्नपनम् ।

१ प्रथमेन मृत्तिका कलशेन - ॐ अग्निर्मूर्द्धा दिवः ककुत्पतिः ÷ पृथिव्याऽअयम् । अपा ९ रेतां ९ सि जिन्वति ॥३-१२॥ २ द्वितीयेन कषाय कलशेन-ॐ यज्ञा यज्ञावोऽअग्नये गिरा गिरा च दक्षसे । प्रप्रवयममृतञ्जातवेदसम्प्रियम्मित्रन्नशं ६ सिषम् ॥२७-४२॥ ३ तृतीयेन गोमूत्रकलशेन-ॐ तत्सवितु० (गायत्री त्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह । बृहत्युष्णिहा ककुप्सूचीभिः ÷ शम्यन्तु त्वा ॥२३-३३॥ ४ चतुर्थेन गोमयकलशेन-ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानान्तामिहोपह्वये श्रियम् ॥ (ऋ० परि०) ॥ ५ पञ्चमेन भस्मकलशेन ॐ मानस्तोके तनये मानऽआयुषि मानो गोषुमानोऽअश्वेषु रीरिषः । मा नो व्वीरान्रुद्रभामिनो व्वधीर्हविष्मन्तः सदमित्त्वा हवामहे ॥१६-१६॥ ६ षष्ठेन गन्धोदककलशेन-ॐ ता ९ सवितुर्व्वरेण्यस्य चित्रामाहं व्वृणे सुमतिं व्विश्वजन्याम् । यामस्यकण्वोऽअदुहत्प्रपीना ७ सहस्रधाराम्पयसा महीङ्गाम् ॥१७-७४॥ ततो द्वितीय पङ्क्तिस्थपञ्चदैवत्यैः कलशैः क्रमेण-१ गन्धोदकेन-ॐ नमः ÷ शम्भवाय च मयोभवाय च नमः ÷ शङ्कराय च मयस्कराय च नमः ÷ शिवाय च शिवतराय च ॥१६-४१॥ २ गन्धोदकेन - ॐ ह ६ स ९ शुचिषद्वसुरन्तरिक्षसद्धोता व्वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजाऽऋतजाऽअद्रिजाऽऋतम्बृहत् ॥१०-२४॥ ३ गन्धोदकेन-ॐ याते रुद्र शिवा तनूरघोरा पापकाशिनी । तया नस्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥१६-२॥ ४ गन्धोदकेन - ॐ विष्णोरराटमसि

Scanned by CamScanner

व्विष्ण्णो ॑ श्नप्प्त्रेस्स्थो विष्ण्णो ॑ स्यूरसि व्विष्ण्णोर्द्ध्रुवो सि । व्वैष्ण्णवमसि व्विष्णवेत्त्वा ॥५-२१॥ ५ गन्धोदकेन - ॐ ब्रह्मजज्ञानम्प्रथमम्पुरस्ता द्विसीमत ?? सुरुचो व्वेनऽआवः । स बुध्न्याऽउपमाऽअस्य व्विष्ठाः सतश्श्च योनिमसतश्च व्विवः ॥१३-३॥

ततो देवमूर्ध्नि दूर्वाक्षत पुष्पाणि दद्यात् - ॐ शतं वोऽअम्ब धामानि सहस्रमुतवो रुहः । अधा शतक्क्रत्त्वो यूयमिमम्मेऽ अगदङ्कृत ॥१२-७६॥ सितसूक्ष्मवस्त्रेण देवमाच्छादयेत्-ॐ सुजातो ज्ज्योतिषा सह शर्म्म वरूथमासदत्स्वः । व्वासोऽअग्ग्ने व्विश्वरूप ॑ संव्व्ययस्व व्विभावसो ॥११-४०॥ इति दक्षिणवेदीस्नपनम् ।

## मध्यवेदीस्नपनम् ।

भद्रपीठं स्थापयेत्० ॐ भद्रङ्कर्ण्णेभिः० ॥ तत्र प्रागग्रकुशास्तरणम् - ॐ स्तीर्ण्णं बर्हिः० देवं तत्र निदध्यात्-ॐ इति प्रणवेन । (प्रतिमानां गुरुत्वाचालनासम्भवे स्वस्थानस्थितानामेव विधिः कार्यः ।) यजमानः प्राङ्मुख उदङ्मुखो वा भूत्वा कुङ्कुमाक्तेन सूत्रेण लिङ्गमावेष्टय लिङ्गस्य मध्यभागे मुखं कल्पयित्वा तदुपरि भागे पञ्चसूत्रीविधानेन नेत्रे कनीनिकां पक्ष्मपुटद्वयञ्च कल्पयेत् । प्रतिमानां नेत्रे स्पष्टे एव । सुवर्णादिपात्रे मध्वाज्यञ्च प्रक्षिप्य सुवर्णशलाकया नेत्रोन्मीलनं कुर्यात् । नेत्रपुरत आदर्शं निधाय सन्धार्य दृष्टिपथाज्जनानपसार्य सुवर्णपायसभक्ष्यभोज्यादि पुरतः सन्धार्य प्रथमं दक्षिणनेत्रं सुवर्णशलाकया मध्वाज्याभ्यामुन्मीलयेत् - ॐ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्रस्य व्वरुणस्याग्ग्नेः ॥१३-४६॥ अर्धर्च्चेन-तत ऊर्ध्वाधः पृथग्भूतं पक्ष्मपुटद्वयं कनीनिकाञ्च कल्पयेत्-ॐ आकृष्णेन रजसा व्वर्त्तमानो निवेशयन्नमृतम्मर्त्त्यञ्च । हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्श्यन् ॥३३-४३॥ एवं वामनेत्रमप्यङ्क्त्वा । प्रतिप्रतिमं मन्त्रावृत्त्या नेत्रोन्मीलनं कुर्यात् । (शिल्पी लोहेन उल्लिखेत्-नेत्रयोः पूर्वमेव सम्पादितत्वा दिदं न कार्यम्) ।

ततो गुरुः प्रतिमां मधुसर्पिर्भ्यामभ्यञ्जयेत्-ॐ घृतेन सीता मधुना समज्ज्यतां व्विश्श्वैर्द्देवैरनुमता मरुद्भिः ॥ ऊर्ज्जस्वती पयसा पिन्न्वमानास्मान्त्सीते पयसा ब्भ्याववृत्स्व ॥१२-७०॥ ततः द्वादशमृद्भिः देवं स्नपयेत्-ॐ इदम्विष्ष्णुर्व्विचक्क्रमे त्रेधानिदधे पदम् । समूढमस्य पाᳪसुरे स्वाहा ॥५-१५॥ ततो गोमयेन-ॐ मानस्तोके- हवामहे ॥१६-१६॥ ततः प्रथमवेदीस्थ कलशवद् द्वितीयवेदीस्थकलशैः क्रमेण प्रथमवेदी स्नपनोक्तमन्त्रैः स्नपयेत् । १ मृत्तिका-ॐ अग्निर्म्मूर्धा० । २ कषायः-ॐ यज्ञायज्ञावो० । ३ गोमूत्रम्-ॐ तत्सवितु० (गायत्री त्रिष्टुव०) । ४ गोमयम्-ॐ गन्धद्वारां० । ५ भस्म-ॐ मानस्तोके० । ६ गन्धोदकम्-ॐ ता ९ सवितु० । द्वितीयपङ्क्तिः गन्धोदकैः १ ॐ नमः शम्भवाय० । २ ह ॑ सः शुचिषद्० । ३ याते रुद्र शिवा० । ४ विष्णोरराटमसि० । ५ ब्रह्मजज्ञानं० । ततो यजमानः सुवर्णशलाकां स्नानवस्त्रञ्च शिल्पिने दद्यात् । गुरवे सुवर्णसहितां गां दद्यात् ।

Scanned by CamScanner

## उत्तरवेदीस्नपनम् ।

गुरुरुत्तरस्यां वेद्यां ॐ भद्रं कर्णेभिः इति भद्रपीठं निधाय ॐ स्तीर्णं बर्हिः० इति प्रागग्रान् कुशानास्तीर्य ॐ इति प्रणवेन देवं भद्रासने संस्थाप्य लौकिककलशेन स्नपयेत् - ॐ समुद्रायत्त्वा व्वाताय स्वाहा सरिरायत्त्वा व्वाताय स्वाहा । अनाधृष्यायत्त्वा व्वाताय स्वाहा प्रतिधृष्यायत्त्वा व्वाताय स्वाहा । अवस्यवे त्वाव्वाताय स्वाहा शिमिदायत्त्वा व्वाताय स्वाहा ॥३८-७॥ ततः संपूज्य देवमूर्ध्नि दूर्वापुष्पाक्षतान् दद्यात्-ॐ शतं वोऽअम्ब धामानि सहस्रमुतवो रुहः । अधाशतक्रत्त्वो यूयमिमम्मेऽअगदङ्कृत ॥१२-७६॥ ततो देवं प्रार्थयेत्-ॐ नमस्तेऽर्चे सुरेशानि प्रकृते विश्वकर्मणः । प्रभाविताशेष जगद् धात्रि तुभ्यं नमो नमः ॥१॥ त्वयि संपूजयिष्यामि नारायण (महादेव-जगदम्बा) मनामयम् (मनामयाम्) । रहिताऽशेषदोषैस्त्वं ऋद्धियुक्ता सदा भव ॥२॥ इति प्रार्थ्य (पूर्वं न बद्धं चेदधुना देवदक्षिणहस्ते वितस्तिमात्रं हरिद्राक्तमूर्णासूत्रं-ॐ यदा बद्ध्नन्दाक्षायणा हिरण्य ꣳ शतानीकाय सुमनस्यमानाः । तन्मऽआबध्नामि शतशारदायायुष्माञ्जरदष्टि र्य्यथासम् ॥३४-५२॥ इति मन्त्रेण बध्नीयात् ।) सर्वदेवमयं शान्तं परं ब्रह्म सनातनम् । त्वामेवालङ्करिष्यामि त्वं वन्द्यो भवते नमः ॥ इति प्रणमेत् ।

ततो द्वितीय पङ्क्तिस्थैरन्तिमैश्चतुर्भिः समुद्रसंज्ञितैः कलशैर्देवं स्नपयेत् - १ ॐ इदमापः प्प्रवहतावद्यञ्चमलञ्च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणम् । आपो मातस्म्मादेनसः पवमानश्च मुञ्चतु ॥६-१७॥ (ॐ समुद्रज्येष्ठाः सलिलस्य मध्यात् पुनानायन्त्यनिविशमानाः । इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु ॥ऋ ७-४९-१॥ ॐ समुद्रादूर्म्मि० ॥१७-८९॥) २ ॐ आपो देवी ꣳ प्रति गृभ्णीत भस्म्मैतत्स्योने कृणुद्ध्वꣳसुरभाऽउलोके । तस्म्मै नमन्ताञ्जनयः सुपत्नीर्म्मातेव पुत्रम्बिभृताप्स्वेनत् ॥१२-३५॥ (या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयञ्जाः । समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिहमामवन्तु ॥ऋ० ७-४९-२॥ ॐ अपामिदंन्ययन ꣳ ० शिवो भव ॥१७-७॥) ३ इमम्मे व्वरुणश्रुधीहवं मद्या च मृडय । त्वामवस्युराचके ॥२१-१॥ (यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥ऋ० ७-४९-३॥ समुद्रोऽसि व्विश्वव्यचा० भूयात् ॥५-३३॥ ) ४ ॐ तत्त्वा यामि ब्रह्मणा व्वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो व्वरुणेह बोद्ध्युरुश ꣳ समानऽआयुः प्रमोषीः ॥२१-२॥ (यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदन्ति । वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु ॥ऋ० ७-४९-४॥ ॐ समुद्रे त्वा नृमणा० अवदर्धन् ॥१२-२०॥)

ततः प्रथमद्वितीयपङ्क्तिभ्यां पर्यायेण कलशानादाय स्नपयेत्-१ मृत्तिकाकलशः-ॐ अग्निर्म्मूर्द्धा दिवः ककुत्पतिः पृथिव्व्याऽअयम् । अपा ꣳ रेता ꣳ सि जिन्वति ॥३-१२॥ १ शुद्धकलशेन ॐ देवीरापोऽअपान्नपाद्यो वऽऊर्म्मिर्हविष्ष्यऽइन्द्रियावान्मदिन्तमः । तन्देवेब्भ्यो देवत्रा दत्त शुक्रपेब्भ्यो

येषाम्भागस्त्थ स्वाहा ॥६-२७॥ (वरुणस्योत्तम्भनमसि० सीद ॥४-३६॥) २ दशपलगोमय कलशः-१ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥ऋ० परि॥ २ शुद्धकलशः ॐ अप्सुमे सोमो अब्रवीदन्तर्विश्वानि भेषजा । अग्निश्च विश्वशम्भुवमापश्च विश्वभेषजीः ॥ऋ-१-२३-२०॥

३ द्वादशपल गोमूत्र कलशः - ॐ तत्सवितु० (गायत्री त्रिष्टुब्० । ३ शुद्धकलशः-ॐ आपो हिष्ठामयो भुवस्तानऽऊर्जेदधातन । महे रणाय चक्क्षसे ॥३६-१४॥ ४ मुष्टि संमित भस्म कलशेन-प्रसद्य भस्म्मना योनिमपश्च्च पृथिवीमग्ने । स ह सृज्य मातृभिष्ट्ट्व ज्योतिष्म्मान्पुनराऽसदः ॥१२-३८॥ ४ शुद्ध कलशः-ॐ शन्नोदेवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तुनः ॥३६-१२॥ ५ त्रिपल संमित पञ्चगव्यकलशः - १ पय ÷ पृथिव्यां० (ॐ श्रब्भ्यर्षत सुष्टुतिङ्ग व्यमाजिमस्म्मा सुभद्रा द्रविणानि धत्त । इमं यज्ञन्नयत देवतानो घृतस्य धारा मधुमत्पवन्ते ॥१७-९८॥ ५ शुद्धकलशः - ॐ यो वः ÷ शिवतमो रसस्तस्य भाजयते हनः÷ । उशतीरिव मातरः÷ ॥३६-१५॥ ६ षोडशपल क्षीर कलशः-ॐ आप्यायस्व समेतु ते विश्श्वत ÷ सोमव्वृष्ण्ण्यम् । भवा व्वाजस्य सङ्गथे ॥१२-११२॥ ६ शुद्धकलशाः - ॐ तस्माऽअरङ्गमामवो यस्य क्षयाय जिन्वथ । आपो जनयथाच नः ॥३६-१६॥ ७ पञ्चविंशतिपलदधिकुम्भः - ॐ दधिक्क्राव्णोऽअकारिषञ्जिष्णोरश्वस्य व्वाजिनः÷ । सुरभिनो मुखाकरत्प्रणऽआयूं ७ षितारिषत् ॥२३-३२॥ ७ शुद्धकलशः - ॐ युञ्जानः प्रथमम्मनस्तत्त्वाय सविता धियः÷ । अग्नेज्ज्योतिर्न्निचाय्य पृथिव्व्याऽअद्ध्याभरत् ॥११-१॥ ८ सप्तपल घृतकुम्भः - ॐ घृतवती भुवनानामभि श्रियोर्व्वी पृत्थ्वी मधु दुघे सुपेशसा । द्यावा पृथिवी व्वरुणस्य धर्म्मणा व्विष्कभितेऽअजरे भूरिरेतसा ॥३४-४५॥ ८ शुद्धकलशः - ॐ देवस्यत्त्वा सवितुः प्रसवेश्श्विनो र्व्वाहुब्भ्याम्पूष्णो हस्ताब्भ्याम् । सरस्वत्त्यै व्वाचो यन्तुर्य्यन्त्रेणाग्नेः साम्राज्ज्येना भिषिञ्चामि ॥१८-३७॥ ९ त्रिपलमधुकलशः - ॐ मधुव्वाताऽऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्न्नः सन्त्वोषधीः ॥१३-२७॥ ९ शुद्धकलशः - ॐ आपोऽअस्मान्मातरः ÷ शुन्धयन्तु घृतेन नो घृतप्वः ÷ पुनन्तु । व्विश्वं ह हिरिप्प्रम्प्रवहन्ति देवीरुदिदाब्भ्यः शुचिरापूतऽएमि । दीक्षातपसोस्तनूरसितान्त्वा शिवा ७ शग्ग्माम्परिदधे भद्द्रं व्वर्ण्णम्पुष्ष्यन् ॥४-२॥ १० त्रिपलशर्कराकलशः - ॐ स्वादिष्ठया मदिष्ठया पवस्य सोमधारया । इन्द्राय पातवे सुतः ॥२६-२५॥ १० शुद्धकलशः - ॐ आपो ह यद् बृहतीव्विश्श्वमायन्गर्भन्दधाना जनयन्तीरग्निम् । ततो देवाना ७ समवर्त्ततासुरेकः कस्मै देवाय हविषा व्विधेम ॥२७-२५॥

ततो देवस्य वस्त्रेण सम्मार्जनम् - ॐ यज्ञा यज्ञावोऽअग्नये गिरा गिरा च दक्क्षसे । प्प्रप्रवयममृतञ्जात वेदसम्प्रियम्मित्रन्नशं ह सिषम् ॥२७-४२॥ (प्रत्युष्ट ह रक्षः प्रत्युष्टाऽअरातयो निष्टप्तं ह रक्षो निष्टप्ताऽअरातयः । अनिशितोसि सपत्नक्षिद्वाजिनन्त्वा व्वाजेद्ध्यायै सम्मार्ज्जिम ॥ प्रत्युष्ट ह रक्षः प्रत्युष्टाऽअरातयो निष्टप्तं ह रक्षो निष्टप्ताऽअरातय ः । अनिशितासि सपत्नक्षिद्वा

जिनीन्त्वा व्वाजेद्ध्यायै सम्मार्ज्मि ॥१-२९॥) ॥ सुगन्धितैलेनाभ्यञ्जनम् - ॐ त्र्यम्बकं० मृतात् ॥ यवशालिगोधूममसूरबिल्वचूर्णैरुद्वर्तनम् - ॐ द्रुपदादिव मुमुचान ऽ स्विन्न ऽ स्नातो मलादिव । पूतम्पवित्रेणे वाज्यमापं ÷ शुन्धन्तु मैनस ऽ ॥२०-२०॥ यक्षकर्दमेनानुलेपनम्-(कस्तूरिकाया द्वौ भागौ द्वौ भागौ कुङ्कुम (केशर) स्य च । कर्पूरस्य त्रयो भागाः शशिनस्त्वेक एव हि ॥ शशी-शिलाजित्) ॐ याते रुद्द्रशिवा तनूरघोरा पापकाशिनी । तया न स्तन्वा शन्तमया गिरिशन्ताभिचाकशीहि ॥१६-२॥ जटामांस्या अनुलेपनम्-ॐ याऽओषधी ऽ पूर्व्वा जाता देवेब्भ्यस्त्रियुगम्पुरा । मनैनु बब्भ्रूणामह ऽ शतन्धामानि सप्त च ॥१२-७५॥ ततो लौकिक कलशद्वयेन स्नपनम् - ॐ मानस्तोके तनये मानऽआयुषिमानो गोषुमानोऽअश्श्वेषु रीरिषः । मानो व्वीरान्नुद्द्रभामिनो व्वधीर्हविष्मन्त ऽ सदमित्त्वा हवामहे ॥१६-१६॥ ॐ प्रतद्विष्णुस्तवते व्वीर्य्येण मृगो न भीमः कुचरो गिरिष्ठाः । यस्यो रुषु त्रिषु ‘व्विक्रमणेष्ष्वधिक्षियन्ति भुवनानि व्विश्वा ॥५-२०॥

ततः तृतीयपङ्क्तितः पृथक् पृथक् पञ्चामृतकलशैः, पर्यायेण चतुर्थपङ्क्तितश्च शुध्धोदककलशैः स्नपनम् - १ पयः कलशः - अस्य प्प्रत्नामनुद्द्युतं ऽ शुक्रन्दुं दुह्रेऽअह्रय ऽ । पयं ÷ सहस्रसामृषिम् ॥३-१६॥ १ शुद्धकलशः - ॐ आप्यायस्व समेतु ते व्विश्श्वतं ÷ सोमव्वृष्ण्यम् । भवा व्वाजस्य सङ्गथे ॥१२-११२॥ २ दधिकलशः - ॐ पयसो रूपं यद्यवा दध्नो रूपङ्कर्कन्धूनि । सोमस्य रूपं व्वाजिन ऽ सौम्यस्य रूपमामिक्षा ॥१९-२३॥ २ शुद्रकलशः - ॐ सन्ते पयाᳬसि समु यन्तु व्वाजा ऽ सं वृष्ण्यान्यभिमातिषाहं÷ । आप्प्यायमानोऽअमृताय सोम दिविश्श्रवा ᳬ स्युत्तमानि धिष्ष्व ॥१२-११३॥ ३ घृतकलशः - ॐ घृतेनाञ्जन्त्सम्पथोदेवयानान्प्रजानन्व्वाज्यप्येतु देवान् । अनु त्वा सप्ते प्प्रदिशं ÷ सचन्ता ᳬ स्वधामस्मै यजमानाय धेहि ॥२९-२॥ ३ शुद्धकलशः - ॐ आप्यास्व मदिन्तम सोम व्विश्वभिर ऽ शुभिं÷ । भवा न ऽ सप्प्रथस्तम ऽ सखा व्वृधे ॥१२-११४॥ ४ मधुकलशः - ॐ स्वाहा मरुद्भि ऽ परिश्रीयस्व दिव ऽ स ᳬ स्पृशप्पाहि । मधु मधु मधु ॥३७-१३॥ ४ शुद्धकलशः - ॐ आ ते व्वत्सो मनो यमत्परमाच्चित् सधत्स्थात् । अग्ने त्वाङ्कामया गिरा ॥१२-११५॥ ५ शर्कराकलशः - ॐ स्वादिष्ठया पवस्य सोमधा रया । इन्द्राय पातवे सुतः ॥२६-२५॥ ५ शुद्धकलशः - ॐ तुब्भ्यन्ताऽअङ्गिरस्तम व्विश्श्वा ÷ सुक्षितयः पृथक् । अग्ने कामाय येमिरे ॥१२-११६॥ (अथवा- १ पय ÷ पृथिव्यां० १ वरुणस्योत्तम्भनमसि०, २ दधिक्राव्णो० २ सन्ते पयाᳬसि० ३ घृतम्मिमिक्षे० ३ आप्यायस्व मदिन्तम० ४ मधुव्वाता० ४ तत्त्वायामि० ५ अपाᳬरस० ५ अप्स्वग्ने सधिष्ट्व सौषधीरनुरुद्ध्यसे । गर्ब्भे सञ्जायसे पुनं÷ ॥१२-३६॥ - एतैर्मन्त्रैः पञ्चामृतकलशैः शुद्धोदक कलशैश्च स्नपनं कार्यम् । अथवा गन्धद्वारां० इति एकेनैव मन्त्रेण पञ्चगन्धोदककलशैः स्नपयेत् ।)

ततः पञ्चमपङ्क्तिस्थैः पञ्चभिः कषाय कलशैः ॐ यज्ञायज्ञावो० सिषम्-इति मन्त्रावृत्त्या पृथक् पृथक् स्नपनम् (अथवा एभिः पञ्चमन्त्रैः - १ ॐ अश्श्वत्थेवो निषदन म्पर्ण्णे वो व्वसतिष्कृता । गोभाजऽइत्किला सथयत्सनवथ पूरुषम् ॥१२-७९॥ २ पर्णकषाय निष्पका एता आपो भवन्ति, स्थेम्ने

न्वेव यद्वेव पर्णकषायेण सोमो वै पर्णश्चन्द्रमा उ वै सोम एतदुवा एकमग्निरूपमेतस्यैवाग्निरूपस्योपात्त्यै ॥ शत-कां ६ अ-९ क-१ ॥ ३ औदुम्वरं भवति तेन स्वोभिषिञ्चत्यन्नं वाऽऊर्गुदुम्बर ऊर्ग्वैस्वं यावद् वै पुरुषस्य स्वं भवति नैव तावदशनायति तेनोर्क् स्वं तस्मादौ दुम्बरेण स्वोभिपिञ्चति ॥ ४ नैय्यग्रोधपादं भवति, तेन राजन्योभिपिञ्चति पद्भिर्वैन्यग्रोध ँ प्रतिष्ठितो मित्रेण वै राजन्यः प्रतिष्ठितस्तरमान्नैय्यग्रोधपादेन मित्रो राजन्योऽभिषिञ्चति ॥ ५ आश्वत्थं भवति तेन वैश्योभिपिञ्चति सयद्देवादोश्वत्थे तिष्ठतऽइन्द्रो मरुतऽउपामन्त्रयते तस्मादाश्वत्थेन वैश्योऽभिपिञ्चति ॥

ततो लौकिककलशेन ओषधीयुक्तेन - ॐ या ओषधीः पूर्वा० । द्वितीयेन शान्तिकलशेन लौकिकेन - ॐ द्यौः शान्ति० ॥ ततः षष्ठपङ्क्तिस्थैर्दशभिः कलशैः क्रमेण स्नपनम्-१ सितपुष्पोदकम् - ॐ ओषधीः प्रतिमोदद्ध्वम्पुष्पवतीः प्रसूवरीः । अश्वाऽइव सजित्वरीर्व्वीरुधः पारयिष्ण्वः ॥१२-७७॥ २ अष्टफलकलशः - ॐ या ँ फलिनीर्याऽअफलाऽअपुष्पा याश्च पुष्पिणीः । बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वँ हसः ॥१२-८१॥ ३ सुवर्णजलकलशः - ॐ हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेकऽआसीत् । स दाधार पृथिवीन्द्यामुतेमाङ्कस्मै देवाय हविषा व्विधेम् ॥१३-४॥ ४ गोशृङ्गोदककलशः - ॐ हविष्मतीरिमा आपो हविष्माँ २ ऽ आविवासति । हविष्मान् देवो अद्ध्वरो हविष्माँ २ ऽ अस्तु सूर्य्यः ॥६-२३॥ ५ धान्यकलशः - ॐ धान्यमसि धिनुहि देवान्प्राणायत्त्वोदानायत्त्वा व्यानायत्त्वा । दीर्घामनु प्रसितिमायुषेधान्देवो वः सविता हिरण्ण्य पाणिः प्रतिगृभ्ण्णा त्वच्छिद्रेण पाणिना चक्षुषेत्त्वा महीनाम्पयोऽसि ॥१-२०॥ व्रीहयश्चमे० कल्पन्ताम्) ६ सहस्रधार कलशः - ॐ सहस्रशीर्षा० । ७ सर्वोषधी कलशः - ॐ या ओषधी ँ सोमराज्ञी र्विष्ठिता ँ पृथिवीमनु । बृहस्पतिप्रसूताऽअस्यै सन्दत्त व्वीर्य्यम् ॥१२-९३॥ (या ओषधीः पूर्वा० सप्त च) ८ पञ्चपल्लवोदककलशः - ॐ उतस्मास्यद्रवत स्तुरण्यत ँ पर्ण्णन्नवेरनु वाति प्रगर्द्धिनः । श्येनस्येव ध्रजतोऽअङ्कसम्परिदधिक्राव्णः सहोर्ज्जा तरित्रतः स्वाहा ॥९-१५॥ (नमः पर्णाय च पर्णशदाय च । नमोऽस्तु सर्पेभ्यो०) ९ दूर्वाकलशः - ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः ँ परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥१३-२०॥ १० नव (पञ्च) रत्नकलशः - ॐ परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् । दधद्रत्नानि दाशुषे ॥११-२५॥ (अभित्यं देव ँ०)

(ततो लौकिकेन तीर्थोदककलशेन - ॐ येतीर्त्थानि० । अथवा पञ्चमषष्ठ पङ्क्त्यन्तराले मयूखपरिगणित भिन्नैरष्टभिर्लौकिकैः कलशैः क्रमेण स्नपनम् - इमम्मे० २ तत्त्वायामि० ३ त्वन्नो अग्नेव्वरुणस्य० ४ सत्वन्नो अग्ने० ५ मापो मौषधीर्हि ० उदुत्तमं वरुण० ७ मुञ्चन्तुमा शपत्थ्या० ८ अवभृथ निचुम्पुण० ।)

(ततो वासुदेव्यक्ताष्टादशकलशनिधानं कृतं चेत्, तैः स्नपनम् - १ पाद्यम् - ॐ एतावानस्य० । २ अर्घः-त्रिपादूर्ध्व० । ३ आचमनीयम्-ततो व्विराड० ।४ पञ्चगव्यम्-आयज्ञैः० । ५ दधि-

दधिक्राणो० । ६ यवपिष्टम् - यवोऽसियवया० । ७ मधु - अन्नात् परिस्रुतो० । ८ कषायः - यज्ञायज्ञावो० । ९ पुण्योदकम् - पावकानः० । १० मण्युदकम्-परिवाजपतिः- । ११ फलम्-याः फलिनी० । १२ सुवर्णम् - हिरण्यगर्भः० । १३ यवाक्षताः - धान्यमसि० । १४ व्रीहयः - व्रीहयश्च मे० । १५ घृतम्-घृतवती० । १६ मधु-मधुव्वाता० । १७ पञ्चामृतम्-ऊर्क् च मे० । १८ पुरुषसूक्तेन देवसूक्तेन वा इति वासुदेव्युक्तमष्टादशकलशस्नपनम् )

वेदीपरितः स्थापितसमुद्रसंज्ञकैरष्टभिः कलशैः पूर्वादिक्रमेण देवं स्नपयेत् - १ पूर्व० क्षारोदकम् - ॐ कयानश्चित्रऽआभुव दूती सदावृधः सखा । कया शचिष्ठया व्वृता ॥३६-४॥ २ आग्नेये-क्षीरोदकम्-ॐ आप्यायस्व समेतु ते व्विश्वतः सोमव्वृष्ण्यम् । भवा व्वाजस्य सङ्गथे ॥१२-११२॥ ३ दक्षिणे दध्युदकम्-ॐ दधिक्राव्णोऽअकारिषञ्जिष्णोरश्वस्य व्वाजिनः । सुरभिनो मुखाकरत्प्रणऽआयू ᳪ षि तारिषत् ॥२३-३२॥ ४ नैर्ऋत्ये-घृतोदकम्-ॐ घृतवती भुवनानामभि श्रियोर्व्वी पृत्थ्वी मधुदुघे सुपेशसा । द्यावा पृथिवी व्वरुणस्य धर्म्मणा व्विष्कभितेऽअजरे भूरिरेतसा ॥३४-४५॥ ५ पश्चिमे इक्षुरसोदकम्-ॐ पयः पृथिव्व्यां पयऽओषधीषु पयो दिव्व्यन्तरिक्षे पयोधाः । पयस्वती ᳪ प्रदिशः सन्तु मह्यम् ॥१८-३६॥ ६ वायव्ये सुरोदकम् (गुडमिश्रं पयः) ॐ सिञ्चन्ति परिषिञ्चन्त्युत्सिञ्चन्ति पुनन्ति च । सुरायै बभ्रवे मदे किन्त्वो व्वदति किन्त्वः ॥२०-२८॥ (देवम्बर्हि व्वारितीनामध्वरे स्तीर्ण्णमश्विभ्यामूर्ण्णम्म्रदाः सरस्वत्या स्योनमिन्द्रते सदः । ईशायै मन्न्यु ᳪ राजानम्बर्हिषा दधुरिन्द्रियं व्वसुवने व्वसुधेयस्य व्यन्तु यज ॥२१-५७॥ ७ उत्तरे स्वादूदकम्-ॐ स्वाद्वीन्त्वा स्वादुना तीव्व्रान्तीव्रेण मृताममृतेन । मधुमतीम्मधुमता सृजामि स ᳪ सोमेन । सोमोस्यश्विभ्यांपच्यस्व सरस्वत्यै पच्यस्वेन्द्राय सुत्राम्णे पच्यस्व ॥१९-१॥ ८ ईशान्यां गर्भोदकम् (नारिकेलोदकम्) - ॐ सरस्वती योन्न्याङ्गर्भमन्तरश्विभ्याम्पत्नी सुकृतम्बिभर्त्ति । अपा ᳪ रसेन व्वरुणो न साम्नेन्द्र ᳪ श्रियै जनयन्नप्सु राजा ॥१९-९४॥

ततोऽन्तिमपङ्क्तिस्थैर्लोकपालसंज्ञकैर्दशकलशैः स्नपयेत् - १ कदम्ब० ॐ त्रातारमिन्द्र० । २ शाल्मलि० ॐ त्वन्नो अग्ने तव० । ३ जम्बू० ॐ यमायत्त्वाङ्गिर० । ४ अशोक० ॐ असुन्वन्तमयज० । ५ प्लक्ष० ॐ तत्त्वायामि० । ६ आम्र० ॐ आनो नियुद्भिः० । ७ वट० ॐ वय ᳪ सोम० । ८ विल्व० ॐ तमीशानं० । ९ पलाश० ॐ ब्रह्मजज्ञानं० । (अस्मे रुद्रा०) १० नागचम्पक० ॐ नमोऽस्तु सर्पेभ्यो० (स्योना पृथिवि०) (ऋग्वेदिनां-९ नमोस्तु सर्प्पेभ्यो० १० ब्रह्मजज्ञानं० इति क्रमः)

ततः सुमङ्गलघोषैः सुवासिनीभिः चतुर्भिर्लौकिकैरेकेन वा लौकिकेन कलशेन देवं स्नपयेत् - ॐ द्यौः शान्तिः० यतो यतः० पालाशं भवति० औदुम्बरं भवति० नैय्यग्रोधपादं० आश्वत्थं भवति० यद्देवकल्याञ्जु० सर्वेषां वाऽएष० ॥ एवं देवं संस्नाप्य सम्मार्ज्य संशोध्य पूजनं कुर्यात् ॥ (मयूखोक्ताः कलशाः - ९० वासुदेव्युक्ताः - १८ लौकिकाः -१६ ॥)

Scanned by CamScanner

ततः सुगन्धिना सितवस्त्रेण देवं परिमृज्य संकलीकरणम्-प्रतिमाङ्गानि स्पृष्ट्वा - १ हृदयाय नमः २ शिरसे स्वाहा ३ शिखायै वषट् ४ कवचाय हुम ५ नेत्रत्रयाय वौषट् ६ अस्त्राय फट् ॐ विश्वतश्चक्षु० इति मन्त्रेण दक्षिणहस्ततर्जनीं प्रतिमापरितो भ्रामयेत्-इति संकलीकरणम् । ततः पूजनम् ।

आवाहनम्-एह्येहि भगवन् देव लोकानुग्रहकाम्यया । यज्ञभागं गृहाणेमं देवदेव नमोऽस्तुते । ('विरोधेऽर्थस्तत्परत्वात्' इतिन्यायेन पद्धत्युक्तपूजनव्युत्क्रमं परिवर्त्य क्रमेण पूजनम्) । आसनम्-ॐ पुरुष एवेद ६ ० । पाद्यम्-ॐ हिरण्यवर्णां० । अर्धः - ॐ ततो व्विराड् । आचमनीयम् - ॐ विभ्राड्० । स्नानाम् - ॐ तस्माद्यज्ञात् सर्वहुतः० । वस्त्रम् - ॐ अभिधा असि० (युवासु वासाः०) । यज्ञोपवीतम् - ॐ वेदाहमेतं० । गन्धः - ॐ त्र्यम्बकं० । पुष्पमाला - ॐ इदं विष्णु० । धूपः - ॐ धूरसि० । दीपः - ॐ चन्द्रमा मनसो० । नैवेद्यम् - ॐ अन्नपते० । आचमनम् । ताम्पूलपूगीफलदक्षिणाः - ॐ यत्पुरुषेण० ॐ याः फलिनीर्या० ॐ हिरण्यगर्भः० । प्रदक्षिणा - ॐ सप्तास्या० । मन्त्रपुष्पाञ्जलिः० यज्ञेन यज्ञ० । प्रार्थना - ॐ अद्भ्यः सम्भृतः० इषाण - ६।। स्नानवस्त्रं नैवेद्याद शिल्पिने दद्यात् ।

ततः सामिधेनीकल्पेन देवं स्तुवीत-ॐ हिं ॐ भूः ॐ भुवः ॐ स्वः - ॐ सगस्रशीर्षा० ङ्गुलोम् २ पुरुष० तोम् । ३ एतावानस्य० दिवोम् । ४ त्रिपोदूर्ध्व० अभोम् । ५ ततो व्विराड० पुरोम् । ६ तम्माद्यज्ञात् सर्वहुतः० ग्राम्याश्चयोम्-७ तस्माद्यज्ञासर्वहुत ऋचः० दजायतोम् । ८ तस्मादश्वा० जावयोम् । ९ तं यज्ञं० ऋषयश्च योम् । १० यत्पुरुषं० उच्येतोम् । ११ ब्राह्मणोऽस्य० शरद्धवोम् । १५ सप्तास्या० पशोम् । १६ यज्ञेन० देवोम् १७ यज्ञेन० देवोम्० १८ यज्ञेन० देवोम्-इत्यन्तिमामृचं मन्द्रमध्यतारस्वैर्ब्रयात् ।।

जलमादाय - स्नपनकर्मसाङ्गतासिद्ध्यर्थ ब्राह्मणेभ्यो दक्षिणां दास्ये । प्रतिमासु अर्चाशुद्धिपूर्वकं देवदिव्यकलातेजोऽभिवृद्धये कृतेन स्नपनकर्मणा सपरिवारः स्थाप्यदेवः प्रीयताम् ।। (स्नपनविधावन्येऽपि भेदा ग्रहीतुं शक्यन्ते ।)

।। इति स्नपनविधिः ।।

## ५२ मण्डपे शय्यारचनम् ।

ततः सर्वतोभद्रकुण्डयोरन्तराले मध्यवेद्यां प्रतिमानां गुरुत्वादन्यत्र वा पर्यङ्के वा पट्टके तूलिकामुपधानमास्तरणमच्छादनयुतां शय्यां विरचय्य तत्र धान्य-फल-पुष्प-औषधी खाद्यान्नानि निधाय शय्यायां व्रीहीन् गोधूमाँस्तण्डुलान् वा प्रक्षिप्य ॐ रथे तिष्ठन्० इति देवप्रतिमा आदाय शाकुन्तसूक्तं भद्रसूक्तं वा पठन् मण्डपप्रादक्षिण्येन पश्चिमद्वारि आनीय-सम्पूज्य ॐ धामन्ते विश्वं, इत्यर्धं दत्त्वा शय्यायां प्राक्शिरस्कां दक्षिण शिरस्कां वा प्रतिमां शनैः शाययेत् । ॐ आप्यायस्व० इति

Scanned by CamScanner

मधुसर्पिर्भ्यामभ्यज्य ॐ याते रुद्र शिवातनू० तैलसर्षपकल्कैरुद्वर्त्य गन्धादिना सम्पूज्य तत्र-छत्रं-ॐ बृहस्पतेच्छदिरसि पाप्मनो मामन्तर्धेहि तेजसो यशसो मान्तर्धेहि । वितानं-ॐ मर्माणि ते० । व्यजनम्- आनो नियुद्भिः० । चामरम्-वायो येते० । आदर्शः-ॐ रोचिष्णुरसि । ॐ त्रीणि पदा० इति शान्तिकुम्भौ । पादुके-ॐ प्रतिष्ठेस्थो विश्वतो मा पातम् । शिरः प्रदेशे सजलं निद्राकलशं-अन्यश्च भक्ष्यभोज्यादि खाद्यपूरितं कलशं० आजिघ्र० इति स्थापयेत् । अग्रतः सुवर्चसं दीपं दूरे स्थापयेत् । देवमाच्छादनतूलिकयाऽच्छाद्य परितो भस्मदर्भतिलैः प्राकारत्रयं कुर्यात् ।

## ५३ तत्त्वन्यास होमः ।

कुण्डसमीप उपविश्य-जलमादाय-आसु प्रतिमासु सूर्याचन्द्रमसौ यावत् तत्त्वानामाप्यायनार्थं तत्त्वन्यासहोमं करिष्ये-इति संकल्प्य प्रतितत्त्वं ॐ अकाराय स्वाहा-इत्यादि साधारणैर्विशिष्टैश्च तत्त्वैः तत्तन्नाम्ना घृतेन तिलैर्वा जुहुयात् । एतावदसम्भवे-प्रधानदेवतामुद्दिश्य (ॐ पराय विष्ण्वात्मने स्वाहा, ॐ पराय शिवात्मने स्वाहा, ॐ पराय शक्त्यात्मने स्वाहा, ॐ पराय सूर्यात्मने स्वाहा, ॐ पराय गणेशात्मने स्वाहा, ॐ पराय हनुमदात्मने स्वाहा, ॐ पराय रामात्मने स्वाहा-इत्यादिदेवताविशेषोहं कृत्वा १०८ अष्टोत्तरशताहुतीर्जुहुयात्-अनेन तत्त्वानामाप्यायनार्थ कृतेन तत्त्वन्यासहोमकर्मणा तत्त्वन्यासकर्मणि अधिकारसिद्धिरस्तु । ततो यजमानमन्यं वा देवसमीपे उपावेश्य-तत्त्वन्यास शय्याधिवासनिद्रावाहनान्तं कर्म सम्पादयेत् ।

## ५४ मूर्त्तिमूर्त्तिपतिलोकपालावाहनम् ।

कुण्डस्यैशान्यां सजलं शान्तिकलशं निधाय तदुत्तरे सजले सपूर्णपात्रपूगीफले कलशे मूर्त्तिमूर्त्तिपतिलोकपालानावाहयेत् । १ ॐ पृथिवीमूर्त्तये नमः पृथिवीमूर्त्तिम् आवाहयामि स्थापयामि । २ पृथिवीमूर्त्यधिपतये शर्वाय० शर्वम्० । ३ इन्द्राय० इन्द्रम्० । ४ अग्निमूर्त्तये० अग्निमूर्त्तिम्० । ५ अग्निमूर्त्यधिपतये पशुपतये० पशुपतिम्० । ६ अग्नये० अग्निम्० । ७ यजमानमूर्त्तये० यजमानमूर्त्तिम्० । ८ यजमानमूर्त्यधिपतये उग्राय० उग्रं० । ९ यमाय० यमम्० । १० सूर्यमूर्त्तये० सूर्यमूर्त्तिम्० । ११ सूर्यमूर्त्यधिपतये रुद्राय० रुद्रं । १२ निर्ऋतये० निर्ऋतिम्० । १३ जलमूर्त्तये० जलमूर्त्तिम्० । १४ जलमूर्त्यधिपतये भवाय भवम्० । १५ वरुणाय० वरुणम्० । १६ वायुमूर्त्तये० वायुमूर्तिम्० । १७ वायुमूर्त्यधिपतये ईशानाय० ईशानम्० । १८ वायवे० वायुम्० । १९ सोममूर्त्तये० सोममूर्तिम्० । २० सोममूर्त्यधिपतये महादेवाय० महादेवं० । २१ सोमाय० सोमम्० । २२ आकाशमूर्त्तये० आकाशमूर्त्तिम्० । २३ आकाशमूर्त्यधिपतये भीमाय० भीमम्० । २४ ईशानाय० ईशानं० ॐ मनोजूति० मूर्त्तिमूर्त्तिपति लोकपालाः सुप्रतिष्ठिता) वरदाः भवत । ॐ मूर्त्तिमूर्त्यधिपतिलोकपालेभ्यो नमः - इति पञ्चोपचारैः पूजनम् । अनेन पूजनेन मूर्त्तिमूर्त्तिपति लोकपालाः प्रीयन्ताम् ।

Scanned by CamScanner

## ५५ पञ्चकुण्डीपक्षे नवकुण्डीपक्षे च मूर्त्तिमूर्त्तिपतिलोकपालावाहनव्यवस्था ।

पञ्चकुण्डीपक्षे नवकुण्डीपक्षे चाचार्यकुण्डैशान्यां मूर्त्तिमूर्त्तिपतिलोकपालानामावाहनं न भवति । तत्र पञ्चकुण्डीपक्षे पूर्वकुण्डैशान्यां (शुद्धवायव्याम्-१ पृथिवीमूर्त्तये० २ पृथ्वीमूर्त्यधिपतये शर्वाय० ३ इन्द्राय० ४ अग्निमूर्त्तये० ५ अग्निमूर्त्यधिपतये पशुपतये० ६ अग्नये० इति षण्णां कलशे आवाहनम् । दक्षिणकुण्डैशान्यां (शुद्धवायव्यां) कलशे - १ यजमानमूर्त्तये० २ यजमानमूर्त्यधिपतये उग्राय० ३ यमाय० ४ सूर्यमूर्त्तये० ५ सूर्यमूर्त्यधिपतये रुद्राय० ६ निर्ऋतये० इति षण्णामावाहनम् । पश्चिमकुण्डैशान्यां कलशे-१ जलमूर्त्तये० २ जलमूर्त्यधिपतये भवाय० ३ वरुणाय० ४ वायुमूर्त्तये० ५ वायुमूर्त्यधिपतये ईशानाय० ६ वायवे० इति षण्णामावाहनम् । उत्तरकुण्डैशान्यां कलशे - १ सोममूर्त्तये० २ सोममूर्त्यधिपतये महादेवाय० ३ सोमाय० ४ आकाशमूर्त्तये० ५ आकाशमूर्त्यधिपतये भीमाय० ६ ईशानाय० इति षण्णामावाहनम् ।

नवकुण्डीपक्ष आचार्यकुण्डं विहाय पूर्वादिक्रमेण कलशे - एकैकमूर्त्तिमूर्त्यधिपति लोकपालानामावाहनम् । १ पूर्वकुण्डैशान्यां १ पृथिवीमूर्त्तये० २ पृथिवीमूर्त्यधिपतये शर्वाय० ३ इन्द्राय० । आग्नेयकुण्डैशान्यां - १ अग्निमूर्त्तये० २ अग्निमूर्त्यधिपतये पशुपतये० ३ अग्नये० । दक्षिणकुण्डैशान्यां- १ यजमानमूर्त्तये० २ यजमानमूर्त्यधिपतये उग्राय० ३ यमाय० । नैर्ऋत्यकुण्डैशान्यां - १ सूर्यमूर्त्तये० २ सूर्यमूर्त्यधिपतये रुद्राय० ३ निर्ऋतये० । पश्चिमकुण्डैशान्यां - १ जलमूर्त्तये० २ जलमूर्त्यधिपतये भवाय० ३ वरुणाय० । वायव्यकुण्डैशान्यां - १ वायुमूर्त्तये० २ वायुमूर्त्यधिपतये ईशानाय० ३ वायवे० । उत्तरकुण्डैशान्यां - १ सोममूर्त्तये० २ सोममूर्त्यधिपतये महादेवाय० ३ सोमाय० । ईशानकुण्डैशान्यां - १ आकाशमूर्त्तये० २ आकाशमूर्त्यधिपतये भीमाय० ईशानाय० एवं आवाह्य पूजयेत् । उभयपक्षयोः शान्तिकलश आवश्यकः ।

(शैवे पञ्चमूर्त्तिपक्षे वैष्णवे पञ्चमूर्त्तिपक्षे मूर्त्तयो मूर्त्यधिपतयश्च देवताप्रकरणे निरूपिताः । एवं विष्णु-गणेश-देवी-सूर्याणामष्टमूर्त्तयो मूर्त्यधिपतयस्तत्तन्मन्त्रा अपि मन्त्रप्रकरणे निगदिताः । एवं ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदानां पृथक् पृथक् मूर्तिमूर्त्यधिपतिलोकपालमन्त्राः शान्तिकपौष्टिकहोममन्त्रा विभिन्नदेवतापरिवारादीनां ऋग्वेदकृष्णयजुर्वेदशुक्लयजुर्वेदसामवेदाथर्ववेदतन्त्रागमपुराणाद्युक्ता विभिन्ना मन्त्रा मन्त्रप्रकरणतोऽनुसन्धेयाः )

## ५६ द्वारपालजाप्यसूक्तानि ।

द्वारपालजाप्यसूक्तानि-पूर्वद्वार ऋग्वेदिनौ-होमे प्रवर्तमाने यावद्धोमं सकृत्पुनः पुनर्वा जपं कुर्याताम् । ऋग्वेदिनौ - १ श्रीसूक्तम् २ पावमानम् ३ सोमसूक्तम् ४ शाकुन्तसूक्तम् ५ शान्तिसूक्तानि ६ इन्द्रसूक्तम् ७ राक्षोघ्नम् । दक्षिणे कृष्णयजुर्वेदिनौ - १ रुद्रसूक्तम् २ पुरुषसूक्तम् ३ श्लोकाध्यायः

Scanned by CamScanner

(देवसवितः प्रसुव० ४ ब्रह्मविद् भृगुः० । ५ शुक्रियं-युञ्जते० मण्डलाध्यायः - ६ आदित्यो वा यपयन्० । शुक्लयजु० १ नमस्ते० २ सहस्रशीर्षा० ३ देवसवितः प्रसुव० ४ ऋचं वाचं० । ५ मण्डल ब्राह्मणम् - यदेतन्मण्डलम्० । पश्चिमे सामवेदिनौ - १ वामदेव्यम् २ बृहत् ३ ज्येष्ठ ४ रथन्तर ५ पुरुषसूक्त ६ रुद्रसूक्त ७ आज्यदोह ८ शान्त्यध्याय ९ भारुण्डसामानि । उत्तरे अथर्ववेदिनौ-१ अथर्वाङ्गिरस २ नीलसूक्त ३ रुद्रसूक्त ४ अपराजित ५ देवीसूक्त ६ मधुसूक्त ७ रोधस ८ शान्तिसूक्तानि ॥

## ५७ होमप्रकरणम् ।

संस्कारयोग्यमाज्यचर्वादिकं हविरग्नावधिश्रित्य स्रुक्स्रुवौ प्रपत्य संमार्जनकुशैः संमार्ज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणदेशे स्थापयेत् । आज्यादिकमुद्वास्य पवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य अन्यानि हवींषि प्रोक्ष्य होममारभेत ।

## ५८ शान्तिकपौष्टिकहोमः ।

तत आचार्यः पलाशोदुम्बराश्वत्यशम्यपामार्गसमिधां प्रत्येकं षोडशाधिकशतद्वयं कुण्डसमीपे दधिमधुघृतप्लुतं निधाय - ॐ हिरण्यगर्भः० विधेम-इत्यमिमन्त्र्य शान्तिकैः पौष्टिकैश्च मन्त्रैर्यथाविभागं सऋत्विग् जुहुयात् । एवं पलाशादिकाः समिधः २१६ x ५ = १०८० अशीत्युत्तर सहस्रसंख्याका भवन्ति । शान्तिकपौष्टिकमन्त्रानुद्दिश्य अनेकेषां मन्त्राणां निर्देशो विभागः स्वीकारश्च शास्त्रार्थप्रकरणे बहुधा विचारितः स ततोऽनुसन्धेयः । समिधां सर्वथाऽलाभे यवैस्तदभावे तिलैर्वा होमः कार्यः ।

विभागश्चेत्थम्-अष्टादश ब्राह्मणानुपवेश्य त्रिंशद्वारं ३० शान्तिकमन्त्रैः त्रिंशद्वारं ३० पौष्टिकमन्त्रैश्च होमो मन्त्रसमुदायान्ते । द्वादश ब्राह्मणोपवेशने ४५ वारं शान्तिकैः ४५ वारं पौष्टिकैश्च होमः । नव ब्राह्मणोपवेशने ६० वारं शान्तिकैः ६० वारं पौष्टिकैश्च होमः । एवं १०८० आहुतयो भवन्ति । अन्यदेवेषु देवतामन्त्रप्रकरणे सम्पूर्णा मन्त्रास्तत्र द्रष्टव्याः ।

### शान्तिकमन्त्राः ।

१ ॐ शन्नो व्वातः पवताᳪशन्नस्तपतु सूर्य्यः । शन्नः कनिक्रदद्देवः पर्ज्जन्यो अभिवर्षतु ॥३६-१०॥ २ अहानिशम्भवन्तु नः शᳪ रात्रीः प्रतिधीयताम् । शन्नऽइन्द्राग्नी भवतामवोभिः शन्नइन्द्रावरुणा रातहव्या । शन्नऽइन्द्रा पूषणा व्वाजसातौ शमिन्द्रा सोमा सुविताय शँय्योः ॥३६-११॥ ३ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शँय्योरभिस्रवन्तु नः ॥३६-१२॥ ४ द्यौः शान्तिरन्तरिक्षᳪ शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः । व्वनस्पतयः शान्तिर्व्विश्वेदेवाः शान्तिर्ब्रह्म शान्तिः सर्व्वᳪ शान्तिः शान्तिरेव शान्तिः सा मा शान्तिरेधि-स्वाहा ॥३६-१७॥

**पौष्टिकमन्त्राः ।**

१ अयमग्निः पुरीष्यो रयिमान् पुष्टिवर्द्धनः । अग्ने पुरीष्याभिद्युम्नमभि सहऽआयच्छस्व ॥३-४०॥ २ त्र्यम्बकं यजामहे सुगन्धिम्पुष्टिवर्द्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात् । त्र्यम्बकं यजामहे सुगन्धिम्पतिवेदनम् । उर्वारुकमिव बन्धना दितो मुक्षीय मामुतः ॥३-६०॥ ३ शिवो नामासि स्वधितिस्ते पितानमस्तेऽअस्तु मा मा हि ँ सीः । निवर्त्तयाम्म्यायुषेन्नाद्याय प्रजननाय रायस्पोषाय सुप्रजास्त्वाय सुवीर्य्याय - स्वाहा ॥३-६३॥

(मयूखे-१ शन्नो वातः० २ शन्न इन्द्राग्नी० ३ शन्नो देवी० शान्तिकाः । पद्मनाभे-१ शन्नो वातः० २ शन्न इन्द्राग्नी० ३ शन्नो देवी० ४ द्यौः शान्तिरित शान्तिकाः । त्रिविक्रमे १ शन्नो वातः० २ शन्न इन्द्राग्नी० ३ शन्नो देवी० ४ द्यौ शान्तिः० ४ शान्तिकाः । प्रतिष्ठासङ्ग्रहे १ शन्नो वातः० २ शन्न इन्द्राग्नी० ३ शन्नो देवी० ३ शान्तिकाः । मयूखे पौष्टिकाः-१ अयमग्निः० २ गयस्फानो० ३ त्र्यम्बकं०-३ ॥ पद्मनाभे-१ अयमग्निः० २ गयस्फानोः अमीवहा० ३ इहपुष्टिं० ४ त्र्यम्बकं ४ मन्त्राः पौष्टिकाः । त्रिविक्रमे-१ अयमग्निः० २ गयस्फानो अमीवहा वसुवित् पुष्टि वर्धनः । सुमित्रः सोम नो भव ॥ ऋ० १-९२-१२ ॥ ३ इह पुष्टिं० ४ पुष्टि र्नरण्वान्० ५ त्र्यम्बकं० ५ पौष्टिकाः - सङ्ग्रहे १ पुष्टिर्न रण्वा क्षितिर्न पृथ्वी । गिरिर्न भुज्म क्षोदो नः शंभु ॥ऋ० १-६५-५॥ २ गयस्फानो० ३ गयस्फानः प्रतरणः० ४ शिवो नामासि० ५ त्र्यम्बकं० मामुतः - ५ पौष्टिकाः । एतद्विचारो देवतामन्त्रप्रकरणे कृतः )

## ५९ मूर्त्तिमूर्त्तिपतिलोकपालहोमः ।

ततो मूर्तिपा ऋत्विज एककुण्डे पलाशसमिद्भिराज्येन तिलैर्वा प्रत्येकं १०८ वा २८ संख्यया जुहुयात् । पञ्चकुण्ड्यामाचार्यकुण्डं विहाय पूर्वदक्षिणपश्चिमोत्तरकुण्डेषु मूर्त्तिमूर्त्तिपति लोकपालानां द्वयं द्वयं जुहुयात् । नवकुण्ड्यामाचार्यकुण्डं विहाय पूर्वाद्यष्टकुण्डेष्वेकैकान् मूर्त्तिमूर्त्तिपतिलोकपालानुद्दिश्य जुहुयात् ।

एककुण्डेऽष्टोत्तरशतपक्षेऽष्टादशब्राह्मणाः षड्वारं द्वादशब्राह्मणा नववारं, नवब्राह्मणा द्वादशवारं प्रत्येकांमूर्तिम्, मूर्त्तिपतिं, लोकपालश्चोद्दिश्य जुहुयात् ।

१ पृथिवीमूर्त्तिः - ॐ स्योना पृथिवि नो भव नृक्षरा निवेशनी । यच्छानः शर्म्म सप्रथाः स्वाहा ।

२ शर्वः - ॐ नम ÷ शर्वाय च पशुपतये च स्वाहा । (अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः स्वाहा) ।

३ इन्द्रः - ॐ त्रातारमिन्द्रमवितारमिन्द्र ँ हवे हवे सुहव ँ शूरमिन्द्रम् । ह्वयामिशक्रम्पुरुहूतमिन्द्र ँ स्वस्तिनो मघवा धात्विन्द्र ÷ स्वाहा ।

४ अग्निमूर्त्तिः - ॐ अग्निन्दूतम्पुरो दधे हव्व्यवाहमुपब्ब्रुवे । देवाँ २ आसादयादिह-स्वाहा ॥

५ पशुपतिः - ॐ तेजः पशूना ᳪ हविरिन्द्रियावत्परिस्रुता पयसा सारघम्मधु । अश्विभ्यान्दुग्धम्भिषजा सरस्वत्या सुतासुताब्भ्याममृतः सोमऽइन्दुः-स्वाहा ।

६ अग्निः - ॐ अयन्ते योनिर्ऋत्त्वियोयतो जातोऽअरोचथाः । तञ्जानन्नग्नऽआरोहाथानो ब्बर्द्धया रयिम्-स्वाहा । (अग्न आयाहि वीतये गृणानो हव्यदातये । निहोता सत्सि बर्हिषि-स्वाहा) साम० ।

७ यजमानमूर्त्तिः - ॐ सुवीरो व्वीरान्प्रजनयन्परी ह्यभि रायस्पोषेण यजमानम् । सञ्जग्मानो दिवा पृथिव्व्या शुक्रः शुक्रशोचिषा निरस्तः शण्डः शुक्रस्याधिष्ठानमसि-स्वाहा ।

८ उग्रः - ॐ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँश्चाभियुग्वा च विक्षिपः स्वाहा ।

९ यमः - ॐ यमाय त्त्वाङ्गिरस्वते पितृमते स्वाहा । स्वाहा धर्म्माय स्वाहा धर्म्मः पित्रे - स्वाहा ।

१० सूर्यमूर्त्तिः - ॐ उदुत्त्यञ्जातवेदसन्देवं व्वहन्ति केतवः । दृशे व्विश्श्वाय सूर्य्यम्-स्वाहा ।

११ रुद्रः - ॐ इमा रुद्राय तवसे कपर्द्दिने क्षयद्वीराय प्रभरामहे मतीः । यथा शमस द्द्विपदे चतुष्प्पदे व्विश्श्वम्पुष्टङ्ग्रामेऽ अस्मिन्ननातुरम् - स्वाहा ।

१२ निर्ऋतिः - ॐ असुन्वन्तमयजमानमिच्छ स्तेनस्येत्त्यामन्विहि तस्करस्य । अन्यमस्मदिच्छ सा त ऽ इत्त्या नमो देवि निर्ऋतेतुब्भ्यमस्तु - स्वाहा ।

१३ जलमूर्त्तिः - ॐ आपो हिष्ठा मयो भुव स्तानऽऊर्ज्जे दधातन । महेरणाय चक्षसे-स्वाहा ।

१४ भवः - ॐ नमो भवाय च रुद्राय च-स्वाहा । नमो बब्भ्लुशाय व्व्याधिनेन्नानाम्पतये नमो नमो भवस्य हेत्त्यै जगताम्पतये नमो नमो रुद्रायाततायिने क्षेत्राणाम्पतये नमो नमः सूताया हन्त्यै व्वनानाम्पतये नमः - स्वाहा ।

१५ वरुणः - ॐ इमम्मे व्वरुण श्श्रुधी हवमद्या च मृडय । त्वामवस्युराचके स्वाहा ।

१६ वायुमूर्त्तिः - ॐ तव व्वायवृतस्पते त्त्वष्टुर्ज्जामातरद्भुत । अवाᳪस्या वृणीमहे-स्वाहा ।

१७ ईशानः - ॐ तमीशानं जगतस्तस्त्थुषस्पति न्धियञ्जिन्वमवसे हूमहे व्वयम् । पूषा नो यथा व्वेद सामसद्वृधे रक्षिता पायुरदब्धः स्वस्तये - स्वाहा ।

१८ वायुः - ॐ आनो नियुद्भि ÷ शतिनी भिरध्ध्वर ३ सहस्रिणी भिरुप याहि यज्ञम् । व्वायोऽअस्मिन्त्सवने मादयस्व यूयम्पात स्वस्तिभि ः सदा न ः स्वाहा ॥

१९ सोममूर्त्तिः - ॐ व्वयःसोम व्व्रते तव मनस्तनूषु विब्भ्रतः । प्रजावन्त ः सचेमहि स्वाहा ।

२० महादेवः - उग्रँ ल्लोहितेन मित्र ३ सौव्व्रत्येन रुद्रन्दौर्व्व्रत्येनेन्द्रम्प्रक्रीडेन मरुतो बलेन साद्ध्यान्प्रमुदा । भवस्य कण्ठ्य ३ रुद्रस्यान्त ः पाश्र्व्य ः म्महादेवस्य यकृच्छर्व्वस्य व्वनिष्ठु ऽ पशुपतेः पुरीतत् स्वाहा ।

२१ सोमः कुबेरः - ॐ अभित्यन्देव ३ सविता रमोण्ण्योः ÷ कविक्रतु मर्च्चामि सत्य सव ३ रत्क्न धामभिप्रियम्मतिङ्कविम् । ऊर्ध्वा यस्यामतिर्ब्भाऽअदिद्युतत्सवीमनि हिरण्ण्यपाणि रमिमीत सुक्रतु ÷ कृपास्व ÷ । प्रजाव्भ्यस्त्वा प्प्रजास्त्वानु प्प्राणन्तु प्प्रजास्त्व मनुप्प्राणिहि - स्वाहा ।

२२ आकाशमूर्त्तिः - ॐ आदित्यङ्गर्भम्पयसा समङ्ग्धि सहस्रस्य प्प्रतिमां व्विश्वरूपम् । परिवृङ्ग्धि हरसा माभिमं ४ स्था ः शतायुषङ्कृणुहि चीयमान ः - स्वाहा ।

२३ भीम - ॐ मृगो न भीम ऽ कुचरो गिरिष्ठा ऽ परावतऽआ जगन्था परस्या ः । सृक ३ स ३ शाय पविमिन्द्रतिग्गमं व्विश-त्रून्ताढि व्विमृधोनुदस्व-स्वाहा ।

२४ ईशान - ॐ अभित्त्वा शूरनोनुमो दुग्ग्धाऽइव धेनव÷ । ईशानमस्य जगत ः स्वर्द्दशमी शानमिन्द्र तस्त्थुष ÷ - स्वाहा । (अभित्वादेव सवितरीशानं वार्याणाम् । सदावन् भागमीमहे - स्वाहा-ऋग्वेदस्य)

(एवं ऋग्वेदादीनां मूर्त्तिमूर्त्यधिपति लोकपालानां तत्तद्वेदनिगदिता, मन्त्राः गणेश-देवी-सूर्य-विष्णूनां भिन्ना मूर्त्यधिपतयः तेषां मन्त्राश्च, शैवे वैष्णवे च पञ्चमूर्त्ति पञ्चमूर्त्यधिपति स्वीकारे तत्तमन्त्राः, प्राङ्निर्दिष्टे देवतामन्त्र प्रकरणे, अन्य देवतामन्त्राश्च पुनः, सर्वे तत्र द्रष्टव्याः) इति मूर्त्तिमूर्त्यधिपति लोकपाल होमः ।)

## ६० स्थाप्यदेवता होमः ।

स्थाप्यदेवतालिङ्गकेन मन्त्रेण घृतेन तिलैर्वा अष्टोत्तर सहस्राष्टोत्तर शतान्यतर संख्यया प्रतिदैवतं जुहुयात् । स्थाप्यदेवतालिङ्गका ऋग्वेद-कृष्णयजुर्वेद शुक्लयजुर्वेद सामवेदाथर्व वेदतन्त्रागम पुराण गायत्री नाममन्त्राः पूर्वप्रकरणे निर्दिष्टाः प्राधान्येन । अन्य देवतानां मन्त्राः स्वयमूहनीयाः । तत्र केवलदेवे पिण्डिकायाः पत्नीरूपत्वात्पत्नीमन्त्रेण पिण्डिका होमः । केवलदेव्याः प्राधान्ये पिण्डिकाया देवीरूपान्तरं

Scanned by CamScanner

मत्त्वा तन्मन्त्रेण होमः । ताम्रमयकाष्ठमयान्यतरध्वजदण्डे स्थाप्ये ॐ केतुं कृण्वन्० इति मन्त्रेण, शिखरस्थापने ॐ आजिघ्र कलशं० इति मन्त्रेण वाहनस्थापने च वाहनमन्त्रेण होमः कार्यः । यद्यपि पद्धतिषु द्वादशसहस्र षट्सहस्र त्रिसहस्र-अष्टोत्तर सहस्राष्टोत्तरशतरूपाः संख्या उक्ताः । किन्तु तादृशविद्वद्ब्राह्मणालाभे १००८ वा १०८ संख्याग्रहणमुचितम् । वर्तमानयुगे तथैव याज्ञिक सम्प्रदायः । देवताहोमे सपरिवार शिवदेवतामन्त्राः - १ गणानान्त्वा० गणपतेः, २ अम्बे अम्बिके० गौर्याः, नमः शम्भवाय च० शिवस्य, गौरीर्मिमाय० (आयङ्गौः०) पिण्डिकायाः अस्मे रुद्रा० हनुमतः, आशुः शिशानो० नन्दीश्वरस्य, यस्य कुर्मो० कूर्मस्य, केतुङ्कृण्वन्० ध्वजस्य, आजिघ्र कलशं० शिखरस्य-एते मन्त्रा ग्राह्याः ।

द्वादश ब्राह्मणोपवेशने प्रतिमन्त्रं नववारं, नवसत्त्वे द्वादशवारं, अष्टादशसत्त्वे षड्वारं प्रतिदैवतं होमः, एवम् १०८ संख्या प्रतिदेवं सम्पादनीया ।

## ६१ पञ्चकुण्डी नवकुण्डी पक्षयोर्होम विशेषः ।

प्रधानदेव मन्त्रेण पूर्वकुण्डे घृतेनाष्टवारम्, दक्षिण कुण्डे दध्नाऽष्टवारम्, पश्चिम कुण्डे क्षीरेणाष्टवारम्, उत्तर कुण्डे मधुनाऽष्टवारम्, आचार्यकुण्डे मीलितघृतदधि क्षीरमधुभिरष्टवारं होमं कुर्यात् । नवकुण्ड्यां पूर्वकुण्डे देवमन्त्रेण आज्य मष्टवारम् आग्नेय कुण्डे 'वौषट्' इत्याज्यमष्टवारम्, दक्षिणकुण्डे देवमन्त्रेण दधि अष्टवारम् । नैर्ऋत्य कुण्डे-तत्सवितु० इति दध्यष्टवारम्, पश्चिमकुण्डे देवमन्त्रेण क्षीरमष्टवारम्, वायव्यकुण्डे-जातवेदसे० इति क्षीरमष्टवारम्, उत्तरकुण्डे देवमन्त्रेण मधु अष्टवारम्, ऐशानकुण्डे-ब्रह्मजज्ञानं० इति मधु अष्टवारम्, आचार्यकुण्डे 'मूर्धानन्दिवो०' इति मन्त्रेण मीलित घृत दधि क्षीरमधुभिरष्टवारं जुहुयादिति विशेषः । एककुण्डेऽयं होमो न कार्यः ।

## ६२ व्याहृतिहोमः ।

१ तिल २ यव ३ व्रीहि ४ चरु ५ आज्य - इति पञ्चद्रव्यैः प्रतिद्रव्यं अथवा केवलेन आज्येन तिलैर्वा अष्टोत्तर सहस्राष्टोत्तर शतान्यतर संख्यया समस्त महाव्याहृतिभिः ॐ भूर्भुवः स्वः स्वाहा-इति मन्त्रेण दशब्राह्मणान् उपवेश्याष्टोत्तरसहस्र मेकया मालया जुहुयात् । ततो हुतशेषमादाय ॐ अग्नये स्विष्टकृते स्वाहा-इति जुहुयात् ।

ततो-ॐ मूर्धानन्दिवो० देवाः स्वाहा-इति सपूगीफलेनाज्येन होमाङ्गं पूर्णाहुतिं जुहुयात् । होमे प्रतिपर्यायं प्रधानदेवस्य पादनाभिहृदय शिरांसि स्पृशेत् । देवस्य दक्षिण कर्णे 'कृतममुं होमं देवाय निवेदयामि' इति निवेदयेत् । यावन्ति दिनानि अधिवासने स्युः, तत्र प्रतिदिनं १ शान्तिकपौष्टिक होम, २ मूर्त्तिमूर्त्यधिपतिलोकपालहोम ३ स्थाप्यदेवता होम ४ व्याहृति होम ५ तत्त्वन्यास होम ६ तत्त्वन्यासाः प्रतिदिनं कार्या इति बोध्यम् । इति होमप्रकरणं द्वितीयदिनसाध्यं समाप्तम् ।

Scanned by CamScanner

## ६३ प्रासादस्नपनम् अधिवासनञ्च ।

(प्रासादस्नपने मध्यकलशेषु द्रव्यनिक्षेपो दिक्क्रमेण, मध्यकलशैः स्नपनं दिग्व्यत्यासेन अवशिष्टाष्टकलशैश्च स्नपनं दिक्क्रमेण-इत्यस्मिन् विषये शास्त्रार्थप्रकरणे बहुधा विचारितं खण्डितञ्च । प्रासादस्नपनप्रयोगश्चायं दिक्क्रमं पुरकृत्यैव योजितः । शान्तिकपौष्टिकादि होमावसर एवान्यैर्ब्राह्मणैः प्रासादस्नपनाधिवासने समयमालोच्य सम्पादनीये ।)

### प्रासादस्नपन प्रयोगः ।

प्रासादाग्रे सभामण्डपे बहिर्वाऽक्षतै रेकाशीति ८१ भिन्नभिन्न नवकैः कृत्वा सप्तधान्यपुञ्जान् व्रीहिपुञ्जान् वा विधाय नवनवकलशानां नव कोष्ठानि सम्पाद्य यजमानः प्राङ्मुख उदङ्मुखो वोपविश्य संभृतसम्भारः -

आचम्य प्राणानायम्य । द्यौः शान्तिः० । जलमादाय-अद्य० पू० तिथौ सकलग्रामजनभक्तजनदेशजन कल्याणाय अस्मिन् नूतनप्रासादे सकलदोष निवृत्तिपूर्वकं प्रासादशुद्ध्यर्थं, आचन्द्रतारकं प्रासादपुरुष सान्निध्यहेतवे सप्रासादप्रतिष्ठाङ्गभूतं प्रासादास्नपनं प्रासादाधिवासनञ्च करिष्ये । तत्रादौ गणेश स्मरणपूर्वकं कलशासादनं करिष्ये । ॐ गणानान्त्वा० नमस्करोमि । ॐ महीद्यौ० इत्यादि विधिना पूर्णपात्रवर्जं वरुणावाहनान्तं कृत्वा मध्यपूर्वादि प्रादक्षिण्य क्रमेण मध्यकलशेषु तानि तानि वस्तूनि निक्षिपेत् । १ मध्यनवक मध्यमकुम्भे ॐ सोमाय वनस्पत्यन्तर्गताय नमः इति शमीउदुम्बर-अश्वत्थ-चूत-पलाश-प्लक्ष-न्यग्रोध-कदम्ब-बिल्व-अर्जुन-वृक्षसम्भवं पल्लवदशकं निक्षिपेत् । ० पूर्वनवकमध्यकुम्भे-पद्म-गोरोचना-दूर्वाङ्कुर-दर्भपिञ्जूल-श्वेतपीतसर्षप-श्वेतचन्दन-जाती-बकुलकुसुम-नद्यावर्त इति दशकं क्षिपेत् । ३ आग्नेयनवकमध्य कुम्भे-यव-व्रीहि तिल-सुवर्ण-रजत-समुद्रगामिनी नदी कूलमृत्तिका-भूम्यसंस्पृष्ट गोमय-इति सप्तकं क्षिपेत् । ४ दक्षिण नवकमध्य कुम्भे-सहदेवी-विष्णुक्रान्ता-भृङ्गराज-महौषधी-शमी-शतावरी-गुडूची-श्यामाक-इत्यष्टकं क्षिपेत् । ५ नैर्ऋत्य नवकमध्यकुम्भे-कदलीफल नारिकेल-बिल्व-नारिङ्ग-मातुलिङ्ग-वदर-आमलक-चूतफल इति फलाष्टकं क्षिपेत् । ६ पश्चिम नवकमध्यकुम्भे-मन्त्रसाधितं पञ्चगव्यं क्षिपेत् । ७ वायव्य नवकमध्यकुम्भे-शमी-उदुम्बर-अश्वत्थ-न्यग्रोध-पलाश-इति वृक्षपञ्चकपल्लव कषायं क्षिपेत् । ८ उत्तरनवकमध्य कुम्भे-शंखपुष्पी-महदेवी-शतावरी-गुडूची-वचा-बला-कुमारी-व्याघ्री-इति मूलाष्टकं क्षिपेत् । ९ ईशाननवकमध्यकुम्भे-वल्मीकादि सप्तमृत्तिकाः प्रक्षिपेत् । सर्वकलशेषु गन्धोदकं प्रक्षिप्य ॐ हिरण्यवर्णाम्-१५ इति श्रीसूक्तेन मध्यमकुम्भानभिमन्त्र्य देवतामूलमन्त्रेणाभिमन्त्रयेत् ।

प्रासादं त्रिसूत्र्याऽवेष्ट्य पञ्चगव्येन अन्तर्बहिरधस्तादूर्ध्वञ्च प्रासादं-ॐ आपोहिष्ठा० इति प्रोक्ष्य । बल्मीकमृदा-ॐ मूर्धानं दिवो० इति प्रासादमनुलिप्य मध्यमपूर्वादि प्रादक्षिण्यक्रमेण मध्यकलशैः क्रमेण

Scanned by CamScanner

प्रासादं स्नपयेत् । १ मध्यनवकमध्य कुम्भेन - ॐ नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु । येऽअन्तरिक्षे ये दिवितेभ्यः सर्पेभ्यो नमः ॥१३-६॥ २ पूर्वनवकमध्यकुम्भेन ॐ विष्णोर् रराटमसि विष्णो ꣳ श्नप्त्रेस्थो विष्णो ꣳ स्यूरसि विष्णोर्ध्रुवोऽसि । वैष्णवमसि विष्णवेत्त्वा ॥५-२१॥ ३ आग्नेयनवकमध्यकुम्भेन-ॐ सोम ꣳ राजानमवसेऽग्निमन्वारभामहे । आदित्यं विष्णु ꣳ सूर्यं ब्रह्माणञ्च बृहस्पति ꣳ स्वाहा ॥९-२६॥ ४ दक्षिणनवकमध्यकुम्भेन-ॐ विश्वतश्चक्षु० देव एकः ॥ ५ निर्ऋतिनवकमध्य कुम्भेन-ॐ याः फलिनी० हसः ॥ ६ पश्चिमनवकमध्यकुम्भेन-ॐ पयः पृथिव्यां० मह्यम् ॥ ७ वायव्यनवकमध्यकुम्भेन - यज्ञा यज्ञावो अग्नये गिरा गिरा च दक्षसे । प्रप्रवयममृतंजातवेदसम्प्रियमित्रन्नश ꣳ सिषम् ॥२७-४२॥ ८ उत्तरनवकमध्यकुम्भेन-ॐ ह ꣳ स ꣳ शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥१०-२४॥ ९ ईशाननवकमध्यकुम्भेन-ॐ समुद्राय त्वा व्वाताय स्वाहा सरिराय त्वा व्वाताय स्वाहा । अनाधृष्याय त्वा व्वाताय स्वाहाऽप्रतिधृष्याय त्वा व्वाताय स्वाहा । अवस्यवे त्वा व्वाताय स्वाहाऽशिमिदाय त्वा व्वाताय स्वाहा ॥३८-७॥

ततो मध्यमपूर्वादिनवकेषु 'पारस्करगृह्यस्नानसूत्रकण्डिकायां' इदमापो हविमतीर्देवीराप इति-द्वाभ्यामपोदेवा द्रुपदादिव शन्नोदेवी अपा ꣳ रसम् । इत्युक्तत्वाद् अवशिष्टाष्टभिः पूर्वादीशानान्तकलशैः प्रतिकोष्ठं क्रमेण स्नपनेऽब्दैवता अष्टौमन्त्राः पुनः पुनः पठनीयाः ।

१ ॐ इदमाप ꣳ प्रवहतावद्यञ्च मलञ्च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपेऽअभीरुणम् । आपो मा तस्मादेनस ꣳ पवमानश्च मुञ्चतु ॥६-१७॥ २ हविष्मतीरिमाऽआपो हविष्मा २ ऽ आविवासति । हविष्मान्देवोऽअध्वरो हविष्माँ २ ऽ अस्तु सूर्यः ॥६-२३॥ ३ देवीरापोऽअपान्नपाद्यो वऽऊर्म्मिर्ह विष्यऽइन्द्रियावान्मदिन्तमः । तन्देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषाम्भागस्थ स्वाहा ॥६-२७॥ ४ कार्षिरसि समुद्रस्य त्वा क्षित्याऽउन्नयामि । समापोऽअद्भिरग्मत समोषधीभिरोषधीः ॥६-२८॥ ५ अपो देवा मधुमतीरगृभ्णन्नूर्ज्जस्वती राजस्वश्चितानाः । याभिर्म्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्र मनयन्नत्यरातीः ॥१०-१॥ ६ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतम्पवित्रेणेवाज्ज्यमापः शुन्धन्तु मैनसः ॥२०-२०॥ ७ शन्नो देवीरभिष्टयऽआपो भवन्तु पीतये । शंय्योरभिस्रवन्तु नः ॥३६-१२॥ ८ अपा ꣳ रसमुद्वयस ꣳ सूर्ये सन्त ꣳ समाहितम् । अपा ꣳ रसस्य यो रसस्तम्वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टङ्गृह्णाम्येषते योनिरिन्द्राय त्वा जुष्टतमम् ॥९-३॥

एवं प्रतिकोष्ठमष्टमन्त्रावृत्त्या द्वासप्ततिकलशैः सशिखरं प्रासादं स्नपयेत् । एकाशीतिकुम्भाभाव एकेन गन्धोदकपूरितेन महता कलशेन-ॐ दैव्यायकर्म्मणे शुन्धध्वम्-इति मन्त्रेण सशिखरं प्रासादं स्नपयेत् । प्रासादं शुद्धजलेन संस्नाप्य सूत्रेणावेष्ट्य प्रासादं देवसूक्तेन मन्त्रेण वा देवरूपं भावयित्वा पताकादिना शोभयित्वा ॐ प्रासादपुरुषाय नमः - इति गन्धादिना सम्पूज्य तस्याधस्ताद् देवं संचिन्त्य-

Scanned by CamScanner

ॐ ह्रीं सर्वदेवमयाचिन्त्य सर्वरत्नोज्वलाकृते । यावचन्द्रश्च सूर्यश्च तावदत्र स्थिरो भव ॥ (इदं विष्णु० नमः शम्भवाय० अम्बे अम्बिके०) ततः प्रासादाग्रे चतस्रो गा दुग्ध्वा तासां क्षीरेण चरुं श्रपयित्वा देवाय निवेद्य तेन पायसेन द्वादश ब्राह्मणान् भोजयेत् । प्रधानदेवतामन्त्रेण प्रासादमधिवासयेत् । ततोऽक्षतैः प्रासादे प्रासादतत्त्वान्यावाहयेत्-सर्वत्र आदौ प्रणवः अन्ते नमः शब्दः - १ ॐ पृथिव्यै नमः २ श्रीकण्ठाय० ३ अद्भ्यो० ४ जलेशाय० ५ तेजसे० ६ त्विषां निधये० ७ वायवे० ८ मातरिश्वने० ९ आकाशाय० १० सूक्ष्माय० ११ रूपतन्मात्रात्मने० १२ भानुमते० १३ रसतन्मात्रात्मने० १४ जलदाय० १५ गन्धतन्मात्रात्मने० १६ गन्धाय० १७ स्पर्शतन्मात्रात्मने० १८ बलवत्तराय० १९ शब्दतन्मात्रात्मने० २० सूक्ष्मनादाय० २१ वाक् तत्त्वाय० २२ दुन्दुभये० २३ पाणितत्त्वाय० २४ समानाय० २५ पादतत्त्वाय० २६ चक्राय० २७ पायुतत्त्वाय० २८ कर्णभुजे० २९ उपस्थतत्त्वाय० ३० घनानन्दाय० ३१ श्रोत्रतत्त्वाय० ३२ व्योमाधाराय० ३३ त्वक्तत्त्वाय० ३४ सर्वगाय० ३५ चक्षुस्तत्त्वाय० ३६ प्रकाशाय० ३७ रसतत्त्वाय० ३८ महावक्त्राय० ३९ घ्राणतत्त्वाय० ४० विलुण्ठकाय० ४१ मनस्तत्त्वाय० ४२ संकल्पाय० ४३ बुद्धितत्त्वाय० ४४ बुद्धये० ४५ अहंकारतत्त्वाय० ४६ अहंकृतये० ४७ चित्ततत्त्वाय० ४८ मनसे० ४९ प्रकृतितत्त्वाय० ५० पितामहाय० ५१ पुरुषतत्त्वाय० ५२ विष्णवे० ५३ सदाशिवतत्त्वाय० ५४ अजेशाय० ५५ कालतत्त्वाय० ५६ क्रतुध्वजाय० ५७ वियातत्त्वाय० ५८ विष्णवे (वैष्णवेकलशे ५९ चक्राद्यायुधेभ्यो नमः - शैवे - शूलाद्यायुधेभ्यो नमः - गणपतौ - अङ्कुशाद्यायुधेभ्यो नमः - सूर्ये - शङ्खचक्राद्यायुधेभ्यो नमः, देव्याम्-गदाखड्गाद्यायुधेभ्यो नमः) ६० सत्त्वाय० ६१ रजसे० ६२ तमसे० ६३ वह्निमण्डलाय० ६४ सूर्यमण्डलाय० ६५ सोममण्डलाय० इति ६६ प्रासादतत्त्वानि प्रासादे विन्यस्य सम्पूज्य पुरुषसूक्तेन प्रासादं पुरुषरूपेण स्तुवीत । (प्रासादतत्त्वहोमकाले समिद्यवतिलाज्याहुतिभिः प्रतिद्रव्यमष्टाष्टसंख्यया नाममन्त्रैर्जुहुयात् ।)

## प्रासादप्रार्थना ।

प्रासादाद् बहिर्निर्गत्य प्रासादाभिमुखो भूत्वा प्रार्थयेत् -

१ पादौ पादशिलास्तस्य जङ्घा पादोर्ध्वमुच्यते । गर्भश्चैवोदरं ज्ञेयं कटिश्च कटिमेखला ॥१॥

२ स्तम्भाश्च बाहवो ज्ञेया घण्टा जिह्वा प्रकीर्तिता । दीपः प्राणोऽस्य विज्ञेयो अपानो जलनिर्गमः ॥२॥

३ ब्रह्मस्थानं यदेतच्च तन्नाभिः परिकीर्तितः । हृत्पद्मं पिण्डिका ज्ञेया प्रतिमा पुरुषः स्मृतः ॥३॥

४ तस्य पादस्त्वहंकारो ज्योतिस्तच्चक्षुरुत्यते । तदूर्ध्वं प्रकृतिस्तस्य प्रतिमाऽत्मा स्मृतो बुधैः ॥४॥

५ नलकुम्भादधोद्वारं तस्य प्रजननं स्मृतम् । शुकनासा भवेन्नासा गवाक्षः कर्ण उच्यते ॥५॥

६ कपोतपाली स्कन्धोऽस्य ग्रीवा चामल सारिका । कलशस्तु शिरो ज्ञेयं मज्जा क्षिप्तरसादिकम् ॥६॥

Scanned by CamScanner

७ मेदश्चैव सुधां विद्यात् प्रलेपो मांस उच्यते । अस्थीनि च शिलास्तस्य स्नायुः कीलादिकः स्मृतः ॥७॥

८ चक्षूंषि शिखराणि स्युर्ध्वजाः केशाः प्रकीर्तिताः । एवं पुरुषरूपं तं ध्यात्वा च मनसा सुधीः ॥८॥

९ प्रासादं पूजयेत् पश्चाद् गन्धपुष्प ध्वजादिभिः । सूत्रेण वेष्टयेद् देवं वासांसि परिकल्पयेत् ॥९॥

१० प्रासादमेवमभ्यर्च्य वाहनं चाग्रमण्डपे - इति ध्यात्वा नमस्कुर्यात् ।

जलमादाय-अनेन प्रासादस्नपनपूर्वकं प्रासादाधिवासनकर्मणा सपरिवारः स्थाप्यदेवः प्रीयताम् ॥

## ६४ पिण्डिकाधिवासनम् ।

द्वितीयेऽह्नि प्रासादस्नपनान्तरं प्रतिष्ठादिने प्रातर्वा प्रतिष्ठातः पूर्व पिण्डिकाधिवासनं कार्यम् । आचमनम् । प्राणायामः । जलमादाय-आरब्धसप्रासादाचल प्रतिष्ठाङ्ग भूतं पिण्डिकायां (पिण्डिकासु) सूर्याचन्द्रमसौ यावद् देवकलासान्निध्यहेतवे पिण्डिकास्थापन मधिवासनञ्च करिष्ये । प्रासादे स्थाप्य प्रतिमासंख्यानुरोधेन पूर्वस्थापिततत्तत्पिण्डिकागर्तसमीपे ब्राह्मणानवस्थाप्य - पिण्डिकागर्तान् मधुघृताभ्यामभ्यज्य शुद्धवारिणा प्रक्षाल्य पूर्वस्नपनावशिष्ट कलशवारिणा पिण्डिकामन्त्रैः (श्रीश्चते० ह्रीश्चते० गौरीर्मिमाय०) इत्यादिभिः संस्नाप्य गन्धादिभि रभ्यर्च्य वस्त्रैराच्छाद्य तत्र तत्र गर्तेषु पिण्डिकामन्त्रान् न्यसेत् ॐ यं थं भं फट्लक्ष्म्यै (गौर्यै) हृदयाय नमः । यं थं भं फट् (लक्ष्म्यै) (गौर्यै) शिरसे स्वाहा । ॐ यं थं भं फट् लक्ष्म्यै (गौर्यै) शिखायै वषट् । ॐ यं थं भं फट लक्ष्म्यै (गौर्यै) कवचाय हुम् । ॐ यं थं भं फट् लक्ष्म्यै (गौर्यै) अस्त्राय फट् इति पिण्डिकायां पञ्चाङ्गानि विन्यस्य मूर्त्तिमूर्त्तिपतिलोकपालान् प्रागाद्यष्टदिक्षु विन्यसेदक्षतैः ।

पूर्वे-पृथिवी मूर्तये नमः । २ पृथिवी मूर्त्यधिपतये शर्वाय० ३ इन्द्राय० ४ आग्नेय्याम्-अग्निमूर्त्तये० ५ अग्निमूर्त्यधिपतये पशुपतये० ६ अग्नये० । दक्षिणे ७ यजमानमूर्त्तये० ८ यजमानमूर्त्यधिपतये उग्राय० ९ यमाय० १० नैर्ऋत्याम्-अर्कमूर्त्तये० ११ अर्कमूर्त्यधिपतये रुद्राय० १२ निर्ऋतये० १३ पश्चिमे-जलमूर्त्तये० १४ जलमूर्त्यधिपतये भवाय० १५ वरुणाय० । १६ वायव्याम्-वायुमूर्त्तये० १७ वायुमूर्त्यधिपतये ईशानाय० १८ वायवे० । १९ उत्तरे-सोममूर्त्तये० २० सोममूर्त्यधिपतये महादेवाय० २१ सोमाय० । २२ ऐशान्याम्-आकाशमूर्त्तये० २३ आकाशमूर्त्यधिपतये भीमाय० २४ ईशानाय नमः - इति पिण्डिकान्यासं विधाय आभ्यां मन्त्राभ्यां पिण्डिकामधिवासयेत्-ॐ ह्रीं श्रीं ह्रीं क्षः परब्रह्मणे सर्वाधाराय नमः । ह्रीं श्रीं ह्रीं दिव्यतेजोधारिण्यै सुभगायै नमः । इति पिण्डिकाधिवासनम् ।

### पिण्डिकास्थापनम् ।

पिण्डिकास्थापनदेशे पञ्चरत्नोपरि सौवर्णं कूर्मं द्वारसम्मुखं निधाय तदुपरि पञ्च रत्नानि विन्यस्य

Scanned by CamScanner

तदुपरि कूर्मशिला ब्रह्मशिला पिण्डिकात्मिकां त्रिवप्रां सिंहासनापरपर्यायां शिलां निदध्यात् । प्रथमो वप्रः कूर्मशिलाख्यो मध्यमो ब्रह्मशिलाख्व उपरि तृतीयवप्रः पिण्डिकाख्य इति शिलानिर्णयः । एवं त्रिवप्रां शिलां पिण्डिकाख्यां स्वस्थाने स्थापयित्वा शिलामध्यदेशं स्पृष्ट्वा प्रार्थयेत-ॐ नमो व्यापिनि स्थिरे अचले ध्रुवे ॐ श्रीं लं स्वाहा-त्वमेव परमा शक्तिस्त्वमेवासनधारिका । शिवाज्ञया त्वया देवि स्थातव्यमिह सर्वदा ॥ ॐ तत्त्वाध्वने नमः । ॐ मन्त्राध्वने नमः ॐ कालाध्वने नमः-इति पुष्पाञ्जलित्रयं दत्त्वा-ॐ ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेन द्यावापृथिवी पूर्येथामिन्द्रस्य च्छदिरसि विश्वजनस्यच्छाया ॥५-२८॥ (ध्रुवा द्यौः० ध्रुवं ते राजा० ध्रुवं धरुणं० ऋ०) इति मन्त्रं पठित्वा १ ॐ आत्मतत्त्वाय नमः २ ॐ आत्मतत्त्वाधिपतये क्रियाशक्त्यै नमः । ३ शिवतत्त्वाय नमः । ४ ॐ शिवतत्त्वाधिपतये इच्छाशक्त्यै नमः । ५ ॐ विद्यातत्त्वाय नमः । ६ ॐ विद्यातत्त्वाधिपतये आधारशक्त्यै नमः । ७ ॐ मूर्त्तिमूर्त्तिपतिलोकपालेभ्यो नमः - इत्यावाह्य - ॐ श्रीश्चते० ह्रीश्चते लक्ष्मीश्च (कृ० यजु०) (गौरीर्मिमाय० ऋ०) इति सम्पूज्य प्रार्थयेत्-सर्वदेवमयी शक्ति स्त्रैलोक्याह्लादकारिणी । त्वां प्रतिष्ठापयाम्यत्र मन्दिरे विश्वपूजिते ॥ यावच्चन्द्रश्च सूर्यश्च यावदेषा वसुन्धरा । तावत्त्वमनया शक्त्या मन्दिरेऽस्मिन् स्थिरा भव ॥ पुत्रानायुष्मतो लक्ष्मीमचलामजरामृते । अभयं सर्वभूतेभ्यः कर्तुर्नित्यं हि देहि भो ॥ विजयं भूपतेः सर्वलोकानां सुखमेव च । सुभिक्षं क्षेममारोग्यं कुरु देवि नमोऽस्तु ते ॥ इति सम्प्रार्थ्य पिण्डिकायां वर्णन्यासं कुर्यात्-श्वभ्रे-ॐ इति प्रणवम् । तद्बाह्ये-अं आं इं ईं उं ऊं ऋं ॠं लृं ॡं एं ऐं ओं औं अं अः-तद्बाह्ये-क खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं शं षं सं हं ळं क्षं-इति व्यञ्जनानि विन्यस्य ततः प्रागाद्यष्टदिक्षु-इन्द्राय० अग्नये० यमाय० निर्ऋतये० वरुणाय० वायवे० सोमाय० ईशानाय० इति लोकपालान् विन्यस्याष्टदिक्षु वज्र-मौक्तिक) वैडूर्य-शङ्ख-स्फटिक-पुष्पराग-इन्द्रनील-महानील शकलानि, गोधूमयवाक्षततिलान्, गर्भमध्ये हिरण्यरौप्यादि धातुजातम्, देवस्य वाहनं गरुडादि गर्तमध्ये निक्षिप्य मनः शिल हरितालाञ्जनकासीस सौराष्ट्रीगोरोचनागैरिकपारदान्, सुवर्णरौप्य ताम्र आयसत्रपुसीस कांस्यारकूट तीक्ष्ण लोहानि, श्वेतरक्तचन्दन-अगरु-अर्जुन-उशीर वैष्णवी सहदेवी लक्ष्मणेत्योषध्यष्टकं बीजाभावे यवान्, रत्नाभावे वज्रम्, धात्वभावे हरितालम्, ताम्राद्यभावे सुवर्णं, ओषध्यभावे सहदेवीं न्यसेत् । मधुपायसेन गर्तं विलिप्य शुक्लवस्त्रेणाच्छाय 'सुदर्शनाय हुं फट्' इति रक्षां विधाय (पञ्चकुण्डेषु मूलमन्त्रेण पलाशसमित्तिलाज्यमष्टाविंशति संख्यया हुत्वा)-ॐ मनोजूति० (तदस्तु मित्रा० गृहावै प्रतिष्ठा-ऋग्वेद इति पठित्वा प्रासादमभिषिच्य पुष्पाञ्जलिं दत्त्वा आचम्य प्रासादं पञ्चगव्येनाभ्युक्ष्य दर्जपिञ्जूलैः सम्मार्ज्य-गुग्गुलादिरसैर्गतान् पूरयेत् ।

जलमादाय-अनेन पिण्डिकाधिवासन कर्मणा सपरिवारः स्थाप्यदेवः प्रीयताम् । ततो मण्डपं गच्छेत् । अयं विधिर्द्वितीयेऽहनि प्रासादाधिवासनानन्तरं प्रतिष्ठा दिने प्रतिमानां प्रासाद प्रवेशनात् पूर्वं वा कार्यः । इति पिण्डिकाधिवासनम् ।

Scanned by CamScanner

## ६९ तत्त्वन्यासाः, शय्याधिवासः, निद्रावाहनञ्च ।

शान्तिकपौष्टिकादिहोमकाल एव यजमानमन्यं प्रतिनिधिं वा देवसमीपे उपवेश्य । पूर्वं मण्डपे शय्याविरचनमुक्तम्, तदनन्तरं यजमानः प्राङ्मुख उदङ्मुखो वोपविश्य जलमादाय-आसु प्रतिमासु सूर्याचन्द्रमसौ यावत् सकलतत्त्वदेवकलादिव्यतेजोनिष्पत्तये शय्याधिवासं तत्त्वन्यासाँश्च करिष्ये । शय्यासुप्तानां प्रतिमानां परितः शैवे-पूर्वादिक्रमेण-१ भवाय० २ शर्वाय० ३ ईशानाय० ४ पशुपतये० ५ रुद्राय० ६ उग्राय० ७ भीमाय० ८ महते० इत्यावाह्य पूजयेत् । वैष्णवे तु - १ विष्णवे० २ श्रीधराय० ३ मधुसूदनाय० ४ हृषीकेशाय० ५ त्रिविक्रमाय० ६ पद्मनाभाय० ७ वामनाय० ८ दामोदराय० इत्यष्ट देवता आवाह्य पूजयेत् । बलिद्वयं दद्यात्-बलिं सम्पूज्य-ॐ प्राच्यै दिशे० दिक्पालेभ्यो नमः बलिं समर्पयामि । द्वितीयं बलिं-ॐ त्र्यम्बकं यजामहे० ॐ नमः पूर्वादि दिग्वासि दिक्पति भूताधिपति गणपति रुद्रमातृ क्षेत्रपालेभ्यः - अमुं बलिं निवेदयामि-इति जलं मुक्त्वा आचामेत् । (प्रतिमानां तानि तान्यङ्गानि स्पृष्ट्वा न्यासाः कार्या इति प्रथमः कल्पः किन्तु प्रतिमानामाच्छादितत्वाद् बहुप्रतिमासत्त्वे च सर्वासामेककालावच्छेदेन स्पर्शासम्भवादक्षतै र्न्यासाः कार्या इति यात्रिकसम्प्रदायः) हस्तेऽक्षतान् गृहीत्वा-सर्वत्र आदौ प्रणवः अन्ते नमः पदम् ।

१ प्रणवन्यासः - १ ॐ अकाराय नमः - शिरसि । २ उकाराय० पादयोः । ३ मकाराय० ललाटे ।

२ व्याहृतिन्यासः - १ भूर्नमः पादयोः । २ भुवर्नमः - हृदये । ३ स्वर्नमः - ललाटे ।

३ मातृकान्यासः - १ अकाराय० तालुनि । २ आकाराय० मुखे । ३ इकाराय० दक्षिणनेत्रे ४ ईकाराय० वामनेत्रे । ५ उकाराय० दक्षिणकर्णे । ६ ऊकाराय० वामकर्णे । ७ ऋकाराय० दक्षिणगण्डे । ८ ॠकाराय० वामगण्डे । ९ ऌकाराय० दक्षिणनासायाम् । १० ॡकाराय० वामनासायाम् । ११ एकाराय० ऊर्ध्वदन्तपङ्क्तौ । १२ ऐकाराय० अधोदन्तपङ्क्तौ । १३ ओकाराय० ऊर्ध्वोष्ठे । १४ औकाराय० अधरोष्ठे । १५ अंकाराय० ललाटे । १६ अःकाराय० जिह्वायाम् । १७ यकाराय० त्वचि । १८ रकाराय० चक्षुषोः । १९ लकाराय० नासिकयोः । २० वकाराय० दन्तेषु । २१ शकाराय० श्रोत्रयोः । २२ षकाराय० उदरे । २३ सकाराय० कट्योः । २३ हकाराय० हृदये । २५ ळकाराय० नाभौ । २६ क्षकाराय० लिङ्गे । २७ पकाराय-दक्षिणबाहुमूले । २८ फकाराय० दक्षकूर्परे । २९ बकाराय० दक्षमणिबन्धे । ३० भकाराय० दक्षाङ्गुलिमूले । ३१ मकाराय० दक्षहस्ताङ्गुल्यग्रे । ३२ तकाराय० वामबाहुमूले । ३३ थकाराय० वामकूर्परे । ३४ दकाराय० वाममणिबन्धे । ३५ धकाराय० वामहस्ताङ्गुलिमूले । ३६ नकाराय० वामहस्ताङ्गुल्यग्रे । ३७ टकाराय० दक्षिणपादमूले । ३८ ठकाराय० दक्षिणजानुनि । ३९ डकाराय० दक्षपादगुल्फे । ४० ढकाराय० दक्षिणपादाङ्गुलिमूले । ४१ णकाराय० दक्षिमपादाङ्गुल्यग्रे । ४२ चकाराय० वामपादमूले । ४३ छकाराय० वामजानुनि । ४४ जकाराय० वामगुल्फे । ४५

Scanned by CamScanner

झकाराय० वामपादाङ्गुलिमूले । ४६ ञकाराय० वामपादाङ्गुल्यग्रे । ४७ ककाराय० दक्षकरतले । ४८ खकाराय० वामकरतले । ४९ गकाराय० दक्षकरपृष्ठे । ५० घकाराय० वामकरपृष्ठे । ५१ ङकाराय० हस्तपादसर्वाङ्गुलिषु ।

४ ग्रहनक्षत्रन्यासः - १ रविचन्द्राभ्यां० नेत्रयोः । २ भौमाय० हृदये । ३ बुधाय० स्कन्धयोः । ४ बृहस्पतये० जिह्वायाम् । ५ शुक्राय० लिङ्गे । ६ शनैश्चराय० ललाटे । ६ राहवे० पादयोः । ८ केतवे० केशेषु । ९ रोहिणीभ्यो० हृदये । १० मृगशिरसे० शिरसि । ११ आर्द्रायै० केशेषु । १२ पुनर्वसुभ्यां० ललाटे । १३ पुष्याय० मुखे । १४ आश्लेषाभ्यो० नासिकायाम् । १५ मघाभ्यो० दन्तेषु । १६ पूर्वाफाल्गुनीभ्यो० दक्षिणश्रोत्रे । १७ उत्तराफाल्गुनीभ्यो० वामश्रोत्रे । १८ हस्ताय० हस्तयोः । १९ चित्रायै० दक्षिणभुजे । २० स्वात्यै० वामभुजे । २१ विशाखाभ्यां० हृदये । २२ अनुराधाभ्यो० स्तनयोः । २३ ज्येष्ठायै० दक्षिणकुक्षौ । २४ मूलाय० वामकुक्षौ । २५ पूर्वाषाढाभ्यो० कटिपार्श्वयोः । २६ उत्तराषाढाभ्यो० लिङ्गे । २७ श्रवण धनिष्ठाभ्यो० वृषणयोः । २८ शतभिषाभ्यो० नेत्रयोः । २९ पूर्वा भाद्रपदाभ्यो० दक्षिणोरौ । ३० उत्तराभाद्रपदाभ्यो० वामोरौ । ३१ रेवतीभ्यो० दक्षिणजङ्घायाम् । ३२ अश्विनीभ्यां० वामजङ्घायाम् । ३३ भरणीभ्यो० दक्षिणपादे । ३४ कृत्तिकाभ्यो० वामपादे । ३५ ध्रुवाय० नाभौ । ३६ सप्तर्षिभ्यो० कण्ठे । ३७ मातृमण्डलाय० कट्योः । ३८ विष्णुपदेभ्यो० पादयोः । ३९ नागवीथ्यै० । ४० अङ्गवीथ्यै० कण्ठदेशे । ४१ ताराभ्यो० रोमकूपेषु । ४२ अगस्त्याय० वक्षसि ।

५ कालन्यासः - १ चैत्राय० शिरसि । २ वैशाखाय०मुखे । ३ ज्येष्ठाय० हृदये० । ४ आषाढाय० दक्षिणस्तने । ५ श्रावणाय० वामस्तने । ६ भाद्रपदाय० उदरे । ७ आश्विनाय० कट्योः । ८ कार्तिकाय० दक्षिणोरौ । ९ मार्गशीर्षाय० वामोरौ० । १० पौषाय० दक्षिणजङ्घायाम् । ११ माघाय० वामजङ्घायाम् । १२ फाल्गुनाय० पादयोः । १३ सम्वत्सराय० दक्षिणस्कन्धे । १४ परिवत्सराय० दक्षिणकोष्ठे । १५ इद्वत्सराय० वामप्रकोष्ठे । १६ अनुवत्सराय० वामस्कन्धे । १७ पर्वभ्यो० सन्धिषु । १८ ऋतुभ्यो० लिङ्गे । १९ अहोरात्रेभ्यो० अस्थिषु । २० क्षणाय० । २१ लवाय० । २२ काष्ठायै० रोमसु । २३ कृतयुगाय० मुखे । २४ त्रेतायुगाय० हृदये । २५ द्वापराय० नितम्बे । २६ कलियुगाय० पादयोः । २७ चतुर्दशमन्वन्तरेभ्यो० बाह्वोः । २८ पराय० । २९ परार्धाय० जङ्घयोः । ३० महाकल्पाय० शरीरे । ३१ उदगयनाय० । ३२ दक्षिणायनाय० पादयोः । ३३ विषुवद्भ्यो० सर्वाङ्गुलिषु ।

६ वर्णन्यासः - १ ॐ ब्राह्मणाय० मुखे । २ क्षत्रियाय- बाह्वोः । ३ वैश्याय० ऊर्वोः । ४ शूद्राय० पादयोः । ५ सङ्करजेभ्यो० पादाग्रे । ६ अनुलोमजेभ्यो० सर्वाङ्गुलिषु । ७ गोभ्यो० मुखे । ८ अजाभ्यो० । ९ आविकाभ्यो० हस्तयो) । १० ग्राम्यपशुभ्यो० । ११ आरण्यपशुभ्यो० ऊर्वोः ।

Scanned by CamScanner

७ तोयन्यासः - १ ॐ मेघेभ्यो० केशेषु । २ अभ्रेभ्यो० रोमसु । ३ नदीभ्यो० सर्वगात्रेषु । ४ समुद्रेभ्यो० कुक्ष्योः ।

८ विद्यान्यासः - १ ॐ ऋग्वेदाय० शिरसि । २ यजुर्वेदाय० दक्षिणभुजे । ३ सामवेदाय० वामभुजे । ४ सर्वोपनिषद्भ्यो० हृदये । ५ इतिहासपुराणेभ्यो० जङ्घयो० । ६ अथर्वाङ्गिरसेभ्यो० नाभौ । ७ कल्पसूत्रेभ्यो० पादयोः । ८ व्याकरणेभ्यो० मुखे । ९ तर्केभ्यो० कण्ठे । १० मीमांसायै० । ११ निरुक्ताय० हृदये । १२ छन्दः शास्त्रेभ्यो० श्रोत्रयोः । १६ आयुर्वेदाय० दक्षिणभुजे । १७ धनुर्वेदाय० वामभुजे । १८ योगशास्त्रेभ्यो० हृदये । १९ नीतिशास्त्रेभ्यो० पादयोः । २० वश्यतन्त्राय० ओष्ठयोः ।

९ विराजन्यासः - १ दिवे० मूर्ध्नि । २ सूर्यलोकाय० । ३ चन्द्रलोकाय० नेत्रयोः । ४ वायुलोकाय० नासिकायाम् । ५ समुद्रेभ्यो० गुदे । ६ पृथिव्यै० पादयोः ।

१० मूर्तिदेवतान्यासः - १ ॐ हिरण्यगर्भाय० शिरसि । २ कृष्णाय० केशेषु । ३ रुद्राय० ललाटे । ४ यमाय० भ्रुवोः । ५ अश्विभ्यां० कर्णयोः । ६ वैश्वानराय० मुखे । ७ मरुद्भ्यो० घ्राणे । ८ वसुभ्यो० कण्ठे । ९ रुद्रेभ्यो० दन्तेषु । १० आदित्येभ्यो० मुखे । ११ सरस्वत्यै० जिह्वायाम् । १२ इन्द्राय० दक्षिणभुजे । १३ बलये० वामभुजे । १४ प्रह्लादाय० दक्षिणस्तने । १५ विश्वकर्मणे० वामस्तने । १६ नारदाय० दक्षिणकुक्षौ । १७ अनन्तादिभ्यो० वामकुक्षौ० । १८ वरुणाय० हस्तयोः । १९ मित्राय० पादयोः । २० विश्वेभ्यो देवेभ्यो० ऊर्वोः । २१ पितृभ्यो० जान्वोः । २२ यक्षेभ्यो० जङ्घयोः । २३ राक्षसेभ्यो० गुल्फयोः । २४ पिशाचेभ्यो० पादयोः । २५ असुरेभ्यो० पादाङ्गुलिषु । २६ विद्याधरेभ्यो० पार्ष्ण्योः । २७ ग्रहेभ्यो० पादतलयोः । २८ गुह्यकेभ्यो- गुह्ये । २९ पूतनादिभ्यो० नखाग्रेषु । ३० गन्धर्वेभ्यो० ओष्ठयोः । ३१ कार्तिकेयाय० दक्षिणपार्श्वे । ३२ गणेशाय० वामपार्श्वे । ३३ मत्स्याय० मूर्ध्नि । ३४ कूर्माय० पादयोः । ३५ नृसिंहाय० ललाटे । ३६ वराहाय० जङ्घयोः । ३७ वामनाय० मुखे । ३८ परशुरामाय० हृदये । ३९ रामाय० बाहुषु । ४० कृष्णाय० नाभ्याम् । ४१ बुद्धाय० बुद्धौ । ४२ कल्कये० जानुनोः । ४३ केशवाय० शिरसि । ४४ नारायणाय० मुखे । ४५ माधवाय० ग्रीवायाम् । ४६ गोविन्दाय० बाह्वोः । ४७ विष्णवे० हृदये । ४८ मधुसूदनाय० पृष्ठे । ४९ त्रिविक्रमाय० कट्योः । ५० वामनाय० जठरे । ५१ श्रीधराय० । ५२ हृषीकेशाय० जङ्घयोः । ५३ पद्मनाभाय० गुल्फयोः । ५४ दामोदराय० पादयोः ।

११ क्रतुन्यासः - १ अश्वमेधाय नमः - मूर्ध्नि । २ नरमेधाय० ललाटे । ३ राजसूयाय० मुखे । ४ गोसवाय० कण्ठे । ५ द्वादशाहाय० हृदि । ६ अहीनेभ्यो० नाभौ । ७ सर्वजिद्भ्यो० दक्षिणकट्याम् । ८ सर्वमेधाय० वाममकट्याम् । ९ अग्निष्टोमाय० लिङ्गे । १० अतिरात्राय०

वृषणयो० । ११ आप्तोर्यामाय० ऊर्वोः । १२ षोडशिने० जान्वोः । १३ उक्थ्याय० दक्षिणजङ्घायाम् । १४ वाजपेयाय० वामजङ्घायाम् । १५ अत्यग्निष्टोमाय० दक्षिणबाहौ । १६ चातुर्मास्याय० वामबाहौ । १७ सौत्रामणये० हस्तेषु । १८ पश्विष्टिभ्यो० अङ्गुलीषु । १९ दर्शपूर्णमासाभ्यां० नेत्रयोः । २० सर्वेष्टिभ्यो० रोमकूपेषु । २१ स्वाहाकाराय० २२ वषट्काराय० स्तनयोः । २३ पञ्चमहायज्ञेभ्यो० पादाङ्गुलीषु । २४ आहवनीयाय० मुखे । २५ दक्षिणाग्नये० हृदये । २६ गार्हपत्याय० नाभौ । २७ वेद्यै० उदरे । २८ प्रवर्ग्याय० भूषणेषु । २९ सवनेभ्यो० पादयोः । ३० इध्मभ्यो० बाहुषु । ३१ दर्भेभ्यो० केशेषु ।

१२ गुणन्यासः - १ धर्माय- मूर्ध्नि । २ ज्ञानाय० हृदि । ३ वैराग्याय० गुह्ये । ४ ऐश्वर्याय० पादयोः ।

१३ आयुधन्यासः - वैष्णवे -१ खड्गाय० शिरसि । २ शार्ङ्गाय० मस्तके । ३ मुसलाय० दक्षिणभुजे । ४ हलाय० वामभुजे । ५ चक्राय० नाभिजठरपृष्ठेषु । ६ अङ्कुशाय० लिङ्गवृषणयोः । ७ गदायै० जङ्घयोर्जानुनोश्च । ८ पद्माय० गुल्फयोः पादयोश्च ।

शैवे आयुधन्यासः - १ वज्राय० शिरसि । २ शक्तये० मस्तके । ३ दण्डाय० दक्षिणभुजे । ४ खड्गाय० वामभुजे । ५ पाशाय० नाभिजठरपृष्ठेषु । ६ अङ्कुशाय० लिङ्गवृषणयोः । ७ गदायै० जान्वोः । ८ त्रिशूलाय० जङ्घयोः । ९ चक्राय० गुल्फयोः । १० पद्माय० पादयोः । ८ तत्तद्देवतासु विशिष्टान्यायुधानि विन्यस्येत् ।

१४ शक्तिन्यासः - १ लक्ष्म्यै० ललाटे । २ सरस्वत्यै० मुखे । ३ रत्यै० गुह्ये । ४ प्रीत्यै० कण्ठे । ५ कीर्त्यै० दिक्षु । ६ शान्त्यै० हृदि । ७ तुष्ट्यै० जठरे । ८ पुष्ट्यै० सर्वाङ्गेषु ।

१५ मन्त्रन्यासः - १ ॐ अग्निमीळे० ऋग्वेदं पादयोः । २ इषेत्वोर्ज्जेत्वा० यजुर्वेदं गुल्फयोः । ३ अग्न आयाहि० सामवेदं जङ्घयोः । ४ शन्नोदेवी० अथर्ववेदं जानुनोः । ५ एकाचमे० ऊर्वोः । ६ स्वस्तिनऽइन्द्रो० जठरे । ७ दीर्घायुस्त० हृदये । ८ विश्वतश्चक्षु० कण्ठे । ९ त्रातारमिन्द्र० वक्त्रे । १० त्र्यम्बकं० स्तनयोर्नेत्रयोश्च । ११ मूर्धानं दिवो० मूर्ध्नि ।

(विष्णोर्मन्त्रन्यासः - १ ॐ हृदयाय० हृदये । २ शिरसे स्वाहा-शिरसि । ३ शिखायैवषट्-शिखायाम् । ४ कवचाय हुम्-कवचे । ५ नेत्रत्रयाय वौषट्-नेत्रत्रये । ६ अस्त्रायफट्-करयोः । ७ ॐ नमः - हृदये । ८ नं० शिरसि । ९ मों० मुखे । १० भगवतें० शिखायाम् । ११ वासुदेवाय० कवचे । १२ ॐ नमो भगवते वासुदेवाय० अस्त्रे । १३ श्रीवत्साय० दक्षिणवामस्तनयोः । १४ कौस्तुभाय० उरसि । १५ वनमालायै० कण्ठे । १६ ॐ नमः पादयोः । १७ नं० जानुनोः । १८ मों० गुह्ये । १९ भं० नाभौ । २० गं० हृदये । २१ वं० कण्ठे । २२ तें० नासिकयोः । २३ वां० नेत्रयोः । २४ सुं० भाले । २५ दें० मूर्ध्नि । २६ वां० दक्षिणपार्श्वे । २७ यं वामपार्श्वे ।

Scanned by CamScanner

एवं रामे षडङ्गानि विन्यस्य ॐ नमो भगवते रामभद्राय - इति प्रत्यक्षरं न्यासः ।

शिवस्य - षडङ्गानि विन्यस्य ॐ नमो भगवते रुद्राय० दशाक्षरन्यासः ।

देव्यां - षडङ्गानि विन्यस्य - ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे० इति नवार्णन्यासः ।

लक्ष्म्यां - १ श्रीं ह्रीं क्लीं महालक्ष्म्यै नमः । २ श्रीं ह्रीं ऐं लक्ष्मी कमलधारिणी हंसः स्वाहा अम्बे-अम्बिके० । ३ ऐं चामुण्डायै विद्महे वरप्रदायै धीमहि । तन्नो लक्ष्मीः प्रचोदयात् । श्रीश्चते० गणेशस्य - १ ॐ श्रीं ह्रीं क्लीं ग्लौं गं गणपतये वरवरद सर्वजनं मे वशमानय स्वाहा । २ ॐ गं गणपतये नमः । ३ ॐ एकदन्ताय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् ॥ ॐ गणानान्त्वा० । भैरवस्य - ॐ ह्रीं बटुकाय आपदुद्धारणाय कुरु कुरु बटुकाय ह्रीं ॐ । ॐ नम उग्राय च भीमाय च । सरस्वत्याः - वदवद वाग्वादिनि स्वाहा (पावकानः०) । बालायाः - ऐं क्लीं सौः वद वद वाग्वादिनि स्वाहा । दत्तात्रेयस्य - ॐ द्रां दत्तात्रेयाय नमः । अन्यदेवतानां मन्त्रा देवतामन्त्रप्रकरणादवगन्तव्याः ।)

## नारायणमूर्त्तौ द्वादशाक्षर मन्त्रन्यासः ।

१ ॐ केशवाय- शिरसि । २ ॐ नं नारायणाय० मुखे । ३ ॐ मों माधवाय० ग्रीवायाम् । ४ भं गोविन्दाय० कण्ठे । ५ गं विष्णवे० पृष्ठे । ६ वं मधुसूदनाय० कुक्षौ । ७ तें त्रिविक्रमाय० कटौ । ८ वां वामनाय० जङ्घयोः । ९ सुं श्रीधराय० वामगुल्फे । १० दें हृषीकेशाय० दक्षिणगुल्फे । ११ वां पद्मनाभाय० वामपादे । १२ यं दामोदराय० दक्षिणपादे ।

## अष्टाङ्गमन्त्रन्यासः ।

१ हुं रुद्राय० हृदये । २ विष्णवे० शिरसि । ३ ब्रह्मणे० शिखायाम् । ४ ध्रुवाय० कवचे । ५ चक्रिणे० नेत्रत्रये । ६ अस्त्राय० अस्त्रे । ७ नमः शम्भवाय० गायत्र्यै० दक्षिणनेत्रे । ८ विजयाय० सावित्र्यै० वामनेत्रे । ९ चक्राय० शूलाय० पिङ्गलास्त्राय० दिक्षु ।

## पुरुषसूक्तन्यासः सर्वसाधारणः, विष्णोश्च ।

१ सहस्त्रशीर्षा० पादयोः । २ पुरुष एवेद ० जङ्घयोः । ३ एतावानस्य० जान्वोः । ४ त्रिपादूर्ध्व० ऊर्वोः । ५ ततो व्विराड्० वृषणयोः । ६ तस्माद्यज्ञात् सर्वहुतः० कट्योः । ७ तस्माद्यज्ञात् सर्वहुतऽऋचः० नाभौ । ८ तस्मादश्वा० हृदये । ९ तं यज्ञं० स्तनयोः । १० यत्पुरुषं० बाह्वोः । ११ ब्राह्मणोऽस्य० मुखे । १२ चन्द्रमा मनसो० चक्षुषोः । १३ नाभ्या आसी० कर्णयोः । १४ यत्पुरुषेण० भ्रुवोः । १५ सप्तास्या० भाले । १६ यज्ञेन यज्ञं० शिरसि ।

उत्तरनारायणन्यासः सर्वसाधारणः विष्णोश्च । १ अद्भ्यः सम्भृतः० हृदये । २ वेदाहमेतं० शिरसि । ३ प्रजापतिश्चरति० शिखायाम् । ४ यो देवेभ्य० कवचे । ५ रुचं ब्राह्मं० नेत्रयोः । ६ श्रीश्चते० अस्त्रे ।

(अयं पुरुषसूक्तन्यासः सहस्रशीर्षमूर्धनेत्रपादादिरूपाङ्ग व्यापृतपरमात्मद्योतकः, पुरुषसूक्तस्य सर्वदेवसाधारणत्वात् साधारण इति प्रतिष्ठेन्दावन्यत्र च प्रतिपादितम् । स्त्रीरूपदेवतासु प्रकृतेः प्राधान्यात् तत्र तत्र श्रीसूक्तन्यासः विशेषेण तु लक्ष्म्याः । एवमन्यदेवतासु तत्तद्देवतासूक्तानि अथर्वशीर्षाणि लिङ्गमन्त्रान् मूलमन्त्रान् वा पठेत् । यथा शिवस्य नमस्ते० रौद्राध्यायः षोडशर्चो वा । गणेशस्य-ब्रह्मणस्पतिसूक्तं गणपत्यथर्वशीर्ष वा । देव्याः श्रीसूक्तम्, अहं रुद्रेभिरिति देवीसूक्तं देव्यथर्वशीर्षं वा । हनुमतो वीरभद्रावतारत्वाद्रौद्रसूक्तम्-सूर्यस्य विभ्राडिति सौरसूक्तं सूर्याथर्व शीर्षं वा - इत्यादि स्वयमूहनीयम् ।)

## सूर्यस्य गायत्रीन्यासः ।

१ तकाराय० पादाङ्गुष्ठयोः । २ त्सकाराय० गुल्फयोः । ३ विकाराय० जङ्घयोः । ४ तुर्काराय० जानुनोः । ५ वकाराय० ऊर्वोः । ६ रेकाराय० गुह्ये । ७ ण्काराय० वृषणयोः । ८ यकाराय० कट्योः । ९ भर्काराय० नाभौ । १० गोकाराय० जठरे । ११ देकाराय० स्तनयोः । १२ वकाराय० हृदये । १३ स्यकाराय० कण्ठे । १४ धीकाराय० वदने । १५ मकाराय० तालुनि । १६ हिकाराय० नासाग्रे । १७ धिकाराय० चक्षुषोः । १८ योकाराय० भ्रूमध्ये । १९ योकाराय० ललाटे । २० नःकाराय० पूर्वशिरसि । २१ प्रकाराय० दक्षिणशिरसि । २२ चोकाराय० पश्चिमशिरसि । २३ दकाराय० उत्तरशिरसि । २२४ यात्काराय० सर्वत्र । २५ तत्सवितुर्० हृदये । २६ वरेण्यंशिरसि । २७ भर्गोदेवस्य - शिखायाम् । २८ धीमहि - कवचे । २९ धियो योनः - नेत्रत्रये । ३० प्रचोदयात् - अस्त्रे ।

## देवीमूर्तौ निवृत्त्यादिकलान्यासः ।

१ ॐ अं निवृत्त्यै० नमः । २ आं प्रतिष्ठायै० । ३ इं विद्यायै० । ४ ईं शान्त्यै० ५ उं धुन्धिकायै० । ६ ऊं दीपिकायै० । ७ ऋं रेचिकायै० । ८ ॠं मोचिकायै० । ९ ऌं परायै० । १० ॡं सूक्ष्मायै० । ११ एं सूक्ष्मामृतायै० । १२ ऐं ज्ञानामृतायै । १३ ओं सावित्र्यै० १४ औं व्यापिन्यै० । १५ अं सुरुपायै० । १६ अः अनन्तायै० । १७ कं सृष्ट्यै० । १८ खं ऋध्यै० । १९ गं स्मृत्यै० । २० घं मेधायै० । २१ ङं कान्त्यै० । २२ चं लक्ष्म्यै० । २३ छं धृत्यै० । २४ जं स्थिरायै० । २५ झं स्थित्यै० । २६ ञं सिद्ध्यै० । २७ टं जरायै० । २८ ठं पालिन्यै० । २९ डं शान्त्यै० । ३० ढं ऐश्वर्यै० । ३१ णं रत्यै० । ३२ तं कामिन्यै० । ३३ थं रदायै० । ३४ दं ह्लादिन्यै० । ३५ धं प्रीत्यै० । ३६ नं दीर्घायै० । ३७ पं तीक्ष्णायै० । ३८ फं सुप्त्यै० । ३९ बं अभयायै । ४० भं निद्रायै० । ४१ मं

Scanned by CamScanner

मात्रे । ४२ यं शुद्धायै० । ४३ रं क्रोधिन्यै० । ४४ लं कृपायै० । ४५ वं उल्कायै० । ४६ शं मृत्यवे० । ४७ षं पीतायै० । ४८ सं श्वेतायै० । ४९ हं अरुणायै० । ५० ळं असितायै० । ५१ क्षं सर्वसिद्धिगौर्यै नमः ।

### शैवे सद्योजातादिपश्च ब्रह्मकलादिन्यास : ।

१ ॐ ईशानाय० अङ्गुष्ठयोः । २ तत्पुरुषाय० तर्जन्योः । ३ अघोरेभ्यो० मध्यमयोः । ४ वामदेवाय० अनामिकयोः । ५ सद्योजाताय० कनिष्ठयोः । ६ सद्योजाताय० हृदयाय नमः । ७ वामदेवाय: शिरसे स्वाहा । ८ अघोरेभ्यो० शिखायै वषट् । ९ तत्पुरुषाय० कवचाय हुम् । १० ईशानाय० अस्त्राय फट् । ११ हृदयाय नमः । १२ शिरसे स्वाहा । १३ शिखायै वषट् । १४ कवचाय हुम् । १५ अस्त्राय फट् । १६ कवचेनावगुण्ठयेत् । १७ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानाम् । ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् - लिङ्गमुद्रया मूर्ध्नि । १८ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् - तर्जन्यङ्गुष्ठ योगेन । १९ हृदये० अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः - मध्यमाङ्गुष्ठयोगेन । २० गुह्ये वामदेवाय नमोज्येष्ठाय नमः श्रेष्ठाय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः - अनामिकाङ्गुष्ठयोगेन । २१ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवे भवेनातिभवे भवस्व मां भवोद्भवाय नमः - कनिष्ठिकाङ्गुष्ठयोगेनपादयोः ।

### कलान्यासः ।

१ ईशान्यै० । २ अभयदायै० ३ इष्टदायै० । ४ मरीच्यै० । ५ ज्वालिन्यै० । ६ शान्त्यै० । ७ विद्यायै० । ८ प्रतिष्ठायै० । ९ धृत्यै० । १० तमसे० । ११ जरायै० । १२ सत्त्वायै० । १३ निद्रायै० । १४ व्याध्यै० । १५ मृत्यवे० । १६ क्षुधायै० । १७ तृषायै० । १८ रजसे० । १९ रक्षायै० । २० रत्यै० । २१ पालिन्यै० । २२ कामायै० । २३ संजीवन्यै० । २४ धात्र्यै० । २५ वृध्द्यै० । २६ छायायै० । २७ क्रियायै० । २८ भ्रामण्यै० । २९ शोषिण्यै० । ३० ज्वरायै० । ३१ सिद्ध्यै० । ३२ ऋद्ध्यै० । ३३ दित्यै० । ३४ लक्ष्म्यै० । ३५ मेधायै० । ३६ स्वधायै० । ३८ प्रभायै० । एवं शिवप्रतिष्ठायां विशिष्टा न्यासाः कार्याः ।

### यन्त्रन्यासः ।

(केवलयन्त्रप्रतिष्ठायां प्रतिमानामधो वा तत्तद्देवतायन्त्रनिधाने - ताम्रादियन्त्रं - आपोहिष्ठा - इति तृचेन वा पावमानीभिर्वा प्रक्षाल्य पश्चामृतेन पश्चगव्येन च पृथक् पृथक् मन्त्रैः संशोध्य स्नपनविधौ

Scanned by CamScanner

प्रतिमया साकं यन्त्रमपि मन्त्रैः संस्नाप्य शय्याधिवासे तत्तद्देवतायन्त्रे तत्तद्देवताना-मावरणन्यासान् कृत्वा प्रतिष्ठाकाले केवलयन्त्रस्य यन्त्रसहितप्रतिमाया वा प्राणप्रतिष्ठां कुर्यात्-इति विशेषः।)

**षोडशो जीवन्यासः सर्वदेवसाधारणः।**

(अयं जीवन्यासो देवस्थापनानन्तरं कार्य इत्येकं मतम्। जीवन्यासस्य योगप्रक्रियासाध्यात्वादन्येषां तदसम्भवात् प्राणप्रतिष्ठयैव निर्वाह इति द्वितीय मतम्। वस्तुतस्तु जीवन्यासे शरीरप्राणगततत्त्वानां विन्यासात् प्राणप्रतिष्ठापदं लोके शास्त्रे च प्रतिष्ठात्वेन जीवन्यासस्य षोडशन्यासान्तर्गतत्त्वेन सर्वसाधारणत्वाज्जीवन्यासं कुर्यादिति समीचीनं भाति।)

१ ॐ प्रणवात्मने०। २ मं जीवात्मने०। ३ भं प्राणात्मने०। ४ बुं बुद्ध्यात्मने०। फं अहंकारात्मने०। ६ पं मन आत्मने०। ७ नं शब्दतन्मात्रात्मने०। ८ धं स्पर्शतन्मात्रात्मने०। ९ दं रूपतन्मात्रात्मने०। १० थं रसतन्मात्रात्मने०। ११ तं गन्धतन्मात्रात्मने०। १२ णं श्रोत्रात्मने०। १३ ढं त्वगात्मने०। १४ डं चक्षुरात्मने०। १५ ठं जिह्वात्मने०। १६ टं घ्राणात्मने०। १७ ञं वागात्मने०। १८ झं वाण्यात्मने०। १९ जं पदात्मने०। २० छं पाय्वात्मने०। २१ चं उपस्थात्मने०। २२ ङं पृथिव्यात्मने०। २३ घं अवात्मने०। २४ गं तेज आत्मने०। २५ खं प्राणात्मने०। २६ कं आकाशात्मने०। २७ षं सूर्यात्मने०। २८ सं सोमात्मने०। २९ ळं वह्न्यात्मने०।

(ततः अर्चाबीजं स्वामिमतं मूर्त्तौ संयोजयेत्। अथवा तत्तद्देवताया वैदिकमन्त्रं, आद्याक्षरं सानुस्वारं चतुर्थ्यन्तं नमः सहितं 'रामात्मने नमः' इत्यादिकं पठेत्।) ३० सर्वात्मने०। ३१ अनुग्रहात्मने०। ३२ सर्वभूतात्मने०। ३३ सर्वसंहारात्मने०। ३४ कोपात्मने०। ३५ आत्मतत्त्वाय०। ३६ आत्मतत्त्वाधिपतये ब्रह्मणे०। ३७ विद्यातत्त्वाय०। ३८ विद्यातत्त्वाधिपतये० विष्णवे०। ३९ शिवतत्त्वाय०। ४० शिवतत्त्वाधिपतये रुद्राय०। इति जीवन्यासः। 'सकलतत्त्वसहितां साङ्गां सपरिवाराममुकदेवताम् अस्यां प्रतिमायां न्यसामि' इत्यक्षतान् निक्षिप्य सर्वतत्त्वात्मिकां तां तां देवतां प्रतिमायां स्थितां भावयेत्।

एकदिनसाध्ये सद्यः प्रतिष्ठाकर्मणि एतावन्न्यासविधिकरणाशक्तौ इमानि तत्त्वानि विन्यसेत्। १ ॐ पुरुषात्मने नमः। २ प्राणात्मने०। ३ प्रकृतितत्त्वात्मने०। ४ अहंकारतत्त्वाय०। ५ मनस्तत्त्वाय०। ६ प्रकृतितत्त्वाय०। ७ बुद्धितत्त्वाय०। ८ हृदयाय नमः। ९ शब्दतत्त्वाय०। १० स्पर्शतत्त्वाय०। ११ रूपतत्त्वाय०। १२ रसतत्त्वाय०। १३ गन्धतत्त्वाय०। १४ श्रोत्रतत्त्वाय०। १५ त्वक्तत्त्वाय०। १६ चक्षुस्तत्त्वाय०। १७ जिह्वातत्त्वाय०। १८ घ्राणतत्त्वाय०। १९ वाक्तत्त्वाय०। २० पाणितत्त्वाय०। २१ पादतत्त्वाय०। २२ उपस्थतत्त्वाय०। २३ पृथिवीतत्त्वाय०। २४ अप्तत्त्वाय०। २५ तेजस्तत्त्वाय०। २६ वायुतत्त्वाय०। २७ आकाशतत्त्वाय०। २८ सत्त्वाय०। २९ रजसे०। ३० तमसे०। ३१ देहतत्त्वाय०। ३२ सर्वतत्त्वसहितां सपरिवारां अमुकदेवतां प्रतिमायां न्यसामि। इति न्यासाः।

## निद्रावाहनम् ।

देवशिरोदेशे निहिते निद्राकलशे निद्रामावाहयेत् - ॐ परमेष्ठिनं नमस्कृत्य निद्रामावाहयाम्यहम् । मोहिनीं सर्व भूतानां मनोविभ्रम कारिणीम् ॥१॥ विरूपाक्षे शिवेशान्ते आगच्छत्वं तु मोहनि । वासुदेवहिते कृष्णे कृष्णाम्बरविभूषिते ॥२॥ आगच्छ सहसाऽजस्रं सुप्तसंसारमोहिनि । सुषुप्तं संहरेर्देवि कुमार्य्यैकान्तमानसे ॥३॥ श्रमविश्वासवाह्यम्बु आगच्छ भुवनेश्वरि । तमः सत्त्वरजोयुक्ते आगच्छ वरदायिनि ॥४॥ मनो बुद्धिमहङ्कारं संहरेस्त्वं सरस्वति । शब्दं स्पर्शं च रूपञ्च रसं गन्धश्च पञ्चमम् ॥५॥ आगच्छ गृह्ण संक्षिप्त मोहपाशनिबन्धनि ॥ भवस्योत्पत्तिहेतुस्त्वं यावदाभूतसम्प्लवम् ॥६॥ भुवः कल्पान्तसन्ध्यायां वससे त्वं चराचरे । भोगिशय्याप्रसुप्तस्य वासुदेवस्य शासने ॥७॥ त्वं प्रतिष्ठाऽसि वै देवि मुनियोगिसमुत्थिते । पितृदेवमनुष्याणां सयक्षोरगर क्षसाम् ॥८॥ पशुपक्षिमृगाणां च योगमायाविवर्ध्धिनि । वससे सर्वसत्त्वेषु मातेव हितकारिणी ॥९॥ एहि सावित्रिमूर्त्तिस्त्वं चक्षुर्भ्यां स्थानगोचरे । विश नासापुटे देवि कण्ठे चोत्कण्ठिता विश ॥१०॥ प्रतिभावय मां सर्वं मातृवद् देवि सुन्दरि । इदमर्घं मया दत्तं पूजेयं प्रतिगृह्यताम् ॥११॥ ॐ उप प्प्रागात्परमँय्यत्त्सधस्त्थमर्व्वाँ ॥२॥ ऽ अच्छा पितरम्मातरञ्च । अद्या देवाञ्जुष्टतमो हि गम्म्याऽअथाशास्ते दाशुषे व्वार्य्याणि ॥२९-२४॥ ॐ भू० सपरिवारायै निद्रायै नमः निद्रामावाहयामि स्थापयामि ॥ ॐ सपरिवारायै निद्रायै नमः इति पञ्चोपचारैः सम्पूज्य । पुरतो बलित्रयं निधाय बलिद्रव्याय नमः - इति सम्पूज्य-जलमादाय - १ ॐ प्राच्यै दिशे० इन्द्रादिभ्यो० बलिं सम० । २ ॐ समख्ये देव्या० मातृभ्यो० बलिं सम० । ३ ॐ नहिस्पश० क्षेत्रपालाय० बलिं सम० । आचम्य 'मण्डलशय्ययोरन्तरे न गन्तव्यम् । सुखशायी भव' इति प्रैषद्वयं दत्त्वा-जलमादाय-आसु प्रतिमासु सूर्याचन्द्रमसौ यावद् दिव्यदेव कलातेजोऽभिवृध्धिपूर्वकं देवतासान्निध्यहेतवे कृतेन अनेन शय्याधान्य (फल पुष्पौषधी) अधिवासन पूर्वकं तत्त्वन्यास कर्मणा सपरिवारः स्थाप्यदेवः प्रीयताम् । (सप्त-पञ्च-त्रि-एकरात्र-याममात्र-गोदोहनकालान्यतमपक्षेण यथासमयमधि वासनम् । एकरात्राधिकदिनाधिवासपक्षस्वीकारे प्रतिदिनं स्थापितदेवतापूजनपूर्वकं प्रत्यहं शान्तिपौष्टिक होम-मूर्त्तिमूर्त्यधिपति लोकपाल होम- स्थाप्य देवता होम विभिन्न कुंण्ड होम-व्याहृतिहोम-तत्त्वन्यासहोम-तत्त्वन्यासा अवश्यं कार्याः)

## इति शय्याधिवासः तत्त्वन्यासाश्च ।

एवं त्रिदिनसाध्ये द्वितीयदिनसाध्यं द्विदिनसाध्ये प्रथमदिनसाध्यं कर्म सम्पन्नम् । स्नपनानन्तरं प्रासादस्नपनाधिवासने पिण्डिकाधिवासनं शान्तिकादि होमाः शय्याधिवासतत्त्वन्यासश्च ब्राह्मणविभागेन एककालावच्छेदेन कार्याः ।

स्थापितदेवतानां सायन्तनपूजन नीराजनादि तिलकाशीर्वादादि कुर्यात् । द्वितीयेऽहनि प्रतिष्ठाङ्गत्वेन स्वयं प्रतिनिधिद्वारा च जलयात्रा-निक्षेपान्त वास्तुपूजन-स्नपन-प्रासादस्नपनाधिवासनपिण्डिकाधिवासन-

Scanned by CamScanner

विहितहवन-शय्याधान्याधिवास-तत्त्वन्यासहोम-तत्त्वन्यास निद्रावाहनान्तं कर्म कृतं तेन सपरिवारः स्थाप्यदेवः प्रीयताम् ॥

इति द्वितीयदिनकृत्यम् ।

## ६६ प्राणप्रतिष्ठादिनकृत्यम् ।

(इष्टलग्नशुद्धिसमयात्पूर्वं यथा प्रतिमादीनां स्थिरीकरणं सुचारुरीत्या सम्पद्येत, तथा घण्टाद्वयात् घण्टात्रयाद्वा पूर्वं प्रतिष्ठादिनकार्यं समारभेत । अनेकमूर्त्तिसत्त्वे मूर्तीनां बृहत्त्वेन स्वल्पेन कालेन संस्थापनासम्भवे द्वितीयदिनरात्रौ तादृशीर्मूर्त्तीः देवमन्त्राभिमन्त्रितेन सर्वतीर्थमयेन जलेन 'ॐ नृसिंहाय हुं फट्' इति संप्रोक्ष्य देवं प्रबोध्यार्घ्यं दत्त्वा देवतासूक्तेन मन्त्रेण वा स्तुत्त्वा उत्तरार्घं दत्त्वा शिल्पिने तत्तन्निर्दिष्टस्थाने स्थापयितुं दद्यात् । दृष्ट्यादिकं निर्दिष्टस्थाने शिल्पी साधयेत् । दृढं स्थापयेच्च । शिल्पशास्त्रे लिङ्गं सर्वव्यापकब्रह्ममयं मत्त्वा तस्य प्रासादे शिखरे वा मूर्त्यवतारणक्षमं छिद्रं संरक्ष्याकाशमार्गेणावतारणं निर्दिष्टम् । किन्तु सर्वासामपि देवतानां व्यापक ब्रह्ममयत्वेन तथा ऽ धोऽवतारणे प्रतिमाभङ्गादिसम्भवः । पुनश्च सर्वासु पद्धतिषु द्वारसम्मुखं कृत्वाऽर्घं मधुपर्कं च दत्त्वा प्रवेशयेद् । इत्युक्तं तदेव सुकरं शास्त्रसम्मतश्च प्रतिभाति ।)

यजमानः कृतनित्यक्रियः प्रतिष्ठादिनकृत्यमारभेत । तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । शान्तिपाठादि । नमस्काराः । जलमादाय - मम सकुटुम्बस्य समस्तग्रामजनभक्तजनदेशजलकल्याणाय चन्द्रसूर्यौ यावत् प्रतिमासु देवकलासान्निध्यहेतवे प्रतिष्ठादिनसाध्यं कर्म स्वयं ब्राह्मणद्वारा च करिष्ये । तत्रादौ आसनविध्यादिस्थापितदेवतापूजनं करिष्ये । समयं विचार्यं स्वल्पं विस्तरेण वा स्थापितदेवतापूजनान्तं कृत्वा । संकल्पः - प्रतिष्ठादिन विहितं मूर्त्तिमूर्त्यधिपतिलोकपालानां स्थाप्यदेवतानाञ्च होमं करिष्ये । घृतादिकं हविः संस्कृत्य- मूर्त्तिमूर्त्यधिपतिलोकपालानां, स्थाप्यदेवतानाञ्च घृतेन तिलैर्वा २८ वा ८ संख्यया प्रतिदैवतं पूर्ववद्धोमं कृत्वा-ॐ मूर्धानं० इति मन्त्रेण पूर्णाहुतिं हुत्वा ॐ विश्वतश्चक्षु० इति मन्त्रेण देव पादादिमस्तकान्तं स्पृष्ट्वा 'कृतममुं होमं देवाय निवेदयामि' इति देवदक्षिणकर्णे होमं निवेदयेत् । जलमादाय- करिष्यमाणप्राणप्रतिष्ठाङ्ग भूतषोडशसंस्कारसिद्ध्यर्थं १२८ संख्यया समस्तव्याहृतिहोमं करिष्ये । ततः १२८ संख्यया तिलैः समस्तव्याहृतिमन्त्रेण ॐ भूर्भुवः स्वः स्वाहा - इति होमः ।

## ६७ प्रासाददिक्षु होमः ।

नूतनः प्रासादश्चेत् प्रासादस्याष्टदिक्षु स्थण्डिलानि कृत्वा तादृशहोमयोग्यस्थलाभावे प्रासादपुरत एकमेव स्थण्डिलं कृत्वा - जलमादाय - प्रासादरक्षार्थं देवप्रबोधार्थञ्च प्रासाददिग्होमं करिष्ये । सर्वस्थण्डिलेषु पञ्चभूसंस्कारपूर्वकमग्निं प्रतिष्ठाप्य ब्रह्मासनादि-पवित्रयोः प्रणीतासु निधानं इत्यन्तं

Scanned by CamScanner

कुर्यात् । (अयमत्र विशेषः - आघाराज्यभागनवाहुति स्विष्टकृतां संस्रवः प्रोक्षण्यां, स्थण्डिलेशाने स्थापिते सकलकलशे प्रधानदेवताहोमसंस्रवः । अस्य देवशिरोऽभिषेकरूप प्रतिपत्त्यर्थत्वाद्) आज्यभागान्ते स्थापितदेवतामूलमन्त्रेण गायत्र्या वा समिद्भिः आज्येन च प्रतिस्थण्डिलं १००८, १०८, २८ वा ८ संख्यया होमं कृत्वाऽज्येन ईशानकलशे संस्रवः, ततः आज्येन नवाहुतयः, स्विष्टकृत्, प्रोक्षण्यां त्यागः । संस्रवप्राशनादिप्रणीताविमोकान्तम् । अग्निविसर्जनम् । ईशानकलशसंस्रवसंरक्षणम् ।

स्थलसङ्कोचादष्टदिक्षु होमासम्भवे प्रासादपुरतः स्थण्डिलेऽग्निं प्रतिष्ठाप्य ईशाने सजलं कलशं संस्थाप्य आज्यभागान्ते देवतामूलमन्त्रेण गायत्र्या वा समिद्भिः आज्येन च ८०६४, ८६४, २२४ वा ६४ संख्यया होमं कृत्वा कलशे संस्रव प्रक्षेपः । नवाहुतयः स्विष्टकृत् । प्रोक्षण्यां संस्रवः । संस्रवप्राशनादि प्रणीकाविमोकान्तम् । अग्निविसर्जनम् । ईशानकलशजल संस्रव संरक्षणम् । इति प्रासाददिग्घोमः ।

## ६८ देवप्रबोधनम् । प्रासादप्रवेशनञ्च ।

नूतनः प्रासादश्चेत् संपातकलशजलमेकीकृत्य, जीर्णप्रासादसंस्कारे तु कलशे जलं प्रपूर्य मूलमन्त्रेण शतमष्टवारं वाऽभिमन्त्र्य ॐ ये तीर्थानि० गङ्गासिन्धु० इति मन्त्राभ्यां सर्वतीर्थानि ध्यात्वा देवाच्छादनमपसार्य हस्ते जलमादाय तेन प्रतिदैवतं ॐ नृसिंहाय हुं फट् - इति मन्त्रेण देवशिरोऽभिषिञ्चेत् । ततः सर्षपानादाय ॐ रक्षोहणं० ४ कृणुष्वपाजः० ५ प्राच्यै दिशे स्वाहा० १ दिग्बन्धं कृत्वा शङ्खतूर्यादिनिनादेन देवं प्रबोधयेत् - पुष्पाण्यक्षतानादाय - ॐ प्रबुध्यस्व महाभाग देवदेव जगत्पते । मेघश्याम गदापाणे प्रबुद्धकमलेक्षण ॥ ॐ उद्बुध्यस्वाग्ने प्रतिजागृहित्त्व मिष्टापूर्ते स ꣳ सृजेथामयञ्च । अस्मिन् त्सधस्थेऽअद्ध्युत्तरस्मिन् व्विश्वे देवा यजमानश्च सीदत ॥१८-६१॥ (ॐ उत्तिष्ठ ब्रह्मणस्पते०) इति मन्त्रेण देवं प्रबोधयेत् । पात्रेपञ्चरत्नानि 'अङ्कुरितबीजानि पुष्पफलानि मधुघृतशर्करादिदुग्धपायसखाद्यानि देवाय निवेद्य ॐ सहस्रशीर्षा० इति पुरुषसूक्तेन तत्तद्देवतासूक्तेन मन्त्रेण वा देवं स्तुवीत । ततः शायिताः प्रतिमा उत्थाप्य संशोध्य जलेन संस्नाप्य अहतवासांसि परिधाप्य गन्धपुष्पाक्षतैः सम्पूज्येत् । ततः पात्रे तोयक्षीरकुशाग्रतिलतण्डुलयवसर्षपगन्धपुष्पपूगीफलादिकं निधाय देवाय उत्तरार्घं निवेदयेत् - ॐ धामन्ते० ऊर्मिम् ।

ततः प्रतिमाः - ॐ रथे तिष्ठन्नयति व्वाजिनं ÷ पुरो यत्र यत्र कामयते सुषारथि ? । अभीशूनाम्महिमानम्पनायत मन ÷ पश्चादनु यच्छन्ति रश्मयं ÷ ॥२९-४२॥ इति मन्त्रेण रथे याने वा निवेश्य तूर्य घोषेण मङ्गलसूक्तैः पश्चिमद्वारेण बहिर्निर्गत्य प्रासादप्रादक्षिण्येन देवं प्रतिमा वा द्वारसम्मुखमानीय काष्ठपीठे देवं संस्थाप्य - ॐ धामन्ते० इत्युत्तरार्धं दत्त्वा द्वारदेवमध्येऽन्तः पटं धृत्वा मङ्गलपद्यानि पठेयुः । ततोऽन्तःपटं निःसार्य देवमुखे-ॐ मधुव्वाता० ३ यन्मधुनो० इति मन्त्रेण मधुपर्कं दत्त्वा ॐ द्यौः शान्ति० इत्यादिमन्त्रैः देवं प्रतिमाश्च प्रासादं गर्भ गृहं वा प्रवेश्य तत्तत्स्थानसन्निधौ निवेश्य यावत् स्थिरीकरणं संरक्षेत् ।

Scanned by CamScanner

## ६९ स्थापनकाले लिङ्गस्य प्रतिमाया वा चलने होमः ।

स्थाप्यमाने देवे लिङ्गे वा यां यां दिशं श्रयेत्, तत्तद्दिगीशमन्त्रेण अष्टोत्तर शतसंख्यया शमीपलाशान्यतरसमिद्भिस्तिलैर्वा होमं कुर्यात् । अयं कृताकृतः । स्थापनकाले दिगाश्रयणसम्भवात् सुदृढस्थापनानन्तरं तदशक्यत्वात् ।

(ततः शिल्पिनस्तत्तद्देवतागर्तेषु तत्तद्वस्तुजातं पूर्वं न निक्षिप्तं चेद् अधुना निक्षिप्य लेपादिना गर्तान् पूरयित्त्वा मध्यसूत्र समत्त्व - स्थिरत्त्व - दृष्टिसाधनादिकं सम्यक् संसाध्य वज्रलेपादिना स्थिरीकुर्यात् । अस्मिन्नवसरे प्रातः स्थापितदेवतापूजनादिकं न कृतं चेत्, तर्हि पूजनमधुना यथासमयं सम्पादयेद् ब्राह्मणाँश्च पूजयेत् ।

## ७० विशिष्टो जीवन्यासः ।

(अयं तत्त्वन्यासप्रकरण पठिताज्जीवन्यासाद् भिन्नः केवलं योगप्रक्रियाज्ञानवता कर्तुं शक्यः, अस्मादृशां संसारिणां तु तत्पाठमात्रेण कृत्या च संतोषो भवेत्, तथापि ग्रन्थनिर्दिष्टत्वादिह विवृतः । प्राणप्रतिष्ठाविधिनाप्ययमेव हेतुः सिध्यत्यत्र न शङ्कावसरः ।)

पूर्वं तत्प्रतिमापिण्डिकासंलग्नां सुवर्णशलाकां दर्भशलाकां वा निधाय मुहूर्त्तसमये सन्निहित आगते आचार्यः समाहितमनाः श्रीपरमेश्वरं चिन्तयेत् । आत्मानं जगदीश्वरं भावयेत् । पिण्डिकां देवसंयोगमिच्छन्तीमीशित्वादि गुणयुतां ध्यायन् दैवज्ञोक्ते शुभे लग्ने शलाकां निष्कास्य 'ॐ मनोजूति० तदस्तु मित्रावरुणा० (ऋ०) गृहा वै प्रतिष्ठा० वाङ्मनः० (साम०) तदस्तु मित्रा० (अथर्व०) ध्रुवा द्यौः० (ऋ० ध्रुवासि ध्रुवोऽयं० (शु० यजु०) मन्त्रान् देवमन्त्रश्च पठित्वा-प्रतितिष्ठ परमेश्वर-इत्युक्त्वा देवं प्रार्थयेत् ।। ॐ लोकानुग्रह हेत्वर्थं स्थिरो भव सुखाय नः । सान्निध्यं हि सदा देव प्रत्यक्षं परिकल्पय ॥१॥ प्रधानपुरुषो यावद्यावच्चन्द्रदिवाकरौ । तावत्त्वमनया शक्त्या युक्तोऽत्रैव स्थिरो भव ॥२॥ इति ।

ततः पूर्वस्थापित शान्तिकलशेभ्यः किञ्चिज्जलमादाव मूलमन्त्रेणाभिषिच्य सर्वतीर्थमयं ध्यात्वा देवमभिषिच्य ॐ विश्वतश्चक्षु० इति देवस्य शिरसि दक्षिणहस्तं दत्त्वा सकलनिष्कलं ध्यात्वा प्रणवव्याहृतिपूर्वां गायत्रीं देवतामन्त्रश्च देवस्य दक्षिणे कर्णे बामे च जपेत् ॥ अतसीपुष्पसंकाशं शङ्खचक्रगदाधरम् । संस्थापयामि देवेशं देवो भूत्वा जनार्दनम्-इति विष्णोः । शिवस्य प्रार्थना ॐ त्र्यक्षश्च दशबाहुश्च चन्द्रार्ध कृतशेखरम् । वृषभस्थं गणेशश्च स्थापयामि त्रिलोचनम् । ब्रह्मणः - ॐ ऋषिभिः संस्तुतं देवं चतुर्वक्त्रं जटाधरम् । पितामहं महाप्राज्ञं स्थापयाम्यम्बुजोद्भवम् ॥ सूर्यस्य-ॐ सहस्रकिरणं शान्तं ह्यप्सरोगणसेवितम् । पद्महस्तं महाबाहुं स्थापयामि दिवाकरम् ॥

Scanned by CamScanner

### केवलयोगप्रक्रियासाध्यो जीवन्यासः ।

नाभेरधस्ताद् आधारस्थानाद् आकुञ्चनप्रकारेण तेज आनीय नाभिचक्रं ततो हृत्पद्ममानीय हृत्पद्मात् पञ्चभूततन्मात्रैरुपैत्य पञ्चप्राणैः ऐश्वर्यधर्मज्ञानवैराग्यैः संयुतं दिवाकरसहस्राभं विद्युत्संघातसन्निभं ऊर्ध्वचक्रत्रयभेदेन स्वदेहाद् ध्यानेन वामनाड्या निःसार्य ब्रह्मरन्ध्रेण प्रतिमां प्रवेशयन् चिन्तयेत् । तत्र ललाटे किञ्चित् स्थिरं कृत्वा घटिकाद्वारमानीय तत्र स्थिरीकृत्य शीर्षण्याः सर्वत्र प्रवेशं चिन्तयेत् । तस्मात् तेजसः चक्षुरादीनि बुद्धीन्द्रियाणि वागादीनि कर्मेन्द्रियाणि मनः सहितानि यथास्थानं प्रविशन्तु-इति चिन्तयित्वा पादाङ्गुष्ठादि नासिकान्तं प्राणं निवेशयेत् । व्यानं नाभौ समानं हृदये सुषुम्णामध्यगतं ब्रह्मरन्ध्रे उदानं निवेशयेत् । हृत्पद्मदलाष्टकं तन्मध्ये कर्णिकायां व्यापिनं पुरुषं प्रणवे न्यसेत् ॥

ॐ मं जीवात्मने नम० । ॐ भं जीवोपाधये नमः । शरीरे व्यापकं न्यसेत् । ॐ बं बुद्ध्यात्मने० ॐ फं अहंकारात्मने० पं मन आत्मने० इति हृदये । नं शब्दतन्मात्रात्मने० शिरसि । धं स्पर्शतन्मात्रात्मने० वक्त्रे । दं रूपतन्मात्रात्मने० हृदये । थं रसतन्मात्रात्मने० हस्तयोः । तं गन्धतन्मात्रात्मने० पादयोः । णं श्रोत्रतन्मात्रात्मने० श्रोत्रयोः । ढं त्वङ्मात्रात्मने० त्वचि । डं चक्षुरात्मने० चक्षुषोः । ठं जिह्वात्मने० जिह्वायाम् । टं घ्राणात्मने० घ्राणे । ञं वागात्मने० वाचि । झं पाण्यात्मने० पाण्योः । जं पादात्मने० पादयोः । छं पाय्वात्मने० पायौ । चं उपस्थात्मने० उपस्थे । ङं पृथिव्यात्मने० पादयोः । घं अबात्मने० बस्तौ । गं तेज आत्मने० हृदये । खं प्राणात्मने० प्राणे । कं आकाशात्मने० शिरसि । शं पुण्डरीकात्मने० हृदये । पं सूर्यात्मने० हृत्पुण्डरीकमध्ये । सं सोमात्मने० तन्मध्ये० । हं बाह्यात्मने० तन्मध्ये । रं वह्न्यात्मने० सर्वत्र ।

ततोऽर्चाबीजं स्वाभिमतमूर्त्यां स्वमन्त्रेण संयोज्य-ॐ पुरुषात्मने० इति पौरुषं भावमानीय ध्यात्वा, यं सर्वात्मने० इति सर्वसाक्षिणं भावयित्वा, गं सर्वात्मने० इति सर्वतोमुखं भावयित्वा, वं अनुग्रहात्मने० इत्यनुग्रहात्मकं भावयित्वा, सर्वभूतात्मने० इति सर्वभूतकारणम्, सर्वसंहारात्मने० इति सर्वसंहारात्मकम्, क्षं कोपात्मने० इति सर्वसंयमकारणं, भावयित्वा क्रमेण ध्यात्वा तत्त्वन्यासं कुर्यात् । (इदं पूर्वं न कृतं चेदिदानीं कार्यम् ।)

### तत्त्वन्यासः ।

(अयं न्यासोऽपि पूर्वं न कृतश्चेदिदानीं कार्यः ।)

ॐ आत्मतत्त्वाय० आत्मतत्त्वाधिपतये ब्रह्मणे० । विद्यातत्त्वाय० विद्यातत्त्वाधिपतये विष्णवे० हृदये । शिवतत्त्वाय० शिवतत्त्वाधिपतये शिवाय० शिरसि । पृथिवीतत्त्वाय० पादयोः । अपूतत्त्वाय०

Scanned by CamScanner

बस्तौ (गुदे)। तेजस्तत्त्वाय० हृदये। वायुतत्त्वाय० घ्राणयोः। आकाशतत्त्वाय० शिरसि। गन्धतत्त्वाय० पादयोः)। रसतत्त्वाय० बस्तौ (गुदे)। रूपतत्त्वाय० हृदये। स्पर्शतत्त्वाय० त्वचि। शब्दतत्त्वाय० शिरसि। शब्दतत्त्वाय कर्णयोः। घ्राणतत्त्वाय० घ्राणे। जिह्वातत्त्वाय० जिह्वायाम्। चक्षुस्तत्त्वाय० चक्षुषोः। त्वक्तत्त्वाय० त्वचि। श्रोत्रतत्त्वाय० श्रोत्रयोः। पायुतत्त्वाय० पायौ (गुदे) उपस्थतत्त्वाय० उपस्थे। हस्ततत्त्वात्मने० हस्तयोः। पादतत्त्वाय० पादयोः। वाक्तत्त्वाय० वाचि। मनस्तत्त्वाय० हृदि। बुद्धितत्त्वाय० बुद्धौ। ततो हृदय एव-अहंकारतत्त्वाय० सत्त्वात्मने० रज आत्मने० तम आत्मने०। पुरुषतत्त्वाय०। रागतत्त्वाय० ज्ञानतत्त्वाय० विज्ञानतत्त्वाय० नीतितत्त्वाय० तर्ककलातत्त्वाय०। कालतत्त्वाय०। मायातत्त्वाय०। ईशतत्त्वाय०। सदाशिवतत्त्वाय०। शक्तितत्त्वाय०। शिवतत्त्वाय०।

**इति तत्त्वन्यासः।**

ततो देवे पञ्चोपनिषन्मन्त्रान् न्यसेत्। तत्प्रकारस्त्वेवम् - ॐ पां पराय परमेष्ठ्यात्मने० पादयोः। यां पराय पुरुषात्मने० नाभौ। रां पराय विश्वात्मने० हृदये। लां पराय निवृत्त्यात्मने० कण्ठे। वां पराय सर्वात्मने० मूर्ध्नि। ततः प्रणवेन निरोधमुद्रां प्रदर्श्य मूलमन्त्रं पठित्वा-मन्त्रं देवेन्यसामि। ततः पुरुषसूक्तं रुद्रे रुद्रसूक्तं अन्यदेवतासु तत्तद्देवतासूक्तं लिङ्गमन्त्रं तत्तन्मन्त्रं वा पठेत्। ततः पञ्चभूतमन्त्रान् न्यसेत् - ॐ स्योना पृथिवि० घ्राणे। अप्सुमे सोमो० (ऋ०) (आपोहिष्ठा०) जिह्वायाम्। शुक्रमसि० (ऋ०ऋ तेजोऽसि शुक्र० (यजु०) नेत्रयोः। वायोशतं० (ऋ०) (आनो नियुद्भिः० यजु०) त्वचि। नासद० (ऋ०) (घृतङ्घृतपावानः० नाभ्या आसीद०) श्रोत्रयोः।

तत ईषत् तिर्यग् देवमुखमीक्षमाणः पुरुषसूक्तं तत्तद्देवतासूक्तं सूक्ताभावे मन्त्रं वा पठेत्। ततः सव्याहृतिकां सप्रणवां सशिरस्कां गायत्रीं पठेत् - ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो योनः प्रचोदयात्। ॐ आपो ज्योतीरसोऽमृतं ब्रह्मभूर्भुवः स्वरोम् - इति। ततो-यत्ते यमं वैवस्वतं० इति द्वादशर्चं प्राणसूक्तं जपेत्। तत्र मन्त्रस्य उत्तरार्धं द्वादशमन्त्रेषु समानमेव। ऋग्वेद मं० १० सू० ५८ म० १ तः १२॥ प्राणसूक्तमृग्वेदे - १ ॐ यत्ते यमं वैवस्वतं मनो जगाम दूरकम्। तत्त आवर्त्तयामसीह क्षयाय जीवसे॥ २ यत्ते दिवं यत् पृथिवी मनो जगाम दूरकम्। तत्त आवर्त्त०॥३ यत्ते भूमिं चतुर्भृष्टिं मनो जगाम दूरकम्। तत्त आवर्त्त०॥४ यत्ते चतस्रः प्रदिशो मनो जगाम दूरकम्। तत्त आवर्त्त०॥ ५ यत्ते समुद्रमर्णवं मनो जगाम दूरकम्। तत्त आवर्त्त०॥ ६ यत्ते मरीचीः प्रवतो मनो जगाम दूरकम्। तत्त आवर्त्त०॥ ७ यत्ते अपो यदोषधीर्मनो जगाम दूरकम्। तत्त आवर्त्त०॥ ८ यत्ते सूर्यं यदुषसं मनो जगाम दूरकम्। तत्त आवर्त्त०॥ ९ यत्ते पर्वतान् बृहतो मनो जगाम दूरकम्। तत्त आवर्त्त०॥ १० यत्ते विश्वमिदं जगन्मनो जगाम दूरकम्। तत्त आवर्त्त०॥ ११ यत्ते पराः परावतो मनो जगाम दूरकम्। तत्त आवर्त्त०॥ १२ यत्ते भूतं च भव्यञ्च मनो जगाम दूरकम्। तत्त आवर्त्तयामसीह क्षयाय जीवसे॥ ॐ प्राणदाऽअपानदा० प्रतिक्षत्रे प्रतितिष्ठामि० (शु० यजु०) एभिर्मन्त्रैः) प्रतिमायां देवसान्निध्यं

Scanned by CamScanner

प्रार्थयेत् । जलमादाय-अनेन जीवन्यासरूपप्राणप्रतिष्ठाकर्मणा सूर्याचन्द्रमसौ यावत् प्रतिमासु दिव्यदेवकलासान्निध्यमस्तु । अनेन जीवन्यासकर्मणा सपरिवारः प्रधानदेवः प्रीयताम् ॥

इति जीवन्यासः ।

(लोके प्राणप्रतिष्ठाशब्देन प्रामुख्येन व्यवहाराज्जीवन्यासविधेर्योगिमात्रसाध्यत्वात् सामान्यभक्तानां तदज्ञानात् पूर्वोक्तषोडशन्यासे प्राणप्रतिष्ठाविधौ च उपरिनिर्दिष्टविधेः साकल्येन समावेशा ल्लोकव्यवहारसिद्धत्वात् शास्त्रविहितत्वाच्च प्राणप्रतिष्ठाविधिसम्पादनं श्रेयस्करम् ।)

## ७१ प्राणप्रतिष्ठाविधिः ।

निश्चितेष्टघटीलग्नशुद्धिमुहूर्त्तात् अर्धघण्टासमयात्पूर्वं शिल्पिभिः तासु तासु प्रतिमासु लेपादिना दृष्टिसाधनसमसूत्रत्वसमत्वस्थिरत्वादिना चलनायोग्यासु सम्यक् स्थिरीकृतासु साचार्यर्त्विग् यजमानश्चतुर्वेदज्ञैर्ब्राह्मणैः सह पूजासम्भारादिकं गृहीत्वा मन्दिरं प्रविशंतु । प्रतिप्रतिमं समीपे ससम्भारमेकैकं ब्राह्मणमुपवेश्य प्राणप्रतिष्ठाविधिमारभेत । निर्दिष्टसमये प्राणप्रतिष्ठामन्त्रतत्तद्देवतासूक्तमन्त्रजपादिविधिः स्यात्तथा प्रयतनीयम् । प्रतिमापिण्डिकान्तरे सुवर्णशलाकां दर्भशलाकां वा रक्षेत् । प्राणप्रतिष्ठाकर्मणि सम्पन्ने शलाकां मिष्कासयेत् ।)

यजमानः प्राङ्मुख उदङ्मुखो वोपविश्य - आचमनम् । प्राणायामः । शान्तिपाठः । देवता नमस्कारादि । जलमादाय - विष्णु० तिथौ समस्तग्रामजन भक्तजनदेशजन प्रतिनिधिभूतः अमुकशर्मा यजमानोऽहम्, मम सकुटुम्बस्य अस्मिन् ग्रामे नगरे देशे च वसतां भक्तजनानां द्विपदाश्चतुष्पदाश्च कर्मविपाकजन्य दुःख दारिद्र्यदौर्भाग्यग्रहपीडा - ईति भयादि सकलारिष्ट निवृत्ति पूर्वकं सकलसुखसौभाग्य क्षेमसुभिक्ष धनधान्यैश्वर्य-पुत्रपौत्रादिवंशाभिवृद्धि-ऐहिकपारलौकिक अभ्युदयनिःश्रेयस संसिद्ध्ये धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयप्राप्तये प्रासादप्रतिमासम्पादनकर्मणि साहाय्यकर्तॄणां समस्तभक्तानां पूर्वजानां प्रासादप्रतिमाणुसंख्याकवर्षाणि यावद् उद्धारपूर्वकं अमुकलोकप्राप्त्यर्थं सूर्याचन्द्रमसौ यावत् प्रतिमासु दिव्यदेवकलातेजोऽभिवृद्ध्ये अमुकदेवताप्रीत्यर्थं अमुकामुक देवतानां अचलप्राणप्रतिष्ठां करिष्ये । जलमादाय - तत्रादौ गणेशस्मरणं करिष्ये । ॐ गणानान्त्वा० नमस्करोमि ।

पुनर्जलमादाय-अस्य श्रीप्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुरुद्रा ऋषयः ऋग्यजुःसामानिच्छन्दासि, क्रियामयवपुः प्राणाख्या देवता, आंबीजम्, ह्रीं शक्तिः क्रों कीलकम्, प्रतिमायां (प्रतिमासु) प्राणप्रतिष्ठायां विनियोगः । पूर्वमात्मनि न्यासान् कुर्यात् - ॐ ब्रह्मविष्णुरुद्रेभ्य ऋषिभ्यो नमः शिरसि । ॐ ऋग्यजुः सामभ्यश्छन्दोभ्यो नमः - मुखे । ॐ क्रियामयवपुः प्राणाख्यायै देवतायै नमः - हृदये । ॐ आं बीजाय नमः गुह्ये । ॐ ह्रीं शक्तये नमः - पादयोः । ॐ क्रों कीलकाय नमः - सर्वाङ्गे । हस्तं प्रक्षाल्य - एवं देवे न्यासान् कुर्यात् । ॐ ब्रह्म० सर्वाङ्गे - इत्यन्तान् ।

Scanned by CamScanner

तत आत्मनि ततः परं देवे षडङ्गन्यासः - १ ॐ अं कं खं गं घं ङं आं पृथिव्यप् तेजोवाय्वाकाशात्मने (अङ्गुष्ठाभ्यां नमः - हृदयाय नमः ) । २ ॐ इं चं छं जं झं ञं ईं शब्दस्पर्शरूपरसगन्धात्मने (तर्जनीभ्यां नमः - शिरसे स्वाहा) । ३ ॐ उं टं ठं डं ढं णं ऊं श्रोत्रत्वक्चक्षुर्जिह्वा घ्राणात्मने (मध्यमाभ्यां नमः - शिखायै वषट्) । ४ ॐ एं तं थं दं धं नं ऐं वाक्पाणिपादपायूपस्थात्मने (अनामिकाभ्यां नमः - कवचाय हुम्) । ५ ॐ ओं पं फं बं भं मं औं वचनादानगमन विसर्गानन्दात्मने (कनिष्ठिकाभ्यां नमः - नेत्रत्रयाय वौषट्) । ६ ॐ अं यं रं लं वं शं षं सं हं ळं क्षं अः मनोबुद्ध्यहंकारात्मने (करतलकरपृष्ठाभ्यां नमः - अस्त्राय फट्) । एवमात्मनि न्यासं कृत्वा हस्तं प्रक्षाल्य, एवमेव देवे न्यासान् कुर्यात् ॥

एवं आत्मनि देवे च षडङ्गन्यासान् कृत्वा देवस्य कपोलौ स्पृष्ट्वा वा हृदये अङ्गुष्ठे दत्त्वा प्राणप्रतिष्ठां कुर्यात्-

ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं ळं क्षं हं सः सपरिवारस्य अमुक देवस्य, (सपरिवारायाः अमुक देव्याः) प्राणा इह प्राणाः । ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं ळं क्षं हं सः (सपरिवारस्य अमुकदेवस्य, सपरिवारायाः अमुकदेव्याः) जीवः इह स्थितः । ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं ळं क्षं हं सः (सपरिवारस्य अमुकदेवस्य, सपरिवारायाः अमुकदेव्याः) सर्वेन्द्रियाणि । ॐ आं ह्रीं क्रौं अं यं रं लं वं शं षं सं हं ळं क्षं हं सः सपरिवारस्य अमुकदेवस्य, (सपरिवारायाः अमुकदेव्याः) वाङ्मनश्चक्षुः श्रोत्रत्वग् जिह्वा घ्राण वाक्पाणिपादपायूपस्थ प्राणाः इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ॥ ॐ अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाः क्षरन्तु च । अस्यै देवत्वमर्चायै मामहेति च कश्चन । ॐ इति प्रणवेन संरुध्य देवं सजीवं ध्यात्वा प्रतिष्ठा मन्त्रान् पठेत् -

ऋग्वेदे - ॐ तद॑स्तु मित्रावरुणा॒ तद॑ग्ने॒ शँयोर॒स्मभ्य॑मि॒दम॑स्तु श॒स्तम् । अ॒शी॒महि गा॒धमुत प्र॑ति॒ष्ठां नमो॑ दि॒वे बृ॑ह॒ते साद॑नाय ॥५-४७-७॥ कृष्ण यजुः - ॐगृहा वै प्रतिष्ठासूक्तं तत्प्रतिष्ठिततमया वाचा शंस्तव्यं तस्माद्यद्यपि दूर इव पशूँल्लभते गृहानेवैनानाजिगमिषति गृहा हि पशूनां प्रतिष्ठा प्रतिष्ठा ॥ शुक्ल-यजुर्वेदे - ॐ मनो॑जू॒तिर्ज्जु॑षता॒ माज्ज्य॑स्य॒ बृह॒स्पति॑र्य्य॒ज्ञमि॒मन्त॑नो॒ त्वरि॑ष्टँय्य॒ज्ञ ꣳ समि॒मन्द॑धातु । व्विश्वे॑दे॒वासऽइ॒हमा॑दयन्ता॒मो ३॑म्प्रति॑ष्ठ ॥२-१३॥ ब्राह्मणम्-मनोजूतिर्जुषतामाज्यस्येति मनसा वाऽइद ꣳ सर्व्वमाप्तन्तन्मनसैवैतत् संदधाति बृहस्पतिर्य्यज्ञमिमन्तनोत्वरिष्टँ य्यज्ञ ꣳ समिमन्दधात्विति यद्विवृढं तत्सन्दधाति विश्वेदेवासऽइहमादयन्तामिति सर्वं वै विश्वे देवाः सर्वेणैवैतत्सन्दधाति स यदि कामयेत ब्रूयात् प्रतिष्ठेति ॥ एष वै प्रभूर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रभूतं भवति ॥१॥ एष वै विभूर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्व्वमेव व्विभूतं भवति ॥२॥ एव वै व्यष्टिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यष्टं भवति ॥३॥ एव वै विधृतिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव विधृतं भवति ॥४॥ एष वै व्यावृत्तिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव व्यावृत्तं भवति ॥५॥ एष वाऽऊर्जस्वान्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेवोर्जस्वद् भवति ॥६॥ एष वै पयस्वान्नाम यज्ञो

Scanned by CamScanner

यत्रैतेन यज्ञेन यजन्ते सर्वमेव पयस्वद्भवति ॥७॥ एष वै ब्रह्मवर्चसी नाम यज्ञो यत्रैतेन यज्ञेन यजन्तऽआब्राह्मणो ब्रह्मवर्चसी जायते ॥८॥ एष वाऽअतिव्याधी नाम यज्ञो यत्रैतेन यज्ञेन यजन्तऽआराजन्योऽतिव्याधी जायते ॥९॥ एष वै दीर्घो नाम यज्ञो यत्रैतेन यज्ञेन यजन्तऽआदीर्घारण्यञ्जायते ॥१०॥ एष वै क्लृप्तिर्नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव क्लृप्तं भवति ॥११॥ एष वै प्रतिष्ठा नाम यज्ञो यत्रैतेन यज्ञेन यजन्ते सर्वमेव प्रतिष्ठितं भवति ॥१२॥ (शत० अ० १) प्र. ३-७ (१ तः १२)

सामवेदप्रतिष्ठामन्त्रः - ॐ वाक् । मनः प्राणः प्राणोऽपानो व्यानश्चक्षुः श्रोत्रꣳशर्म वर्म भूतिः प्रतिष्ठा । एता एव स महाव्रताः सर्वा वा एता विराजो दशिनी प्रथमा विꣳशिनी द्वितीया त्रिꣳशिनी तृतीयैषा वै परमा विराड् यच्चत्वारिꣳशद्रात्रयः पङ्क्तिर्वै परमा विराट् परमायामेव विराजि प्रति तिष्ठन्ति ॥

अथर्ववेदप्रतिष्ठामन्त्रः - ॐ तदस्तु मित्रावरुणा तदग्ने शंयो रस्मभ्य मिदमस्तु शस्तम् । अशीमहि गाधमुत प्रतिष्ठां नमो दिवे बृहते सादनाय ॥१९-११-६॥ ॐ ध्रुवाऽसि धुवोऽयं य्यजमानोऽस्मिन्नायतने प्रजया पशुभिर्भूयात् । घृतेन द्यावा पृथिवी पूर्य्येथा मिन्द्रस्य च्छदिरसि व्विश्वजनस्य च्छाया ॥५-२८॥ सुप्रतिष्ठितो भव । सुखदो भव । वरदो भव । शाश्वतो भव ॥ इति जस्वा देवस्य दक्षिण कर्णे तत्तन्मूलमन्त्रं गायत्रीञ्च पठित्वा पुरुषसूक्तेन तत्तद्देवतासूक्तेन वा देवं ध्यात्वा पादनाभिशिरांसि स्पृष्ट्वा - ॐ आत्त्वा हार्षमन्तरभूर्ध्रुवस्तिष्ठा विचाचलिः । व्विशस्त्वा सर्व्वा व्वाञ्छन्तु मात्त्वद्राष्ट्रमधिभ्रशत् ॥१२-११॥ इति मन्त्रं त्रिर्जस्वा-जलमादाय-आसां देवतानां गर्भाधानादिषोडशसंस्कारसिद्धये (प्रति संस्कारमष्टाष्ट संख्यया समस्त व्याहृति होम पूर्वकं) प्रणवावृत्तिं करिष्ये । (पूर्वं होमो न कृतश्चेत् तिलद्रव्येण समस्तव्याहृतिभिः कुण्डे १२८ आहुती र्हुत्वा) ॐ इति प्रणवं षोडशवारं (ऋग्वेदिनां मते पञ्चदशवारं) उच्चरेत् ॥ ततो देवं प्रार्थयेत् ।

ॐ नमस्तेऽअस्त्वसङ्गाय सन्तोषपरमात्मने । गुणातिक्रान्तरूपाय पुरुषाय महात्मने ॥१। अव्यक्ताव्यक्त रूपाय देव सन्निहितो भव ॥१॥ भगवन् देवदेवेश त्वं माता सर्वदेहिनाम् । त्वया व्याप्तमिदं सर्वं जगत् स्थावरजङ्गमम् ॥२॥ त्वमिन्द्रः पावकश्चैव यमो निर्ऋतिरेव च । वरुणो मारुतः सोम ईशानः प्रभुरव्ययः ॥३॥ येन रूपेण भगवँस्त्वया व्याप्तं चराचरम् । तेन रूपेण देवेश अर्चायां संहितो भव ॥४॥ सर्वमन्त्रादिसंयुक्तं लोकानुग्रहकाम्यया । त्वमर्चायां महादेव भव सन्निधिमान् सदा ॥५॥ सूर्याचन्द्रमसौ यावत् यावत्तिष्ठति मेदिनी । तावत् त्वयाऽत्र देवेश स्थातव्यं स्वेच्छया प्रभो ॥६॥

## देवता महापूजा ॥ ध्वजोच्छ्रयणम् ।

सम्भृतसकलसम्भारो यजमानो ब्राह्मणाश्च प्रतिदैवतसमीपमुपविश्य देवतानां महापूजनं कुर्युः । अभिषेककाले शान्तिकलशैः सम्पातोदककलशै श्चाभिषेकं प्रोक्षणं वा कुर्युः । वस्त्रयज्ञोपवीतादि

Scanned by CamScanner

राजोपचारान् कृत्वा पैष्टिकादिदीपैर्नीराजनादि पूजनं सम्पाद्य - ध्वजे देवतावाहनं कुङ्कुमादिना विलिख्य-वाहनमन्त्रेण प्रधानदेवतामन्त्रेण च सम्पूज्य - ॐ प्रस्फुर प्रस्फुर हुं फट् - हृदयाय नमः । ॐ घोर घोरतर हुं फट्-शिरसे स्वाहा । ॐ तनुरूप हुं फट् शिखायै वषट् । ॐ चट चट प्रचट प्रचट हुं फट्-कवचाय हुम् । ॐ कह कह वम वम घातय घातय हुं फट्-अस्त्राय फट् इति पञ्चाङ्गानि विन्यस्य ॐ प्रस्फुर प्रस्फुर घोर घोरतर तनुरूप चट चट प्रचट प्रचट कह कह वम वम घातय घातय हुं फट् अस्त्राय नमः - ॐ अच्छ्रयस्व व्वनस्पतऽऊर्ध्वोमापाह्य ह्व हंसऽआस्य यज्ञस्योद्दचः ॥४-१०॥ इति मन्त्रेण शिखरनैर्ऋत्यभागे मारुते आग्नेय कोणे वा उच्छ्रयेत् १ स्थाप्यमाने देवे शब्दोत्थाने श्वभ्रान्ते स्फुटिते वा शान्त्यर्थं मूलमन्त्रेणअष्टोत्तरशत १०८ माज्येन तिलैर्वा होमं कुर्यात् । (विशिष्टः स्वतन्त्रः ध्वजप्रतिष्ठाप्रयोगोऽग्रे वक्ष्यते ।

ततो देवप्रार्थना-ॐ लोकानुग्रहहेत्वर्थं स्थिरो भव सुखाय नः । सान्निध्यं हि सदा देव प्रत्यहं परिकल्पय ॥१॥ मा भूत् पूजाविरामोऽस्मिन् यजमानः समृध्यताम् । सम्पालय सदा राष्ट्रं सर्वोपद्रववर्जितम् ॥२॥ क्षेमेण वृद्धिमतुलामक्षय्यं सुखमश्नुताम् । भगवन् देवदेवेश धर्मकामार्थमोक्षद ॥३॥ विद्याविद्येश्वरै रुद्रगणेशैर्लोकपालकैः । देवदानवगन्धर्वैर्यक्षैश्च किन्नरैः सह ॥४॥ अस्मिन् बिम्बे महादेव सर्वदा वस वै प्रभो । पुंसामनुग्रहार्थाय पृथिवीं स्वेच्छया प्रभो ॥५॥ परावरेण भावेन स्थातव्यं सर्वदा त्वया । सर्वविघ्नहरः पुंसां सर्वदुःखहरः सदा ॥६॥ सर्वदा यजमानस्य इच्छासम्पत् करो भव । नमस्ते सर्वधर्माय सन्तोषविजितात्मने ॥७॥ ज्ञानविज्ञानतृप्ताय ब्रह्मतेजोऽभिशालिने । नमस्ते शुद्धदेहाय पुरुषाय महात्मने ॥८॥ स्थापकानाञ्च भूतानां शिल्पिनां वर्णिनां तथा । ग्रामदेशनृपाणाञ्च शान्तिर्भवतु सर्वदा ॥९॥ पूजकाराधकानाञ्च भक्तानां भक्तवत्सल । सर्वेषाञ्च जगन्नाथ इच्छाशक्तिप्रदो भव ॥१०॥ चन्द्रार्कावनिपर्यन्तं बिम्बेऽस्मिन् परमेश्वर । स्वशक्त्या सह संतिष्ठ सर्वलोका (काला) नुकम्पया ॥११॥ यावच्चन्द्रश्च सूर्यश्च यावत्तिष्ठति मेदिनी । तावत्त्वयाऽत्र देवेश स्थातव्यं स्वेच्छया प्रभो ॥१२॥ ज्ञानतोऽज्ञानतो वाऽपि यावान् विधिरनुष्ठितः । स सर्वस्त्वत्प्रसादेन समग्रो भवतान्मम् ॥१३॥ ज्ञानतोऽज्ञानतो वापि भगवन् यन्मया कृतम् । तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर ॥१४॥ इति साष्टाङ्गपातं प्रणमेत् । ततः शिवमन्दिरं कर्तृनामयुतं कुर्यात् अमुकेश्वरः - इति, अन्यदेवतास्वसम्भवाद्यथेष्टं नाम कुर्याद्देवतानिदर्शकम् । जलमादाय-अस्मिन् प्रासादे प्रतिष्ठापितासु प्रतिमासु यावच्चन्द्रदिवाकरौ देवकलासान्निध्यहेतवे कृतेन प्राणप्रतिष्ठामहापूजनादिकर्मणा सपरिवारः अमुकदेवः प्रीयताम् ॥ इतिप्राणप्रतिष्ठामहापूजनादि ॥

## ७२ प्रतिष्ठाहोमः ।

यजमानो मण्डपमागत्य-आज्येन प्रतिष्ठाहोमं कुर्यात्-१ ॐ शिवायस्थिरोभव स्वाहा २ ॐ शिवाय अप्रमेयो भव स्वाहा ३ ॐ शिवाय अनादि बोधो भव स्वाहा ४ ॐ शिवाय नित्यो भव

स्वाहा । ॐ शिवाय सर्वदो भव स्वाहा । ६ ॐ शिवाय अविनाशो भव स्वाहा । ७ ॐ शिवाय अक्रमो भव स्वाहा । ९ शिवाय कृत्यो भव स्वाहा । मयूखे तु सप्तैव आहुतयः । शिवशब्दोल्लेखाच्छिवप्रतिष्ठायामावश्यकः । अन्यप्रतिष्ठासु चिकीर्षितश्चेद् ऊहेन-विष्णवे स्थिरो भव स्वाहा-इत्यादिरीत्या कार्यः ।

(ऋग्वेदिनामाज्यहोमः)

आचार्यादयः - स्वे स्वे कुण्डे अग्न्यादि देवता उद्दिश्य आज्येन जुहुयुः । १ अग्नये स्वाहा । २ सोमाय स्वाहा । ३ धन्वन्दरये स्वाहा । ४ कुह्वै स्वाहा । ५ अनुमत्यै स्वाहा । ६ प्रजापतये स्वाहा । ७ परमेष्ठिने स्वाहा । ८ ब्रह्मणे स्वाहा । ९ अग्नये स्वाहा । १० सोमाय स्वाहा । ११ अग्नयेऽन्नादाय स्वाहा । १२ अग्नयेऽन्नपतये स्वाहा । १३ विश्वेभ्यो देवेभ्यः स्वाहा । १४ सर्वेभ्यो भूतेभ्यः स्वाहा । १५ भूर्भुवः स्वः स्वाहा । १६ अग्नये स्विष्टकृते स्वाहा ।

## ७३ अघोरहोमः ।

'शतेन स्थापयेत्' इति वचनात् सर्षपैः घृताक्ततिलैर्वा ॐ अघोरेभ्यो० इति मन्द्रेणाचार्य कुण्डे १०८ अष्टोत्तरशतं जुहुयात् ।

१ स्थापित देवताहोमः प्रणवादि चतुर्थ्यन्त देवतानामान्ते स्वाहा पदं योजनीयमिति प्रतिष्ठेन्दौ मन्त्रप्रकाशवचनात् ॐ ब्रह्मणे स्वाहा० इत्यादि प्रतिपादितम् । स एकैकाज्याहुत्या वा दश दश तिलाहुतिभिराचार्यकुण्डे कार्यः । तत्र क्रमः - १ मण्डलदेवता होमः । १ शेषादिमनुष्यान्तदेवता होमः । २ योगिनी होमः । क्षेत्रपालभैरवान्यतर होमश्च । २ व्याहृति होमः ।

अयं व्याहृतिहोमो ग्रहयज्ञस्य प्रधानहोमरूपः, न तु होमकालिकप्रायश्चितनिवारणैकफल इति शास्त्रार्थप्रकरणे प्रतिपादितम् । तथापि वीरमित्रोदये इत्थं तत्संकल्पवाक्यम् । जलमादाय-अस्मिन् होमकर्मणि (ब्रह्माग्न्यन्तरागमन-प्रणीताप्रोक्षणीस्कन्दन-हविः स्थितकीट पतङ्गादिज्वलनमन्त्रवर्णविपर्यय-स्वाहाकार, समकालिक-आहुतिप्रक्षेपाभावादि होमकालिक समस्तदोष परिहारार्थं । ग्रहमखस्य प्रधानसहोमत्वेन समस्त व्याहृतिभि राज्येन तिलैर्वा अयुत १०००० संख्यया (अष्टोत्तरसहस्र १००८ संख्यया) व्याहृति होमं करिष्ये । ॐ भूर्भुवः स्वः स्वाहा-नवकुण्ड्यां प्रतिकुण्डं एको ब्राह्मणः, आचार्यकुण्डे द्वौ १० मालाः, पञ्चकुण्डयां प्रतिकुण्डं २ द्वौ १० मालाः, एककुण्डे १० ब्राह्मणाः १० मालाः - इत्ययुतहोमः । सहस्रहोमपक्षे एकया मालया होमः, विभागः उपरिवत् ।

(काम्याः फलसर्षपगुग्गुलुलक्ष्मीहोमाः कृताकृताः)

याज्ञिकसम्प्रदायात् प्रथमो ग्रहेभ्यः फलहोमः । फलानि सच्छिद्राणि खण्डितानि घृताक्तानि वा जुहुयात्-सूर्यः - द्राक्षा ॐ आकृष्णेन० स्वाहा । २ चन्द्रः - इक्षुः - ॐ इमन्देवा० । ३ भौमः - पूगीफलं - ॐ अग्निर्मूर्धा० । ४ बुधः - नारिङ्गम् - ॐ उद्बुध्यस्वाग्ने० । ५ गुरुः - जम्बीरम् (गधालिम्बु) ॐ बृहस्पते० । ६ शुक्रः - बीजपूरकम् (बीजोरु) - ॐ अन्नात् परिस्रुतो० । शनिः - उतती (कमलकाकडी) ॐ शन्नोदेवी० । ८ राहुः - नारिकेलखण्डम् - ॐ कयानश्चित्र० । ९ केतुः - दाडिमम् - ॐ केतुं कृण्वन्न० इति फलहोमः । सर्षपहोमस्तान्त्रिकः सकलशत्रुविनाशार्थं सर्षपहोमं करिष्ये-घृताक्तसर्षपानादाय ॐ सजोषाऽइन्द्र सगणो मरुद्भि ३ सोमम्पिब व्वृत्रहा शूर व्विद्वान् । जहि शत्रूँ २ रपमृधो नुदस्वाथाभयङ्कृणुहि व्विश्वतो न ६ स्वाहा - इदमिन्द्राय न मम । (आभिचारिकत्वादुदकोपस्पर्शः) । मम सकलशान्त्यर्थं गुग्गुलुहोमं करिष्ये-घृताक्त गुग्गुलु होमः - ॐ त्र्यम्बकं यजामहे० मृतान् स्वाहा इदं रुद्राय न मम (रौद्रत्वादुदकोपस्पर्शः) । लक्ष्मी होमः - मम सकुटुम्बस्य सकलदुःख दारिद्र्य दौर्भाग्य-अलक्ष्मी निवृत्तिपूर्वकं सकलसुख सौभाग्य दशविधलक्ष्मी प्राप्तये फलेन आज्येन च लक्ष्मीहोमं करिष्ये । दूर्वा दधि हरिद्रातकमलबीज बिल्व खण्डान्येकीकृत्य-१ ॐ सदसस्पतिमद्भुतं प्प्रियमिन्द्रस्य काम्म्यम् । सनिम्मेधामयासिषु स्वाहा । २ ॐ याम्मेधान्देव गणाः पितरश्श्चोपासते । तया मामद्य मेघयाग्ने मेधाविनं कुरु स्वाहा । ३ ॐ मेधाम्मे व्वरुणो ददातु मेधामग्निः प्रजापति ६ । मेधामिन्द्रश्च व्वायुश्च मेधान्धाता ददातु मे स्वाहा । ४ ॐ इदम्मे ब्रह्मचक्षत्रश्चोभे श्रियमश्नुताम् । मयि देवा दधतु श्रियमुत्तमान्तस्यै ते स्वाहा । (३२-१३ तः १६) ५ ॐ श्रीणामुदारो धरुणो रयीणाम्मनीषाणाम्प्रार्पण ६ सोमगोपा ६ । व्वसु ÷ सूनु ३ सहसोऽअप्सु राजा विभात्यग्रऽउषसामिधान ३ स्वाहा ॥१२-२२॥

ततः आज्येन श्रीसूक्तेन प्रत्यृचं होमं कुर्यात् - १ ॐ हिरण्यवर्णां० २ ताम्म० ३ अश्वपूर्वां० ४ कांसोस्मितां० ५ चन्द्रां प्रभासां० ६ आदित्यवर्णे० ७ उपैतुमां० ८ क्षुत्पिपासा० ९ गन्धद्वारां० १० मनसः काम० ११ कर्दमेन प्रजा० १२ आपः स्रजन्तु० १३ आर्द्रां पुष्करिणीम्पुष्टिं० १४ आर्द्रां यः करिणीं यष्टिं० १५ ताम्मऽआवह० पुरुषानहम्-स्वाहा-इति १५ आज्याहुतीर्दत्त्वा-अनेन लक्ष्मीहोमकर्मणा मम सकुटुम्बस्य सुखसौभाग्य बहुविधलक्ष्मीप्राप्तिरस्तु । अनेन महालक्ष्मीः प्रीयताम् ।

इति प्रधानतन्त्रम् ।

## ७४ उत्तरतन्त्रम् ।

(शान्तिकपौष्टिकादिषु उत्तरतन्त्रस्यायं क्रमः - पूजा स्विष्टं नवाहुत्यो बलिः पूर्णाहुतिस्तथा । संस्रवादिविमोकान्तं होमशेषसमापनम् । श्रेयः संपादनं दानमभिषेको विसर्जनम्-इति । )

Scanned by CamScanner

जलमादाय-अद्य० पू० तिथौ समस्तभक्तजनग्रामजनदेशजनकल्याणाय मम च सकुटुम्बस्य श्रेयसे कृतस्य सग्रहमखसप्रासाददिनत्रय-साध्यसपरिवार-अमुकदेवताऽचलप्रतिष्ठाकर्मणः साङ्गतासिद्ध्यर्थं मृडाग्नेः स्थापितदेवतानाञ्च उत्तरपूजनं करिष्ये । अग्निं ध्यायेत्-ॐ अग्ग्ने नय सुपथा रायेऽअस्मान् विश्वानि देव व्वयुनानि व्विद्वान् । युयोध्ध्युस्मज्जुहुराणमेनो भूयिष्ठान्ते नमऽउक्तिं व्विधेम ॥५-३६॥ ॐ भू० मृडाग्नये नमः ध्यायामि । पञ्चोपचारैः सम्पूज्य-अनया पूजया मृडाग्निः प्रीयताम् ।

स्थापनक्रमेण स्थापितदेवतानां पूजनम् - ॐ गणानान्त्वा० सिध्दिबुद्धि सहितं श्रीमन्महागणाधिपतिं ध्यायामि । ॐ समक्ख्ये देव्या० वसोः पवि-त्रमसि० वसोर्धारासमन्वितसगणेशगौर्याद्यावाहितमातॄः ध्यायामि ॥ ॐ वास्तोष्पते० मण्डदेवतासहित वास्तुपुरुषं ध्यायामि । ब्रह्मजज्ञानं० (इदं विष्णुः० त्र्यम्बकं यजामहे० अम्बे अम्बिके०) मण्डलदेवतासहितां सपरिवारां अमुकदेवतां ध्यायामि । उदुत्यञ्जातवेदसं० (शेषादिमनुष्यान्तदेवता सहिताः) मण्डलदेवतासहितां सपरिवारां अमुकदेवतां ध्यायामि । उदुत्यञ्जातवेदसं० (शेषादिमनुष्यान्तदेवता सहिताः) सूर्यादि ग्रहमण्डलदेवताः ध्यायामि । ॐ योगे योगे० महाकाल्यादिसहिताः अमुकादि योगिनीमण्डलदेवताः ध्यायामि । नहिस्पश० अजरादिक्षेत्रपालान् ध्यायामि । नमऽउग्राय च भीमाय च (यो भूतानामधिपति०) श्रीद्भैरवादि चतुःषष्टि भेरवान् ध्यायामि । ततः - ॐ स्थापितदेवतासहिताय सपरिवाराय अमुकदेवाय (स्थापितदेवतासहितायै सपरिवारायै अमुकदेवतायैः नमः - पञ्चोपजारैः सम्पूज्य नमस्कुर्यात् - ॐ व्विश्वानि देवसवितर्दुरितानि परासुव । यद्भद्रन्तन्नऽआसुव ॥ ॐ स्थापितदेवतासहिताय सपरिवाराय अमुकदेवाय नमः प्रार्थनापूर्वक नमस्कारान् समर्पयामि ॥ अनेन पूजनेन स्थापितदेवतासहितः सपरिवारः अमुकदेवः प्रीयताम् ॥ इत्युत्तर पूजनम् ।

## ७५ स्विष्टकृद्धोमः नवाहुतयः ।

(पूर्वं प्रतिदिनं स्विष्टकृद्धोमः कृतश्चेत् तृतीये पूर्णाहुति दिने कृतहोमावशिष्ट द्रव्यादाहुतिद्वयपर्याप्तं तत्तद्धविः द्विवारमाज्यं च स्विष्टकृद्धोमार्थं स्रुचि प्रक्षिपेत् । अथवा पूर्वदिनद्वयकृतहोमावशिष्टं धृतप्लुतं संरक्षितं हविः, तृतीयदिनावशिष्ट श्वाहुति द्वयपर्याप्तं हविः स्रुचि एकीकृत्य स्विष्टकृद्धोमं कुर्यात् । समिधां स्विष्टकृद्धोमो न भवति ।)

आचार्यकुम्डे यजमान आचार्यो वा ब्रह्मा चोपविशेत् । अन्येषु कुण्डेषु कुण्डाचार्याः कुण्डब्रह्माणश्च उपविशेयुः । सोपयमनकुशं सव्यहस्तं हृदये धृत्वा दक्षिणं जानु आच्य ब्रह्मणा कुशेन प्रकोष्ठे अन्वारब्धः हविःशेषपूरितां स्रुचमादाय - ॐ अग्नये स्विष्टकृते स्वाहा-इदमग्नये स्विष्टकृते न मम (इति त्यागः संस्रवश्च, अस्या आहुते रुद्रदेवताकत्वाद् उदकोस्पर्शः) ततः स्रुवेण आज्येन नवाहुतीर्जुहुयात् - १ ॐ भूः स्वाहा-इदमग्नये न मम । २ ॐ भुवः स्वाहा-इदं वायवे न मम । ३ ॐ स्वः स्वाहा-इदं सूर्याय न मम । ४ ॐ त्वन्नोऽअग्ग्ने व्वरुणस्य विद्वान् देवस्य हेडोऽअवयासिसीष्ठाः । यजिष्ठो व्वह्नितम

शोशुचानो व्विश्वा द्वेषा ᳪ सि प्रमुमुग्ध्यस्मत्-स्वाहा (२१-३) इदमग्नीवरुणाभ्यां न मम । ५ ॐ सत्वन्नोऽअग्नेवमो भवोती नेदिष्ठोऽअस्याऽउषसो व्युष्टौ । अवयक्ष्वनो व्वरुण ᳪ रराणो व्वीहि मृडीक ᳪ सुहवो नऽएधि-स्वाहा-२१-४- इदमग्नीवरुणाभ्यां न मम ॥ ६ अयाश्चाग्नेस्यनभिशस्तिपाश्च सत्यमित्वमयाअसि । अयानो यज्ञं वहास्ययानो धेहि भेषज ᳪ स्वाहा-इदमग्नये अयसे न मम ॥ ७ ॐ ये ते शतं वरुण ये सहस्रं यज्ञियाः पाशा वितता महान्तः । तेभिर्नोऽअद्य सवितोत व्विष्णुर्व्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा - इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यश्च न मम ॥ ८ ॐ उदुत्तमं व्वरुण पाशमस्मदवाधमं व्विमध्यम ᳪ श्रथाय । अथा व्वयमादित्यव्रते त्वा नागसोऽअदितये स्याम-स्वाहा-१२-१२-इदं वरुणायादित्यायादितये च न मम ॥ ९ ॐ प्रजापतये (उपांशु) स्वाहा-इदं प्रजापतये (उपांशु) न मम ॥ इति नवाहुतयः । (ऋग्वेदिनां भिन्ना आहुतयः) अयाश्चाग्ने, येतेशतं० इति मन्त्रौ सौत्रौ लुप्तशाखीयौ ।

## ७६ बलिदानम् ।

(प्रतिकुण्डं दशदिक्षु आचार्यकुण्डस्य दशदिक्षु मण्डपस्यान्तभागे बहिर्वा भूमौ दशदिक्पाल बलीन् दद्यात् । तत्तद्देवतापीठपुरतः देवताबलीन्, मण्डपादुत्तरे चत्वरे वा छागप्रत्याम्नायरूपेण कूष्माण्डबलिं क्षेत्रपालमुद्दिश्य दद्यात् । तत्र पिष्टमयदीपसहितमाषपायसादिरूपं वासिष्ठग्रहमखोक्ततत्तद्ग्रहनैवेद्यरूप पूरिकाकंसारवटकलड्डुकादि सहितं यथादेशाचारं बलिदानं कार्यम् ।)

यजमानः सम्यगुपविश्य तत्र तत्र प्रज्वालितदीपसहितान् बलीन् निधाय-जलमादाय-कृतकर्मसाङ्गतासिद्ध्यर्थमिन्द्रादि दशदिक्पालानां स्थापितदेवतानाञ्च पूजनपूर्वकं बलिदानं करिष्ये-तच्च दिक्पालानां पृथक् पृथगेकतन्त्रेण वा यथासमयं कार्यम् । एकतन्त्रेण बलिदानम्-ॐ प्राच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहा दक्षिणायै दिशे स्वाहार्व्वाच्यै दिशे स्वाहाप्रतीच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहो दीच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहोदूर्ध्वायै दिशे स्वाहार्व्वाच्यै दिशे स्वाहावाच्यै दिशे स्वाहार्व्वाच्यै दिशे स्वाहा ॥२२-२५॥ इन्द्रादिदशदिक्पालान् साङ्गान् सपरिवारान् सायुधान् सशक्तिकान् एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि । जलमादाय-इन्द्रादि दश दिक्पालेभ्यः साङ्गेभ्यः सपरिवारेभ्यः सायुधेभ्यः सशक्तिकेभ्यः, इमान् आसादितान् सदीपमाषभक्तबलीन् समर्पयामि । नमस्कुर्यात्-भो इन्द्रादि दश दिक्पालाः दिशो रक्षत, बलीन् भक्षत, मम सकुटुम्बस्य अभ्युदयं कुरुत । आयुःकर्तारः क्षेमकर्तारः शान्तिकर्तारः पुष्टिकर्तारः तुष्टिकर्तारः निर्विघ्नकर्तारः कल्याणकर्तारः सुखदाः वरदाः भवत । जलमादाय-अनेन बलिदानेन इन्द्रादि दश दिक्पालाः प्रीयन्ताम् ।

स्थापितदेवता बलिदानम्-१ गणेशस्य-ॐ गणानान्त्वा० सिद्धिबुद्धिसहितं श्रीमन्महागणाधिपतिं साङ्गं सपरिवारं सायुधं सशक्तिकं एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । २ मातृकाणाम् - ॐ समख्ये देव्या० वसोः पवित्रमसि० वसोर्धारासमन्वितसगणेशगौर्याद्यावाहितमातृः साङ्गाः सपरिवाराः सायुधाः

Scanned by CamScanner

सशक्तिकाः, एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि । ३ मण्डपाङ्गवास्तोः-ॐ वास्तोष्पते० मण्डलदेवता सहितं वास्तुपुरुषं साङ्गं सपरिवारं सायुधं सशक्तिकं एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । ४ प्रधानदेवतायाः - ॐ ब्रह्मजज्ञानं० (इदं विष्णु० नमः शम्भवाय० अम्बे अम्बिके०) मण्डलदेवतासहितां प्रधानदेवतां साङ्गां सपरिवारां सायुधां सशक्तिकाम्, एभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । ५ ग्रहमण्डलदेवानाम्- ॐ आकृष्णेन० (शेषादिमनुष्यान्तदेवतासहिताः) ग्रहमण्डलदेवताः साङ्गा सपरिवाराः सायुधाः सशक्तिकाः, एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि । ६ योगिनीमण्डलदेवतानाम् - ॐ योगे योगे० महाकाल्यादिसहिताः अमुकादियोगिनीः साङ्गाः सपरिवाराः सायुधाः सशक्तिकाः, एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि । ७ क्षेत्रपाल (भैरव) देवानाम् - ॐ नहिस्पश० यो भूताना० अजरादि क्षेत्रपालान् (श्रीमद्भैरवादि) चतुः षष्टि भैरवान्) साङ्गान् सपरिवारान् सायुधान् सशक्तिकान्, एभिर्गन्धाद्युपचारैर्वोऽहं पूजयामि । इति संपूज्य एकतन्त्रेण बलिदानम्-जलमादाय-स्थापितदेवतासहितायै अमुकदेवतायै साङ्गायै सपरिवारायै सायुधायै सशक्तिकायै नमः - इमान् सदीपमाषभक्त बलीन् समर्पयामि । नमस्कुर्यात् - भो भोः स्थापितदेवतासहिते अमुकदेवते, इमान् सदीपमाषभक्तबलीन् गृहाण गृहाण, मम सकुटुम्बस्य अभ्युदयं कुरु कुरु । आयुः कर्त्री क्षेमकर्त्री शान्तिकर्त्री पुष्टिकर्त्री निर्विघ्नकर्त्री कल्याणकर्त्री सुखदा वरदा भव । जलमादाय-अनेन पूजनपूर्वकं बलिदानेन स्थापितदेवतासहिता सपरिवारा अमुकदेवता प्रीयताम् ॥

## क्षेत्रपालबलिदानम् ।

(कलौ मांसबलिनिषेधाच्छागपशुप्रत्याम्नायभूतकूष्माण्डेक्षुदण्डालाब्वन्यतमसहितं सदीपमाषभक्तादिकं मृत्पात्रे वंशपात्रे वा निधाय मण्डपादुत्तर आचाराच्चत्वरे दुर्ब्राह्मणद्वारा नीत्वा खड्गहस्तो यजमानश्चतुष्पथे क्षेत्रपालाय बलिं दद्यात् । अत्र कूष्माण्डबलिदानं कृताकृतम् । केवलेन सदीपमाशपक्त पायसादिनाऽपि निर्वाहः ।) मण्डपादुत्तरे बहिर्दुर्ब्राह्मणेन वा चतुष्पथे बलिं निधाय-यजमानः जलमादाय-मम सकुटुम्बस्य भूतप्रेतपिशाचशाकिनीडाकिनीवेतालब्रह्मराक्षसादिजन्यसकलाधिव्याधिनिवृत्तिपूर्वकं दीर्घायुरारोग्यप्राप्त्यर्थं चत्त्वरे क्षेत्रपालाय बलिदानं करिष्ये । अक्षतान् गृहीत्वा-ॐ नहि स्पशमविदन्नन्यमस्माद्वैश्वानरात् पुरऽएतारमग्नेः । एमैनमवृधन्नमृताऽअमर्त्यं व्वैश्वानरङ्क्षैत्रजित्याय देवाः ॥३३-६०॥ ॐ भू० भूतप्रेतादिसहितं क्षेत्रपालमावाहयामि । गन्धपुष्पादिभिः सम्पूज्य - भूतप्रेतादिसहितं क्षेत्रपालं साङ्गं सपरिवारं सायुधं सशक्तिकमेभिर्गन्धाद्युपचारैस्त्वामहं पूजयामि । कूष्माण्डसत्त्वे खड्गेन च्छेदयित्त्वा- जलमादाय-भूतप्रेतपिशाचशाकिनीडाकिनीवेतालादि परिवृताय क्षेत्रपालाय साङ्गाय सपरिवाराय सायुधाय सशक्तिकाय अमुं (कूष्माण्डसहितं सदीपमाषभक्तादि बलिं समर्पयामि । प्रार्थयेत् - ॐ नमः क्षेत्रपाल त्वं भूतप्रेतगणैः सह । आयुरारोग्यमैश्वर्यं सर्वदा देहि मे प्रभो ॥ भूतप्रेतादिसहित भो भो क्षेत्रपाल इमं (कूष्माण्डसहितं) बलिं गृहाण गृहाण मम सकुटुम्बस्य अभ्युदयं कुरु कुरु । आयुः कर्ता क्षेमकर्ता शान्तिकर्ता पुष्टिकर्ता तुष्टिकर्ता निर्विघ्नकर्ता कल्याणकर्ता सुखदो वरदो भव ॥ मा विघ्नं मा च मे पापं मा सन्तु परिपन्थिनः । सौम्या भवन्तु तृप्ताश्च भूतप्रेताः सुखावहाः - इति नत्वा जलमादाय - अनेन

Scanned by CamScanner

(कूष्माण्डसहितेन) बलिदानेन भूतप्रेतादिसहितः क्षेत्रपालः प्रीयताम् । ततो बलिपरितो जलं क्षिप्त्वा पश्चादनवलोकयन् ॐ हिंकाराय स्वाहा० इति मन्त्रं पठन् मण्डपं प्रत्यागच्छेत् । मण्डपादुत्तरे बलिदाने कृते चतुष्पथे निधानाय दुर्ब्राह्मणेन बलौ नीयमाने तु तत्पश्चाज्जलमासिच्य मन्त्रं पठेत्-ॐ हिङ्काराय स्वाहा हिङ्कृताय स्वाहा क्रन्दते स्वाहा वक्रन्दाय स्वाहा प्रोथते स्वाहा प्रप्रोथाय स्वाहा गन्धाय स्वाहा घ्राताय स्वाहा निविष्टाय स्वाहोपविष्टाय स्वाहा सन्दिताय स्वाहा वल्गते स्वाहाऽसीनाय स्वाहा शयानाय स्वाहा स्वपते स्वाहा जाग्रते स्वाहा कूजते स्वाहा प्रबुद्धाय स्वाहा विजृम्भमाणाय स्वाहा विचृत्ताय स्वाहा स ꣳ हानाय स्वाहोपस्थिताय स्वाहा यनाय स्वाहा प्रायणाय स्वाहा ॥२२-७॥ हस्तौ पादौ प्रक्षाल्य मण्डपं प्रविशेत् ।

## ७७ पूर्णाहुतिः । वसोर्धारा ।

(एतद्विषये शास्त्रार्थप्रकरणे विवेचितम् । ततोऽवलोकनीयम् ।)

आचान्तो यजमान आचार्यकुण्डस्य पश्चादुपविश्य अन्ये कुण्डाचार्याश्च स्वस्वकुण्डपश्चिमत उपविश्य अद्य- पू० तिथौ मम सकुटुम्बस्य समस्तभक्तजनग्रामजनदेशजनकल्याणाय कृतस्य संग्रहमखसप्रासादअमुकदिनसाध्य-अचलप्रतिष्ठाकर्मणः साङ्गतासिद्ध्यर्थं शुक्रज्योतिरित्याद्येकोन पञ्चाशद्मरुद्गणानां प्रीतये वसोर्धारासमन्वितं पूर्णाहुतिहोमं करिष्ये । आज्यपात्रान्नूतनमाज्यमादाय अग्नौ अधिश्रित्य स्रुक्स्रुवौ प्रपत्य संमार्जनकुशैः सम्मृज्य प्रणीतोदकेनाभ्युक्ष्य पुनः प्रतप्य स्वदक्षिणदेशे निदध्यात् । आज्यमुद्वास्य पवित्राभ्यामुत्पूय अवेक्ष्य अपद्रव्यं निरस्य पवित्रे प्रणीतासु निदध्यात् ।

ततः स्रुवेण स्रुचि द्वादशवारं चतुर्वारं वा आज्यं प्रक्षिप्य तदुपरिकर्मापवर्गसमित्सहितं वस्त्रगन्धपुष्पसौभाग्यद्रव्याद्यलङ्कृतं नारिकेलं निधाय स्रुङ्मूलं वामहस्तेन धृत्वा वामस्तनान्तमानीय तदुपरि अधोमुखं स्रुवं नारिकेलसहितं दक्षिणहस्तेन धृत्वा यजमानस्तिष्ठेत् । एवमेव अन्येऽपि कुण्डाचार्याः कृत्वा तिष्ठेयुः । ततः पूर्णाहुतिमन्त्रान् पठेयुः -

ऋग्वेदे - ॐ समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥१॥ वयं नाम प्रब्रवामा घृतस्याऽस्मिन् यज्ञे धारया मा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुः शृङ्गोऽवमीद् गौर एतत् ॥२॥ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ आ विवेश ॥३॥ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्र एकं सूर्य एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥४॥ एता अर्षन्ति हृद्यात् समुद्राच्छतव्रजा रिपुणा नावचक्षे । घृतस्य धारा अभिचाकशीमि हिरण्ययो वेतसो मध्य आसाम् ॥५॥ सम्यक् स्रवन्ति सरितो न धेना अन्तर्हृदा मनसा पूयमानाः । एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणोरीषमाणाः ॥६॥ सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति

Scanned by CamScanner

यज्ञाः । घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः ॥७॥ अभिप्रवन्त समनेव योषाः कल्याण्य १ः स्मयमानासो अग्निम् । घृतस्य धाराः समिधो न सन्तता जुषाणो हर्यति जातवेदाः ॥८॥ कन्या इव वहतु मे तवा उ अञ्ज्यञ्जाना अभिचाकशीमि । यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभि तत् पवन्ते ॥९॥ अभ्यर्षत सुष्टुतिं गव्यमाजिमस्मासु भद्रा द्रविणानि धत्त । इमं यज्ञं नयत देवतानो घृतस्य धारा मधुमत् पवन्ते ॥१०॥ धामन् ते विश्वं भुवनमधिश्रितमन्तः समुद्रे हृद्य १ न्तरायुषि । अपामनीके समिथे य आभृतस्तमश्याम मधुमन्तं त ऊर्मिम् ॥११॥४-५८॥१ तः ११॥

१८
कृष्णयजुर्वेदे - ॐ सप्त ते अग्ने समिधः सप्त जिह्वा इत्याह सप्तैवास्य सामानि प्रीणाति । पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनादधि प्रजापतिः प्रजा असृजत
१९ २०
प्रजानाꣳसृष्ट्या अग्निर्देवेभ्यो निवायत स दिशोऽनु प्राविशज्जुह्वन्मनसा दिशो ध्यायेत् दिग्भ्य एवैनमवरुन्धे,
२१
दध्ना पुरस्ता ज्जुहोत्याज्येनोपरिष्टात् तेजश्चैवारमा इन्द्रियं च समीची दधाति, द्वादशकपालो वैश्वानरो
२२
भवति द्वादश मासाः संवत्सरः संवत्सरोऽग्नि वैश्वानरः साक्षादेव वैश्वानर मव रुन्धे, यत् प्रयाजानुयाजान्
२३
कुर्याद् विकस्तिः सा यज्ञस्य दर्वि होमं करोति यज्ञस्य प्रतिष्ठित्यै, राष्ट्रं वै वैश्वानरो विण्मरुतो वैश्वानरꣳहुत्वा
२४
मारुतान् जुहोति राष्ट्र एव विशमनुबध्ना त्युच्चै वैश्वानरस्याऽऽश्रावयत्युपाꣳशु मारुतान् जुहोति तस्माद्राष्ट्रं
२५ २६
विशमति मारुता भवन्ति मरुतो वै देवानां विशो देवविशे नैवास्मै मनुष्य विशमव रुन्धे, सप्त भवन्ति
२७
सप्तगणा वै मरुतो गणश एव विशमव रुन्धे गणेन गणमनुद्रुत्य जुहोति विशमेवास्मा अनुवर्त्मानं करोति ॥५-४-७-१८ तः २८॥ पूर्णा दर्वि परापत सुपूर्णा पुनरापत । वस्ने व विक्रीणा वहा इष मूर्जꣳशतक्रतो ॥१-८-४-१॥

शुक्लयजुर्वेदे-ॐ समुद्रादूर्म्मिर्म्मधुमाँ २ उदारदुपा ७ शुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥१७-८९॥ व्वयन्नाम प्रब्रवामा घृतस्यास्मिन् यज्ञे धारया मा नमोभि ६ । उपब्रह्मा शृणवच्छस्यमानं चतु ÷ शृङ्गोवमीद् गौरऽएतत् ॥१७-९०॥ चत्वारि शृङ्गा त्रयोऽअस्य पादा द्वे शीर्षे सप्त हस्तासोऽअस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याँ२ऽआविवेश ॥१७-९१॥ त्रिधा हितम्पणिभिर्गुह्यमानङ्गवि देवासो घृतमन्वविन्दन् । इन्द्र एक ह सूर्य्याऽएकंजजान व्वेनादेकं ७ स्वधया निष्टतक्षु ६ ॥१७-९२॥ एताऽअर्षन्ति हृद्यात् समुद्राच्छतव्रजा रिपुणा नावचक्षे । घृतस्य धाराऽअभिचाकशीमि हिरण्ययो व्वेतसो मध्यऽआसाम् ॥१७-९३॥ सम्यक् स्रवन्ति सरितो

न धेनाऽअन्तर्हृदा मनसा पूयमाना ꣳ । एते अर्षन्त्यूर्म्मयो घृतस्य मृगाऽइव क्षिपणो रीषमाणा ꣳ ॥१७-९४॥ सिन्धोरिव प्राद्ध्वने शूघनासो व्वातप्रमिय ꣳ पतयन्ति यह्वा ꣳ । घृतस्य धाराऽअरुषो न व्वाजी काष्ठाभिन्दन्नूर्म्मिभिꣳपिन्वमान ꣳ ॥१७-९५॥ अभिप्रवन्त समनेव योषा ꣳ कल्याण्यु ꣳ स्स्मयमानासोऽअग्निम् । घृतस्य धारा ꣳ समिधो नसन्त ता जुषाणो हर्य्यति जातवेदा ꣳ ॥१७-९६॥ कन्याऽइव व्वहतु मे तवाऽउऽअञ्ज्यञ्जानाऽअभिचाकशीमि । यत्र सोम ꣳ सूयते यत्र यज्ञो घृतस्य धाराऽअभितत्पवन्ते ॥१७-९७॥ अभ्यर्षत सुष्टुतिङ्गव्व्यमाजिमस्म्मासु भद्रा द्रविणानि धत्त । इमँ य्यज्ञन्नयत देवतानो घृतस्य धारा मधुमत्पवन्ते ॥१७-९८॥ धामन्ते व्विश्श्वम्भुवन मधिश्रितमन्त ꣳ समुद्रे हृद्यन्तरायुषि । अपामनीके समिथे यऽआभृतस्तमश्याम मधुमन्तन्तऽऊर्म्मिम् ॥१७-९९॥ पुनस्त्वादित्त्या रुद्रा व्वसव ꣳ समि न्धताम्पुन र्ब्रह्माणो व्वसुनीथ यज्ञै ꣳ । घृतेन त्वन्तन्न्वं व्वर्द्धयस्व सत्या ꣳ सन्तु यजमानस्य कामा ꣳ ॥१२-४४॥ मूर्द्धानन्दिवोऽअरतिम्पृथिव्व्या वैश्वानरमृतऽआजातमग्निम् । कवि ꣳ सम्म्राजमतिथिञ्जनानामासन्ना पात्रञ्जनयन्त देवा ꣳ ॥३३-८॥ सप्त तेऽअग्ने समिध ꣳ सप्त जिह्वा ꣳ सप्तऽऋषय ꣳ सप्त धाम प्प्रियाणि । सप्त होत्रा ꣳ सप्त धात्वा यजन्ति सप्त योनी रापृणस्व घृतेन स्वाहा ॥१७-७१॥

२र २र २र २र ३ ४र ५ २र ३ ४र ५ २र ३ ४र ५ २र
सामवेदे - ॐ हाउ । हाउ । हाउ । आज्यदोहम् । आज्यदोहम् आज्यदोहम् । मृद्र्धा
१र ३ १ २ ३ ४ ५ २र १र २ १ र २र ३ ४ ५ २ १ २
नन्दायि । वा ३ अर । तिम्पृथिव्याः । वैश्वानराम् । ऋतया । जातमग्निम् । कविꣳसम्रा । जा ३
१ २ ३ ४ ५ २र १ २ १ २ ३ ४ ५ २र २र २र २र ३ ४ ५
मति । थिंजनानाम् । आसन्नः पा । त्रा ३ ञ्जन । यन्तदेवाः । हाउ । हाउ । हाउ । आज्यदोहम् ।
२र ३ ४ ५ २र ३ ४ २र २र १ २ २र २र १ २ २र २र १ ३
आज्यदोहम् । आज्यदो ५ हाउ । वा । ए । आज्यदोहम् । ए । आज्यदोहम् । ए । आज्यदोहा
१ १ १ १ २र २र २र २ २ १ २ २ १ २ २ १ २ २र १२
२ ३ ४ ५ म् ॥१॥ हाउ । हाउ । हाउ । हुम् । चिदोहम् । चिदोहम् । चिदोहम् । मूर्द्धानन्दायि ॥
२ १ २ ३ ४ ५ २र १र २ १ २ २र ३ ४ ५ २ १ २ १
वा ३ अर । तिंपृथिव्याः वैश्वानराम् । ऋतआ । जातमग्निम् । कविꣳसम्रा । जा ३ मति ।
२ ३ ४ ५ २र १ २ १ २ ३ ४ ५ २र २र २र २ २ १ २
थिंजनानाम् । आसन्नः पा । त्राञ्जन । यन्तदेवाः । हाउ । हाउ । हाउ । हुम् । चिंदोहम् ।
२ १ २ २ १ ३ १ १ १ १ २र २र २र १ २ १ २
चिदोहम् । चिदो २ हाउ । वा ३ । इ २ ३ ४ ५ ॥२॥ हाउ । हाउ । हाउ । च्योहम् । च्योहम् ।
१ २ २र १र २ १ २ ३ ४ ५ २र १र २ १ र २र ३ ४ ५ २ १
च्योहम् । मृद्र्धानन्दायि । वा ३ अर । तिंपृथिव्याः । वैश्वानराम् । ऋतआ । जातमग्निम् । कविꣳ

२ १ २ ३ ४ ५ २र १ २ १ २ ३ ४ ५ २र २र २र
सम्रा । जा ३ मति । थिंजनानाम् । आसन्नः पा । त्रा ३ अन । यन्तदेवाः । हाउ । हाउ । हाउ ।
१ २ १ २ १र २ २ २ १
च्योहम् । च्योहम् । च्यो ३ हाउ । वा ३ । ए ३ ऋतम् ॥ आ० प्र० प्र० साम-१६-१७-१८ ॥

अथर्ववेद - ॐ अभ्यऽर्चत सुष्टुतिङ्गव्यं माजिमस्मासु भद्रा द्रविणानिधत्त । इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत् पवन्ताम् ॥१॥ मय्यग्रे अग्निं गृह्णामि सह क्षत्रेण वर्चसा बलेन । मयि प्रजां मय्यायुर्दधामि स्वाहा मय्यग्निम् ॥२॥ इहैवाग्ने अधि धारया रयिं मात्वा निक्रन् पूर्वचित्ता निकारिणः । क्षत्रेणाग्ने सुयममस्तु तुभ्यमुपसत्ता वर्धतां ते अनिष्टृतः ॥३॥ अन्वग्निरुषसामग्रं मख्यदन्वठानि प्रथमो जातवेदाः । अनु सूर्यं उषसो अनु रश्मीननु द्यावापृथिवी आविवेश ॥४॥ प्रत्यग्नि रुषसामग्रमख्यत् प्रत्यहानि प्रथमो जातवेदाः । प्रति सूर्यस्य पुरुधा च रश्मीन् प्रति द्यावा पृथिवी आततान ॥५॥ घृतं ते अग्ने दिव्ये सधस्थे घृतेन त्वां मनुरद्या समिन्धे । घृतं ते देवीर्नप्त्य १ आवहन्तु घृतं तुभ्यं दुह्नतां गावो अग्ने ॥७-८२-१ तः ६॥ पूर्णा पश्चादुत पूर्णा पुरस्तान्मध्यतः पौर्णमासी जिगाय । तस्यां देवैः संवसन्तो महित्वा नाकस्य पृष्ठे समिषा मदेम ॥७-८०-१॥

शु० यजु० ॐ पूर्णा दर्वि परापत सुपूर्ण्णा पुनरापत । व्वस्नेव व्विक्रीणा वहाऽइषमूर्ज्जᳫं शतक्रतो ॥३-४९॥ अथ प्रातरहुते वा हुते वा यतरथा कामयेत सोऽस्या अनिरशितायै कुम्भ्यै दर्व्यो पहन्ति पूर्णा दर्वि परापत सुपूर्णा पुनरापत । व्वस्नेव विक्रीणा वहाऽइषमूर्ज्ज ᳫ शतक्रतो स्वाहा - इदमद्भ्यः वसुरुद्रादित्येभ्यः, अग्नये वैश्वानराय, सप्तवतेऽग्नये शतक्रतवे च नमम ॥ (इति प्रोक्षण्यां संस्रवः, त्यागोच्चारणम् ।)

## वसोर्धारा ।

ततो वह्नेरुपरि स्तम्भद्वयविधृतामौदुम्बरीं सकोटरामार्द्रामृज्वीं चतुर्हस्तां बाहुमात्रां वा स्रुचं धृत्वा तदुपरि शृङ्खलावधृतेन निर्मलघृतपूरितसच्छिद्र ताम्रादि कुम्भेन पात्रान्तरेण वा स्रुच्याज्यं निक्षिपन् अविच्छिन्नया घृतधारया वसोर्धाराहोमं कुर्यात् । (आचारात् स्रुङ्मुखे पूगीफलं निदध्यात्) ऋग्वेदे-ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥१॥ अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत । स देवाँ एहवक्षति ॥२॥ अग्निना रयिमश्नवत् पोषमेव दिवे दिवे । यशसं वीरवत्तमम् ॥३॥ अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि । स इद् देवेषु गच्छति ॥४॥ अग्निर्होता कविक्रतुः सत्यश्चित्र श्रवस्तमः । देवो देवेभिरागमत् ॥५॥ यदङ्ग दाशुषे त्वमग्ने भद्रं करिष्यसि । तवेतत् सत्यमङ्गिरः ॥६॥ उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम् । नमो भरन्त एमसि ॥७॥ राजन्तमध्वराणां गोपामृतस्य दीदिविम् । वर्धमानं स्वे दमे ॥८॥ स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वानः स्वस्तये ॥९॥ १-१-१ तः ९॥

Scanned by CamScanner

ॐ स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥१॥ रक्षोहा विश्वचर्षणिरभि योनिमयो हतम् । द्रुणा सधस्थमासदत् ॥२॥ वरिवोधातमोभव मंहिष्ठो वृत्रहन्तमः । पर्षि राधो मघोनाम् ॥३॥ अभ्यर्ष महानां देवानां वीतिमन्धसा । अभि वाजमुतश्रवः ॥४॥ त्वामच्छाचरामसि तदिदर्थं दिवे दिवे । इन्द्रो त्वेन आशसः ॥५॥ पुनाति ते परिस्रुतं सोमं सूर्यस्य दुहिता । वारेण शश्वता तना ॥६॥ तमीमण्वीः समर्य आ गृभ्मन्ति योषणो दश । स्वसारः पार्ये दिवि ॥७॥ तमीं हिन्वत्यग्रुवो धमन्ति बाकुरं दृतिम् । त्रिधातु वारणं मधु ॥८॥ अभी ३ममघ्न्या उत श्रीणन्ति धेनवः शिशुम् । सोममिन्द्राय पातवे ॥९॥ अस्ये दिन्द्रो मदेष्वा विश्वा वृत्राणि जिघ्नते । शूरो मघा च मंहते ॥१०॥९-१-१ तः १०॥

अतो देवा अवन्तु नो यतो विष्णुर्विचक्रमे । पृथिव्याः सप्त धामभिः ॥१६॥ इदं विष्णु विचक्रमे त्रेधा निदधे पदम् । समूहळ मस्य पांसुरे ॥१७॥ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः । अतो धर्माणि धारयन् ॥१८॥ विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा ॥१९॥ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥२०॥ तद् विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत् परमं पदम् ॥२१॥१-२२-१६ तः २१॥

ॐ कद् रुद्राय प्रचेतसे मीह्ळुष्टमाय तव्यसे । वोचेम शंतमं हृदे ॥१॥ यथानो अदितिः करत पश्वे नृभ्यो यथा गवे । यथा तोकाय रुद्रियम् ॥२॥ यथा नो मित्रो वरुणो यथा रुद्रश्चि केतति । यथा विश्वे सजोषसः ॥३॥ गाथपतिं मेधपतिं रुद्रं जलाषभेषजम् । तच्छँय्योः सुम्नमीमहे ॥४॥ यः शुक्र इव सूर्यो हिरण्यमिव रोचते । श्रेष्ठोदेवानां वसुः ॥५॥ शंनः करत्यर्वते सुगं मेषाय मेष्ये । नृभ्यो नारिभ्यो गवे ॥६॥ अस्मे सोम श्रियमधि निधेहि शतस्य नृणाम् । महि श्रवस्तुविनृम्णम् ॥७॥ मा नः साम परिबाधो मारातयो जुहुरन्त । आन इन्दो वाजे भज ॥८॥ यास्ते प्रजा अमृतस्य परस्मिन् धामन्नृतस्य । मूर्धानाभा सोम वेन आभूषन्तीः सोम वेदः ॥९॥१-४३-१ तः ९॥ सहस्रशीर्षा० १६ ॥ विष्मोर्नुक० १-१५४-१ तः ६॥

कृष्णयजुर्वेदे-ॐ वसोर्धारां जुहोति वसोर्मे धाराऽसदिति वा एषा हूयते घृतस्य वा एन मेषा धाराऽमुष्मिंल्लोके पिन्वमानोप तिष्ठत, आज्येन जुहोति तेजो वा आज्यं तेजो वसोर्धारा तेज सैवास्मै (१)
तेजोऽवरुन्धे, ऽथो कामा वै वसोर्धाराकामाने वावरुन्धे, यं कामयेत प्राणानस्यान्नाद्यं विछिन्द्यामिति विग्राहं तस्य जुहुयात् प्राणानेवास्यान्नाद्यं विच्छिनत्ति, यं कामयेत प्राणानस्यान्नाद्यꣳसंतनुयामिति सन्ततां तस्य जुहुयात् प्राणानेवास्यान्नाद्यꣳसंतनोति, द्वादश द्वादशानि जुहोति द्वादशमासाः संवत्सरः संवत्सरेणैवास्मा अन्नमव रुन्धे, ऽन्नं च मेऽक्षुच म इत्याहैतद्वा अन्नस्य रूपꣳरूपेणैनान्नमव रुन्धे, ऽग्निश्चम आपश्च म इत्याहैषा वा अन्नस्य योनिः सयोन्येवान्नमवरुन्धे, ऽ र्धेन्द्राणि जुहोति देवता

एवावरुन्धे यत् सर्वेषामर्धमिन्द्रः प्रति तस्मादिन्द्रो देवतानां भूयिष्ठ भाक्तम इन्द्रमुत्तर माहेन्द्रियमेवास्मिन्नुपरिष्टाद् दधाति, यज्ञायुधानि जुहोति यज्ञो वै यज्ञायुधानि यज्ञमेवाव रुन्धेऽथो एतद्वै यज्ञस्य रूपꣳरूपेणैव यज्ञमव रुन्धे, ऽ वभृथश्च स्वगाकारश्च म इत्याह स्वगाकृत्या अग्निश्च मे धर्मश्च म इत्याहैतद्वै ब्रह्मवर्चसस्य रूप ꣳ रूपेणैव ब्रह्मवर्चसमवरुन्धे, ऋक् च मे साम च म इत्याहैतद्वै छन्दसा ꣳ रूप ꣳ रूपेणैव छन्दा ꣳ स्यवरुन्धे, गर्भाश्च मे वत्साश्च म इत्याहैतद्वै पशूना ꣳ रूप ꣳ रूपेणैव पशूनवरुन्धे कल्पान् जुहोत्य क्लृप्तस्य क्लृप्त्यै, युग्मदयुजे जुहोति मिथुनत्वायोत्तरा वती भवतोऽभिक्रान्त्या, एकाचमे तिस्रश्च म इत्याह देवछन्दसं वा एका च तिस्रश्च मनुष्य छन्दसं चतस्रश्चाष्टौ च देवछन्दसं चैव मनुष्य छन्दसं चाव रुन्ध, आत्रय स्त्रिꣳशतो जुहोति त्रयस्त्रिꣳ शद्वै देवता देवता एवाव रुन्ध आऽष्टा चत्वारिꣳ शतो जुहोत्यष्टाचत्वारिꣳ शदक्षरा जगती जागताः पशवो जगत्यैवास्मै पशूनव रुन्धे वाजश्च प्रसवश्चेति द्वादश जुहोति द्वादश मासाः संवत्सरः संवत्सर एव प्रति तिष्ठति ॥५-४-८॥

ॐ एका च मे तिस्रश्च मे पञ्च च मे सप्त च मे नव च म एकादश च मे त्रयोदश च मे पञ्चदश च मे सप्तदश च मे नवदश च म एकवि ꣳ शतिश्च मे त्रयोवि ꣳ शतिश्च मे पञ्चवि ꣳ शतिश्च मे सप्तवि ꣳ शतिश्च मे नववि ꣳ शतिश्च म एकत्रि ꣳ शच्च मे त्रयस्त्रि ꣳ शच्च मे (१) चतस्रश्च मेऽष्टौ च मे द्वादशच मे षोडश च मे वि ꣳ शतिश्च मे चतुर्वि ꣳ शतिश्च मेऽष्टावि ꣳ शतिश्च मे द्वात्रि ꣳ शच्च मे षट्त्रि ꣳ शच्च मे चत्वारि शच्च मे चतुश्चत्वारि ꣳ शच्च मेऽष्टाचत्वारि ꣳ शच्च मे वाजश्च प्रसवश्चापिजश्च क्रतुश्च सुवश्च मूर्धाच व्यश्नियश्चा (२) ऽऽन्त्यायनश्चान्त्यश्च भौवनश्च भुवनश्चाधिपतिश्च ॥४-७-११॥

शुक्लयजुर्वेदे-ॐ शुक्रज्ज्योतिश्च चित्रज्ज्योतिश्च सत्यज्ज्योतिश्च ज्योतिष्माँश्च । शुक्रश्चऽऋतपाश्चात्यꣳहाः ॥१७-८०॥ ईदृङ्चान्यादृङ्च सदृङ्च प्रतिसदृङ्च । मितश्च सम्मितश्च सभराः ॥१७-८१॥ ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च । धर्त्ता च विधर्त्ता च विधारयः ॥१७-८२॥ ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च । अन्ति मित्रश्च दूरेऽअमित्रश्च गणः ॥१७-८३॥ ईदृक्षासऽएतादृक्षासऽऊषुणः सदृक्षासः प्रति सदृक्षासऽएतन । मितासश्च सम्मितासो नो अद्य सभरसो मरुतो यज्ञेऽअस्मिन् ॥१७-८४॥ स्वतवाँश्च प्रघासी च सान्तपनश्च गृहमेधी च । क्रीडी च शाकी चोज्जेषी ॥१७-८५॥ उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च । सासह्वाँ श्चाभियुग्वा च विक्षिपः स्वाहा ॥३९-७॥ इन्द्रन्दैवी र्विशो मरुतोऽनुवर्त्मानो भवन्यथेन्द्रन्दैवीर्विशो मरुतो नु वर्त्मानो भवन् । एवमिमं यजमानन्दैवीश्चविशो मानुषी श्चानुवर्त्मानो भवन्तु ॥१७-८६॥ इमꣳस्तनमूर्जस्वन्तन्धयापा म्प्रपीनमग्ने सरिरस्य मध्ये । उत्सञ्जुषस्व मधुमन्तमर्व्वन्त्समुद्रिय ꣳ सदन माविशस्व ॥१७-८७॥ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम । अनुष्ष्वधमावह मादयस्व स्वाहा कृतं वृषभ वक्षि हव्व्यम् ॥१७-८८॥ व्वसोः पवि-त्रमसि शतधारं व्वसोः पवि-त्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु व्वसोः पवि-त्रेण शतधारेण सुप्वा कामधुक्षः ॥१-३॥

Scanned by CamScanner

आग्नेयसूक्तम्-ॐ समास्त्वाग्नऽऋतवो व्वर्द्धयन्तु संव्वत्सराऽऋषयो यानि सत्या । सन्दिव्येन दीदिहि रोचनेन व्विश्वाऽआभाहि प्रदिशश्चतस्रः ॥२७-१॥ सञ्चेध्ध्यस्वाग्ने प्रचबोधयैनमुच्च तिष्ठ महते सौभगाय । मा चरिष दुपसत्तातै अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥२७-२॥ त्वामग्ने वृणते ब्राह्मणाऽइमे शिवोऽअग्ने संव्वरणे भवान ः । सपत्न हानो अभिमातिजिच्च स्वे गये जागृह्यप्रयुच्छन् ॥२७-३॥ इहैवाग्नेऽअधि धारया रयिम्मा त्वा निक्रन् पूर्व्वचितो निकारिणः । क्षत्रमग्ने सुयममस्तु तुभ्यमुपसत्ता व्वर्द्धतान्ते अनिष्टृत ः ॥२७-४॥ क्षत्रेणाग्ने स्वायु ः स ꣳ रभस्व मित्रधेये यतस्व । सजातानाम्मदध्यमस्थाऽएधिराज्ञामग्ने विहव्यो दीदिहीह ॥२७-५॥ अतिनिहोऽअतिस्रिधोत्यचित्तिमत्यरातिमग्ने । व्विश्वाह्यग्ने दुरिता सह स्वाथास्मभ्य ꣳ सहवीरा ꣳ रयिन्दाः ॥२७-६॥ अनाधृष्यो जातवेदाऽअनिष्टृतो व्विराडग्ने क्षत्रभृद् दीदिहीह । व्विश्वाऽआशा ः प्रमुञ्चन्मानुषीर्भिय ः शिवेभिरद्य परिपाहिनो व्वृधे ॥२७-७॥ बृहस्पते सवितर्बोधयैन ꣳ स ꣳ शितञ्चित्सन्तरा ꣳ स ꣳ शिशाधि । व्वर्द्धयैनम्महते सौभगाय विश्वे एनमनुमदन्तु देवा ः ॥२७-८॥ अमुत्र भूयाद धयद्यमस्य बृहस्पतेऽअभि शस्तेरमुञ्च ः । प्रत्यौहता मश्विना मृत्यु मस्माद्देवानामग्ने भिषजा शचीभि ः ॥२७-९॥

विष्णुसूक्तम् - ॐ व्विष्णोर्नु कं व्वीर्य्याणि प्रवोचं यः पार्त्थिवानि विममे रजा ꣳसि । योऽअस्कभायदुत्तर ꣳ सधस्त्थं व्विचक्रमाणस्त्रेधोरुगायो व्विष्णवेत्वा ॥५-१८॥ दिवो वा व्विष्णऽउत वा पृथिव्व्यामहो वा विष्णऽउरोरन्तरिक्षात् । उभा हि हस्ता व्वसुना पृणस्वाप्रयच्छ दक्षिणा दोत सव्व्याद् व्विष्णवेत्वा ॥५-१९॥ प्रतद्विष्णुस्तवते व्वीर्य्येण मृगोन भीम ः कुचरो गिरिष्ठा ः । यस्योरुषु त्रिषु व्विक्रमणेष्वधि क्षियन्ति भुवनानि व्विश्वा ॥५-२०॥ व्विष्णो रराटमसि व्विष्णो ः श्नप्त्रे स्त्थो व्विष्णो ः स्यूरसि व्विष्णो र्ध्रुवोसि । वैष्णवमसि व्विष्णवे त्वा ॥५-२१॥ इदं व्विष्णुर्व्वि चक्रमेत्रेधा निदधे पदम् । समूढमस्य पा ꣳसुरे स्वाहा ॥५-१५॥ त्रीणि पदा व्विचक्रमे व्विष्णुर्गोपाऽअदाभ्य ः । अतो धर्म्माणि धारयन् ॥३४-४३॥ सहस्रशीर्षा० १६

रुद्रसूक्तम् - ॐ नमस्ते रुद्रमन्यव० इति सकलोऽध्यायः । नमस्ते० इति षोडशर्चोऽनुवाकः । मानस्तोके० नमः शम्भवाय० इमा रुद्राय० त्र्यम्बकं यजामहे० ।

इन्दुसूक्तम् - ॐ आप्यायस्व समेतुते व्विश्वत ः सोम वृष्ण्यम् । भवा व्वाजस्य सङ्गथे ॥१२-११२॥ सन्ते पया ꣳसि समु यन्तु व्वाजा ः सं व्वृष्ण्यान्यभिमातिषाह ः । आप्यायमानोऽअमृताय सोम दिवि श्रवा ꣳस्युत्तमानिधिष्व ॥१२-११३॥ आप्यायस्व मदिन्तम सोम व्विश्वेभिर ꣳ शुभि ः । भवान ः सुप्रथस्तम ः सखा व्वृधे ॥१२-११४॥

Scanned by CamScanner

चमकम् - वाजश्चमे० सकलश्चमकाध्यायः २८ ॥ एका च मे० चतरस्रश्च मे० त्र्यविश्च मे० षष्ठवाट् च मे० व्वाजाय स्वाहा० आयुर्य्यज्ञेन कल्पतां० व्वेट् स्वाहा - इति षण्मन्त्रा वा ॥

२र २र २र ३र २र ३र २र ३र २र २र १ १ र
महावैश्वानरसाम - ॐ हाउ । हाउ । हाउ । ओ हा । ओ हा । ओहायि । वयो होयि । वयो
१ २र १ २ र १ २ र १ २ र १ २ १ २ १ २ १
होयि । वयो होयि । पयो होयि । पयो होयि । पयो होयि । चक्षुर्होयि । चक्षुर्होयि । चक्षुर्होयि ।
२ र १ २ र १ २ र १ २ र १ २ र १ २ र १ २र १
श्रोत्रꣳहोयि । श्रोत्रꣳहोयि । श्रोत्रꣳहोयि । आयुर्होयि । आयुर्होयि । आयुर्होयि । तपोहोयि ।
२र १ २र १ २र १ २र १ २र १ २र २ १ २र र १ २र र १
तपोहोयि । तपोहोयि । वर्चोहोयि । वर्चोहोयि । वर्चोहोयि । तेजोहोयि । तेजोहोयि । तेजोहोयि ।
२ १ २ १ २ १ २र १ २र १ २र १ २ १ र २
सुवर्होयि । सुवर्होयि । सुवर्होयि । ज्योतिर्होयि । ज्योतिर्होयि । ज्योतिर्होयि । प्रक्षस्य वृष्णो अरुषस्य
१र २ १र र र र र १र २ २र र १र २१र २ १र
नूमा २३ हाः । प्रनो वचो विदथा जातवेदा २३ सायि । वैश्वानराय मतिर्नव्यसेश २३ चीः । सोम
२ र २ १ २ २र २र २र ३र२र ३र२र ३र२र ३र२र
इव पवते चासरग्ना २३ या३यि । हाउ । हाउ । हाउ । ओहा । ओहा । ओहा । ओहायि ।
२र १ २र १ २र १ २र १ २र १ २र १ २ १ २ १
वयोहोयि । वयोहोयि । वयोहोयि । पयोहोयि । पयोहोयि । पयोहोयि । चक्षुर्होयि । चक्षुर्होयि ।
२ १ २र १ २र १ २र १ २र १ २र १ २र १
चक्षुर्होयि । श्रोत्रꣳहोयि । श्रोत्रꣳहोयि । श्रोत्रꣳहोयि । आयुर्होयि । आयुर्होयि । आयुर्होयि ।
२र १ २र १ २र १ २र १ २र १ २र १ २र १ २र १
तपोहोयि । तपोहोयि । तपोहोयि । वर्चोहोयि । वर्चोहोयि । वर्चोहोयि । तेजोहोयि । तेजोहोयि ।
२र १ २ १ २ १ २ १ २र १ २र १ २र १ ३
तेजोहोयि । सुवर्होयि । सुवर्होयि । सुवर्होयि । ज्योतिर्होयि । ज्योतिर्होयि । ज्योतिर्होयि । वा २३४
१र र २र २ १ २ १ र २ २र १ र १र २ १ २र २र २ १ २र २ २ र ३
औहोवा । ए । अग्निः समुद्रमाक्षयत् । ए । अग्निर्मूर्द्धाभवद्दिवः । ए । आयुर्द्धा अस्मभ्य वर्चोधा देवेभ्या
११ ११ र र र २र१ २र१ २र१ २र १ २र १
२३४५ः ॥१॥ ओ३१म् । ओ३१म् । ओ३१म् । आयुः । आयुः । आयुः । ज्योतिः । ज्योतिः ।
२र १ २र१र २ २र१र २ २र१र २ २र१र २ २ २र१र २ २ २र१र २
ज्योतिः । ज्योतो वा । ज्योतो वा । ज्योतो वा । ज्योतो वा हायि । ज्योतो वा हायि । ज्योतो वा
२ २ १२र र १र २ २र १र २ १ १ र १र२१ २ १ २ १ २१र र २१र
हाउ । वा । इह स्वर्वैश्वानराय प्रदिशो ज्योतिर्बृहत् । इन्दुरिडासत्यं । सत्यं । सत्यं । सत्यो वा । सत्यो

Scanned by CamScanner

र  २१र  र  २१र  र  २  २१र  र  र  २११  र  र  २१  २र  १र
वा । सत्यो वा । सत्यो वा हायि । सत्यो वा हायि । सत्यो वा ३ हाउ २ वा । इह स्वर्वैश्वानराय
२ २ र १र  २  १  २र  २ र  र  २१र२  २१र२  २१र२  २१  र
प्रदिशोज्योतिर्बृहत् । कायमापो वनातुवाम् । तुवाम् । तुवाम् । तुवोवा । तुवोवा । तुवोवा । तुवो वा
२  २ १ र २  २ १ र २  २ १ र २  २ १ र  २  २१ २  १र
हायि । तुवो वा हायि । तुवो वा हायि । तुवो वा हायि । तुवो वा ३ हाउ । वा । इह स्वर्वैश्वानराय
२१२र  १र  १  १र२र१  २  १र  २  १र  २  १र  २  १र २  २  १र  २  २  १र
प्रदिशो ज्योतिर्बृहत् । द्यौर्भूतं पृथिवी । पृथिवी । पृथिवी । पृथिव्यो वा । पृथिव्यो वा । पृथिव्यो
र  २  १र र २  २  १र  २ र  २  १र  २  २  २१  २र  १ र  २१२र
वा । पृथिव्यो वा हायि । पृथिव्यो वा हायि । पृथिव्यो वा ३ हाउ । वा । इह स्वर्वैश्वानराय प्रदिशो
१र  २ १  १  र र  २१र  र  २१र  र  २१र  र  २१र  र २  २१र  र
ज्योतिर्बृहत् यन्मातॄरजगन्नयाः । अपाः । अपो वा । अपो वा । अपो वा । अपो वा हायि । अपो वा
२  २ १र  र  २  २१  २र  १र २ १ २र  १र  २१  २ १र२  १र२  १र२
हायि । अपो वा ३ हाउ । वा । इह स्वर्वैश्वानराय प्रदिशो ज्योतिर्बृहत् । सहस्तेज आपः । आपः ।
१र  २१  रर  २१  रर  २१  रर  २१  रर २  २१र  र २  २१र  र
आपः । आपो वा । आपो वा । आपो वा । आपो वा हायि । आपो वा हायि । आपो वा ३
२  २  २र  १र २१ २र १र २ २  र  र  र  २र१
हाउ । इह स्वर्वैश्वानराय प्रदिशो ज्योतिर्बृहत् । न तत्ते अग्ने प्रमृषे निवर्तनाम् । तनाम् । तनाम् । तनो
र  २१ २र  २१  रर  २१र  र  २  २१र  र  २  २१र  र  २  २१  २र  १र
वा । तनो वा । तनो वा । तनो वा हायि । तनो वा हायि । तनो वा ३ हाउ । वा । इह स्वर्वैश्वानराय
२१ रर  १र  २  १  २१र  र  र  २  २  २र १र  र  २र १र  र  २र १र
प्रदिशो ज्योतिर्बृहत् । उषादिशो ज्योतिः । ज्योतिः । ज्योतिः । ज्योतो वा । ज्योतो वा । ज्योतो
२  २र १र  र  २  २र १र  र  २  २र १र  र  र  २१  २र  १र  २१ २र
वा । ज्योतो वा हायि । ज्योति वा हायि । ज्योति वा ३ हाउ । वा । इह स्वर्वैश्वानराय प्रदिशो
१र  २ १  २र र  र  २१र  र  २१र  र  २१र  र  २१र  र
ज्योतिर्बृहत् । यदूरेसन्निहाभूवाः । भूवाः । भूवाः । भूवो वा । भूवो वा । भूवो वा । भूवो वा
२  २१र  र  २  २१र  र  २  २१  २१  १र  २१ रर  १र  २ १
हायि । भूवो वा हायि । भूवो वा ३ हाउ । वा । इह स्वर्वैश्वानराय प्रदिशो ज्योतिर्बृहत् ।
२  २  २  २र  २र  २र  २र १  २र १  २र १  २र १र
ओ३१म् । ओ३१म् । ओ३१म् । आयुः । आयुः । आयुः । ज्योतिः । ज्योतिः । ज्योतिः । ज्योतो
र  २र १र  र  २र १र  र २  २र १र  र  २  २र १र  र  २  २१र  २र
वा । ज्योतो वा । ज्योतो वा हायि । ज्योतो वा हायि । ज्योतो वा ३ हाउ । वा । धर्मो मरुद्भिर्भुवनेषु

१ ११ ११
चक्रदत् । इट् इडा २३४५ ॥ आ० प्र० साम० ३-४ ॥ ज्येष्ठसाम पूर्णाहुतौ निर्दिष्टम् । बृहद्रथन्तरादिसामानि यथासमयं पठेत् ।

अथर्ववेद अग्निसूक्तम् - ॐ समास्त्वाग्न ऋतवो वर्धयन्तु संवत्सरा ऋषयो यानि सत्या । संदिव्येन दीदिहि रोचनेन विश्वा आभाहि प्रदिशश्चतस्रः ॥५॥ सञ्चेध्यस्वाग्ने प्रच वर्धयेममुच्च तिष्ठ महते सौभगाय । माते रिषन्नुपसत्तारो अग्ने ब्रह्माणस्ते यशसः सन्तु मान्ये ॥१॥ त्वामग्ने वृणते ब्राह्मणा इमे शिवो अग्ने संवरणे भवा नः । सपत्नहाग्ने अभिमातिजिद् भव स्वे गये जागृह्यप्रच्छन् ॥३॥ क्षत्रेणाग्ने स्वेन सं रभस्व मित्रेणाग्ने मित्रधा यतस्व । सजातानां मध्यमेष्ठा राज्ञा मग्ने विहव्यो दीदिहीह ॥४॥ अति निहो अतिसृधो प्रत्यचित्तीरति द्विषः । विश्वाह्यऽग्ने दुरिता तर त्वमथास्मभ्यं सहवीरं रयिं दाः ॥५॥ २-६-१ तः ५॥

वसोर्या धारा मधुना प्रपीना घृतेन मिश्रा अमृतस्य नाभयः । सर्वास्ता अवरुन्धे स्वर्गः षष्ट्यां शरत्सु निधिपा अभीऽच्छात् ॥१॥ निधिं निधिपा अभ्येऽन मिच्छादनीश्वरा अभितः सन्तु ये ३ न्ये । अस्माभिर्दत्तो निहितः स्वर्ग स्त्रिभिः काण्डैस्त्रीन् त्स्वर्गानरुक्षत् ॥२॥ अग्नी रक्षस्तपतु यद् विदेवं क्रव्यात् पिशाच इह मा प्रपास्त । नुदाम एनमप रुध्मो अस्मदादित्या एनमङ्गिरसः सचन्ताम् ॥३॥ आदित्येभ्यो मध्विदं घृतेन मिश्रं प्रतिवेदयामि । शुद्धहस्तौ ब्राह्मणस्यानिहत्यैतं स्वर्गं सुकृता वपीतम् ॥४॥ इदं प्रापमुत्तमं काण्डमस्य यस्मा ल्लोकात् परमेष्ठी समाप । आसिञ्च सर्पि र्घृतवत् समङ्ग्ध्येष भागो अङ्गिरसो नो अत्र ॥५॥ सत्याय च तपसे देवताभ्यो निधिं शेवधिं परिदद्म एतम् । मानो द्यूतेऽव गान्मा समित्यां मास्मान्यस्मा उत् सृजता पुरा मत् ॥६॥ अहं पचाम्यहं ददामि ममेदु कर्मन् करुणेऽधिजाया । कौमारो लोको अजनिष्ट पुत्रो ३न्वारभेथां वय उत्तरावत् ॥७॥ न किल्विष मत्र नाधारो अस्ति न यन्मित्रैः सममममान एति । अनूनं पात्रं निहितं न एतत् पक्तारं पक्वः पुनरा विशाति ॥८॥ प्रियं प्रियाणां कृणवाम तमस्ते यन्तु यतमे द्विषन्ति । धेनुरनड्वान् वयोवय आयदेव पौरुषेयमपमृत्युं नुदन्तु ॥९॥ समग्नयो विदुरन्यो अन्यं य ओषधीः सचते यश्च सिन्धून् । यावन्तो देवा दिव्या ३ तपन्ति हिरण्यं ज्योतिः पचतो बभूव ॥१०॥ १२-३-४१ तः ५० ॥

शु० यजु० ब्रा० ॐ सहैष यज्ञऽउवाच नग्नताया वै बिभेमीति काते नग्नतेत्यभित एनमापरिस्तृणीयुरिति तस्मादेतमग्निमभितः परिस्तृणन्ति तृष्णाया वै विभेमीति काते तृप्तिरिति ब्राह्मणस्यैव तृप्तिमनुतृप्येयमिति तस्मात् स७स्थिते यज्ञे ब्राह्मणन्तर्प्पयीत वै ब्रूयाद्यज्ञमेवैतत्तर्पयति ॥१२॥ यत्कर्मणात्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टत् स्विष्टकृद्विद्वान् स्विष्ट ६ सुहुतं करोतु स्वाहा ॥१३॥ ('अहुतादो मरुतः' इति श्रुतिवचनाद् वसोर्धाराया होमत्वेन परिगणनाभावान्नात्र त्यागोच्चारणम् । स्रुचोऽग्नौ प्रक्षेपः) इति वसोर्धारा ।

Scanned by CamScanner

## ७८ भस्मधारण होमसंकल्प मुखमार्जन पवित्रप्रतिपत्ति पूर्णपात्रदानप्रणीताविमोकाः ॥

यजमानः - कुण्डाचार्याश्च स्वस्थाने उपविश्य - अग्नेरीशानीतो भस्म स्रुचाऽदाय भस्म धारयेयुः - ॐ श्रद्धां मेधां यशः प्रज्ञां विद्यां पुष्टिं श्रियं बलम् । तेज आयुष्यमारोग्यं देहि मे हव्य वाहन ॥ ॐ त्र्यायुषञ्जमदग्नेः - इति ललाटे - कश्यपस्य त्र्यायुषम् - इति कण्ठे । यद्देवेषु त्र्यायुषम् - इति बाह्वोः । तन्नोऽअस्तु त्र्यायुषम् - इति हृदये । हस्तं प्रक्षाल्य ।

होमसंकल्पः - आघारादि पूर्णाहुति पर्यन्तं स्वैः स्वैः मन्त्रैः यस्यै यस्यै देवतायै यावद्यावत्संख्याकं हुतं सा सा देवता प्रीयताम् । संस्रवप्राशनम् । प्रणीतोदकेन पवित्राभ्यां मुखमार्जनम् । ग्रन्थिं विमोच्य अग्नौ पवित्रप्रतिपत्तिः । ब्रह्मणे पूर्णपात्रदानम्-कृतकर्मसाङ्गतासिद्ध्यर्थं इदं पूर्णपात्रं तत्प्रत्याम्नायभूतं द्रव्यं वा तुभ्यमहं संप्रददे । यज० प्रतिगृह्यताम्-ब्रह्मा-ॐ द्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृह्णातु । ॐ स्वस्ति - इति ब्रह्मा ब्रूयात् ।

पश्चिमे प्रणीताविमोकः - तज्जलं यजमानशिरसि क्षिपेत् - ॐ आपः शिवाः शिवतमाः शान्ताः शान्ततमास्तास्ते कृण्वन्तु भेषजम् । परिस्तरणान्यग्नौ विसृजेत् ।

इति भस्मधारण होमसंकल्प संस्रवप्राशनादि प्रणीता विमोकान्तं कर्म ।

## ७९ प्रासादोत्सर्गः ।

यजमानः प्रासादसमीपे द्वारसमीपे वा उदङ्मुख उपविश्य साक्षत दर्भगन्धपुष्पादिसहित जलमादाय - अद्य० पू० तिथौ - इमं शिला-इष्टका-दारु पाषाण प्राकार बलभीगोपुर ध्वजशिखरसहितं अमुकदेवताकं प्रासादं समस्त भक्तजनग्रामजनदेशजन कल्याणाय प्रासाद प्रतिमादि सम्पादक यजमानानां मम च सकुटुम्बस्य समस्तपूर्वजानामुद्धारपूर्वकं अमुक लोकप्राप्त्यर्थं अमुकदेवताप्रीत्यर्थं सूर्याचन्द्रमसौ यावद् देवदिव्यकलातेजोऽभिवृद्धि पूर्वकं यथाधिकारं दर्शनपूजनाद्यर्थं समस्तभक्तेभ्यः अहं उत्सृज्ये । न मम - इति प्रासादसोपाने द्वारे वा जलमुत्सृज्य साष्टाङ्गं प्रणम्य स्वस्थानमागच्छेत् । ततः स्थापितदेवतानां नीराजनादि क्षमापनान्तं कर्म कुर्यात् ।

## ८० सद्यश्चतुर्थीकर्म कङ्कणमोचनम् ।

सद्यश्चतुर्थीकर्मणि चिकीर्षिते यजमानो ब्राह्मणो वा १ मधु २ हरिद्रा ३ सर्षपचन्दन यवपिष्ट ४ मनः शिलप्रियङ्गुपिष्ट इति द्रव्यचतुष्टयेन देवं विलेप्य संस्नाप्य संप्रोक्ष्य वा जलाधिवासे तदकरणे स्नपनविधौ देवदक्षिणहस्ते मन्त्राभिमन्त्रितं - यदा बध्नन्० इति मन्त्रेण बद्धमूर्णासूत्रं-ॐ मुञ्चन्तु मा

Scanned by CamScanner

शपत्थ्याादथो व्वरुण्याादुत । अथो यमस्य पड्वीशात् सर्वस्माद् देव किल्विषात् ॥१२-१०॥ इति मन्त्रेण विमुच्य देवपादयोः समर्पयेत् ॥

## ८१ नीराजनादि क्षमापनान्तम् । श्रेयोदानम् ।

मण्डपं समागत्य-मण्डपदेवतानां प्रासादस्थापितदेवतानाञ्चैकतन्त्रेण नीराजनं कृत्वा प्रदक्षिणां मन्त्रपुष्पाञ्जलिं विशेषार्घं प्रार्थनां नमस्कारान् क्षमापनञ्च कृत्वा श्रेयोदानमाचारप्राप्तं कुर्यात्-आचार्यः सऋत्विग् यजमानहस्ते-शिवा आपः सन्तु-इति जलम् । सौमनस्यमस्तु-इति पुष्पम् । अक्षतं चारिष्टं चास्तु-इत्यक्षतान्-दद्यात् । आचार्यो वरणगृहीतं साक्षत जलं पूगीफल मादाय-भवदनुज्ञया समस्तग्राम भक्त देश जलकल्याणाय चन्द्रसूर्यौ यावत् प्रतिमासु प्रासादे च देवकलासान्निध्यहेतवे एभिर्ब्राह्मणैः सह संकल्पित सग्रहमखसप्रासाद-अमुक दिनसाध्य सपरिवार अमुकदेवता अचलप्रतिष्ठाङ्गभूतं पूजन जपस्नपनन्यास होम प्रतिष्ठादि जन्यं यत् श्रेयः तेन श्रेयसा त्वं श्रेयस्वी भव-इत्युक्त्वा जलं यजमानहस्ते दद्यात् । यजमानः - श्रेयस्वी भवामि इति वदेत् । साक्षतपूगीफलं देवपादयोः समर्प्य प्रणमेत् ।

### दानसंकल्पाः ।

यजमानः - आचार्याय गोनिष्क्रयं दद्यात्-जलमादाय-सकलजनपद श्रेयसे कृतस्य संग्रहमखसप्रासाद अमुक दिनसाध्य-सपरिवार-अमुकदेवता-अचलप्रतिष्ठा कर्मसाङ्गतासिद्धये आचार्याय सोपस्करां गां अथवा तन्निष्क्रयीभूतं द्रव्यं दास्ये । २ ब्रह्मणे वृषभदानम्-कृतकर्म साङ्गतासिद्ध्यर्थं ब्रह्मणे प्रत्यक्षं वृषभ मथवा तन्निष्क्रयी भूतं द्रव्यं दास्ये । ३ दक्षिणा संकल्पः- कृत० सिद्ध्यर्थ आचार्यादिभ्यो यथोत्साहं दक्षिणां दास्ये । ४ आचार्याय दशमहादानसंकल्पः- कर्मसाद्गुण्यहेतवे दशमहादाननिष्क्रयीभूतं द्रव्यं दास्ये । ५ मण्डपनिष्क्रयः - कृत० सिद्ध्यर्थं आचार्याय मण्डपनिष्क्रयीभूतं द्रव्यं दास्ये । ६ पीठदानसंकल्पः- इमानि पीठानि सोपस्कराणि आचार्याय वा मनसोद्दिष्टेभ्यो विप्रेभ्यो दातुमहमुत्सृज्ये । ७ घृतपात्रतिलपात्र छायापात्र चरुस्थाली संकल्पाः - आचार्यायं घृतपूरितं कांस्यपात्रं तिलपात्रं छायापात्रं तण्डुलपूरितां चरुस्थालीञ्च सदक्षिणां दास्ये । ८ ब्रह्मण आज्य स्थालीदानम् - कृत० सिद्ध्यर्थं ब्रह्मणे घृतपूरितामाज्यस्थालीं सदक्षिणां दास्ये । ९ भूयसी दक्षिणा संकल्पः - कृत० सिद्ध्यर्थं आचार्यादिभ्य-अन्येभ्यश्च यथोत्साहं दक्षिणां दास्ये । १० मधुपर्कनिष्क्रय संकल्पः - कृत० सिद्ध्यर्थं वृतेभ्यो ब्राह्मणेभ्यः आसनवस्त्रयज्ञोपवीतछत्रउपानत् कमण्डलुअक्षमालासुवर्णमुद्रिकादि प्रत्याम्नायभूतं महावस्त्रं पात्रं द्रव्यं वा दास्ये । ११ ब्राह्मणादिभोजनसंकल्पः-कृतकर्मसाङ्गतासिद्ध्यर्थं अद्य (यथा कालं वा) ब्राह्मणान् सुवासिनीः बटुकान् कुमारिकाः, सुहृदः, अतिथीन् अभ्यागतांश्च आश्वपचं यथोपपन्नेन मिष्टान्नभोजनेन तर्पयिष्ये ॥

मण्डपे वायव्यां स्नानपीठे पत्नीं वामतः कृत्वोपविष्टं सपरिवारं यजमानं स्थापन स्थापित

Scanned by CamScanner

कलशेभ्यस्ताम्रपात्रे जलमादाय चतुर्वेदिन ऋत्विजः स्वशाखीया वा यथासमयं उत्तराभिषेकं अभिषेक विहितमन्त्रै दूर्वाम्रपल्लवैरुदङ्मुखास्तिष्ठन्तः कुर्युः । स्नात्वा स्नानवस्त्राण्याचार्याय दद्यात् । तदभावे वस्त्रनिष्क्रयीभूतं द्रव्यं दास्ये ॥

## ८२ ब्राह्मणपूजनम् । सत्कारः ।

परिहितनूतनवस्त्रो यजमानः आचान्तः - आचार्यादीन् यथा सम्भवं दक्षिणापात्रवस्त्रमुद्रिकादानादिना संपूज्य परितोषयेत् ।

### आशीर्वादादि ।

सकुटुम्ब यजमानभाले तिलकं कृत्वा-आशीर्वादमन्त्रान् पठेत् । ब्राह्मणा हस्तेऽक्षतान् गृहीत्वा ऋग्वेदे-ॐ इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य सुभगत्व मस्मे । पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं वाचः सुदिनत्वमह्नाम् ॥२-२१-६॥ शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान् । शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥१०-१६१-४॥ यथासमयं जटादिविकृति मन्त्रान् पठेत् ।

कृष्णयजुर्वेदे-ॐ शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्यथो खलु यावतीः समा एष्यन् मन्येत तावन्मानꣳस्यात् समृद्धया इमंमग्न आयुषेवर्च्चसे कृधीत्याहाऽऽ युरेवास्मिन् वर्चो दधाति विश्वे देवा जरदष्टि र्यथा सदित्याह जरदष्टिमेवैनं करोति ॥२-३-११-१०-११॥

शुक्ल यजुर्वेदे-ॐ शतमिन्नु शरदो० ॐ पुनस्त्वादित्या० ॐ तम्पत्नीमि० ॐ अथाध्वर्य्योः प्रतिगरोरात्० शतं भवति शतायुर्वै पुरुषः शतेन्द्रियऽआयुरेवेन्द्रियं वीर्य्यमात्मन् धत्ते ॥

२र र र र र १ २ १ १ २
सामवेदे-हाउ । ३ । यशो हाउ । ३ ॥ वर्चो हाउ । ३ । आस्मिन् हायि । २ ॥ आस्मिन् हा
१र २र १ ३ १ २ १ २१र २ १ २र १ २र
३ १ उ वा २ । तये दिन्द्रावनं वसु । त्वं पुष्यसि मध्यमम् । सत्रा विश्वस्य परमस्य राजसि । न किष्ट्वा
१र २ र र २ र र १ २ १ १ २
गोषु वृण्वते । हाउ । ३ । यशो हाउ । ३ । वर्चो हाउ । ३ । आस्मिन् हायि । २ । आस्मिन् हा
१२ र र २ र १र २१२ १र २ १र २ १ र २र १२र
३ १ उ । वा २ । आयुर्विश्वायु र्विश्वे विश्वमायुरशीमहि प्रजा न्त्वष्टरधि निधेह्यस्मे शतञ्जीवेम शरदो
१ २ ११ ११
वयन्ते २३४९ ॥

अथर्ववेदे-आयुरस्मै धेहि जातवेदः प्रजां त्वष्टरधि निधेह्यस्मै । रायस्पोषं सवितरासुवास्मै शतञ्जीवाति शरदस्तवायम् ॥

स्वस्त्यस्तुते० यावद्भूमण्डलं० जीवेद्वर्षशतं० यावद्वीचीतरङ्गान्० सर्वेऽत्र० धनं धान्यं पशुपुत्रलाभं शतसंवत्सरं दीर्घमायुः । सर्वे जनाः सुखिनो भवन्तु । इति मन्त्रैः सर्वे ब्राह्मणा अक्षतैराशिषो दधुः ॥

अग्निविसर्जनम् - ॐ गच्छ त्वं भगवन्नग्ने स्वस्थानं कुण्डमध्यतः । हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे ॥१॥ गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन ॥२॥ ॐ यज्ञ यज्ञं गच्छ यज्ञपतिङ्गच्छ स्वां योनिङ्गच्छ स्वाहा । एष ते यज्ञो यज्ञपते सह सूक्तवाकः सर्व्ववीरस्तञ्जुषस्व स्वाहा ॥२२-८॥ भो यज्ञनारायण, स्वस्थानं गच्छ शुभे कर्मणि पुनरागमनमस्तु ॥

पीठदेवताविसर्जनम्-ॐ यान्तु देवगणाः सर्वे पूजामादाय पार्थिवीम् । इष्ट कामप्रसिद्ध्यर्थं पुनरागमनाय च ॥ ॐ उत्तिष्ठ ब्रह्मणस्पते देवयन्तंस्त्वेमहे । उपप्रयन्तु मरुतः सुदानवऽइन्द्रप्राशूर्भवा सचा ॥३४-५६॥ आवाहितदेवताः स्वस्वस्थानं गच्छत । शुभे शुभे कर्मणि पुनरागमनमस्तु ॥

कृतकर्मसाद्गुण्यार्थं प्रैषात्मकपुण्याहवाचनं करिष्ये । भो ब्राह्मणाः समस्त जनपदश्रेयसे कृतस्य सग्रहमख सप्रासाद अमुकदिन साध्यसपरिवार-अमुकदेवता अचल प्रतिष्ठा कर्मणः पुण्याहं० ३ कल्याणं० ३ ऋद्धिं० ३ स्वस्ति० ३ श्रीरस्त्विति ३ भवन्तो ब्रवन्तु । प्रति प्रैषान् ब्राह्मणा दद्युः ।

## ८३ कर्मसमाप्तिः अवभृथस्नानविधिश्च ।

जलमादाय-समस्तग्रामभक्तदेशजनकल्याण सूर्याचन्द्रमसौ यावत् प्रासादे प्रतिमासु च देवकलासान्निध्यहेतवे मया (प्रतिनिधिभूतेन) एभिर्ब्राह्मणैः सह सग्रहमख सप्रासाद-अमुकदिन-साध्य-सपरिवार-अमुकदेवता-अचलप्रतिष्ठाकर्म सम्पादितं तत् कालक्रियाभक्तिश्रद्धाहीनं भवतां ब्राह्मणानां वचनात् सर्वभूतहृदयान्तर्यामिपरमेश्वरप्रसादात् सद्गुरुप्रसादाच्चतत्सर्वं परिपूर्णमस्त्विति भवन्तो ब्रुवन्तु । ब्राह्मणाः - अस्तु परिपूर्णम् ॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् । ॐ विष्णवे नमो विष्णवे नमो विष्णवे नमः । कृतं कर्म तत्सद् ब्रह्मार्पणमस्तु ॥ कर्मान्ते आचमनं । प्राणायामः ॥ ब्राह्मणान् सुहृदः अतिथीन् अभ्यागतांश्च मिष्टान्नेन भोजयित्वा स्वयं भुक्त्वा यथासुखं विहरेत् ।

**इति सप्रासाद सग्रहमख सर्वदेवताऽचलप्रतिष्ठा प्रयोगः समाप्तः ॥**

Scanned by CamScanner

## अवभृथस्नानम् ।

(सोमयागस्य तृतीयसवनान्तेऽभृथेष्टिः श्रौते कर्मणि वरुणप्रधासावभृथेष्टिवद् विहिता । अवभृथेष्ट्यां विहितानां पशुयागानां पिष्टपशुयागानां वा प्राधान्यादस्य कर्मणः श्रौतमात्रविषयत्वमिति निर्विवादम् । तत्र सोमलिप्तग्रहचमसस्थालीपूतभृदादीनि पात्राणि समादाय अवभृथेष्टिकरणस्थानरूपजलाशयं प्रतिगमनम्, गमनसमये प्रारम्भेऽर्धमार्गे जलसमीपे च सामगानम् सोमलिप्तपात्राणां जलप्रक्षेपं कृत्वा वरुणप्रघासावभृथेष्टिवदवभृथेष्टिं कृत्वा सयजमाना ऋत्विजः स्नात्वा देवयजनस्थलमागत्य उदयनीयेष्टिं मित्रावरुणदेवताकं पशुयागं च यथोदितं कुर्युः अन्यच्चावभृथेष्टि विहितं कर्म सम्पादयेत् ।)

पुनश्चात्र विचारणीयम्, श्रौते कर्मणि मन्त्रमयी देवतेति सिद्धान्तेन स्थापनकलशमूर्त्यादीनाम-भावात्तत्रावभृथस्नानरूपं कर्म नितरां प्राधान्यमावहति, शान्तिकपौष्टिकादिकर्मसु तु स्थापनकलशसत्त्वात् कलशोदकानाञ्च सपरिवारस्य यजमानस्य उत्तराभिषेकरूपप्रतिपत्त्यर्थत्वान्नात्रावभृथस्नानस्य स्वप्नेऽपि प्राप्तिः उत्तराभिषेकोत्तरं स्नानस्य विहितत्वात् ।

गत्यन्तराभावे प्रत्यक्षवचनाभावे च कदाचिदतिदेशो गृह्येत सर्वत्र श्रौतातिदेशग्रहणे तु सकलं शान्तिकपौष्टिकादि कर्म व्याकुलितं भवेत् ।

तथापि लोकप्ररोचनार्थं याज्ञिकाः कुर्वन्तीति अस्माभिरवभृथस्नानप्रयोगो लिख्यते, वस्तुतस्तु शान्तिकपौष्टिकादिष्ववभृथेष्टेः संबन्धलेशोऽपि नास्तीति विद्वांसो विदाङ्कुर्वन्तु ।

## अवभृथस्नानप्रयोगः ।

कुण्डाद् घटेन भस्म उद्धृत्य पूजासम्भारं पयो घृतं स्रुवं मत्स्यादीनां तोषाय चणकलाज पृथुकादिद्रव्यं कलशं चादाय ऋत्विक्सहितः सपौरः सपरिवारो यजमानो जलाशयं गच्छेत् । अर्धमार्गे क्षेत्रपालाय बलिंदद्यात् । जलसमीपे तटे सपत्नीको यजमानः प्राङ्मुख उदङ्मुखो वोपविश्य आचमनम् । प्राणायामः । शान्तिपाठादि । जलमादाय-कृतकर्मसादुगुण्यसिद्धये सपरिवारोऽहं ऋत्विग्भिः सह प्रधानदेवताप्रीत्यर्थं तीर्थेऽवभृथस्नानं करिष्ये । गणेशस्मरणं पूजनं वा । प्रैषात्मकं पुण्याहवाचनम् । श्वेतवस्त्रे तण्डुलाष्टदले कलशं निधाय तत्र ॐ तत्त्वायामि० । इति वरुणमावाह्य पूर्वादिक्रमेण० १ मत्स्यै० मत्सीम्० । २ कूर्म्यै० कूर्म्मीम्० । ३ वाराह्यै० वाराहीम्० ४ मण्डूक्यै० मण्डूकीम्० ५ मकर्यै० मकरीम्० ६ ग्राहक्यै० ग्राहकीम्० ७ क्रौञ्चिक्यै० क्रौञ्चिकीम्-इत्यावाह्यमत्स्यादिसहित वरुणाय नमः - इति सम्पूजयेत् । ततो जलाशये - तत्त्वायामि० येतीर्त्थानि० सतीर्थं वरुणमावाह्य सम्पूज्य मत्स्यादि तृप्त्यर्थं भक्ष्यरूपेण चणकादिद्रव्यं पुरुषसूक्तेन जले पयः पञ्चामृतं वा सिञ्चेत् ।

जलाशये दर्भचतुष्टयेनवेदीं प्रकल्प्य घृतेन द्वाविंशत्याज्याहुतीर्दद्यात् १ आपो अस्मा० पूत एभि-

स्वाहा-इदं मातृभ्यो नमम् । २ आपोहिष्ठा० इदमद्भ्यो० ३ योवः शिवतमो० इदं अद्भ्यो० । ४ तस्माऽअरङ्ग० इदमद्भ्यो० । ५ इमम्मे वरुण० इदं वरुणाय० । ६ तत्त्वायामि० इदं वरुणाय० । ७ त्वन्नो अग्ने व्वरुणस्य० इदमग्नीवरुणाभ्यां० । ८ सत्वन्नो अग्ने० इदं अग्नीवरुणाभ्यां० । ९ उदुत्तमं वरुण० इदं वरुणायादित्यायादितये च० । १० अग्नये स्वाहा इदमग्नये० । ११ ॐ सोमाय० इदं सोमाय० । १२ सवित्रे स्वाहा इदं सवित्रे० । १३ सरस्वत्यै० इदं सरस्वत्यै० । १४ पूष्णे० इदं पूष्णे० । १५ बृहस्पतये० बृहस्पतये० । १६ इन्द्राय० इदमिन्द्राय० । १७ घोषाय० घोषाय० । १८ श्लोकाय० इदं श्लोकाय० । १९ अंशाय० इदमंशाय० । २० भगाय० इदं भगाय० । २१ अर्यम्णे० इदं अर्यम्णे० । २२ स्रुवेण चतुर्वारं स्रुचि आज्यं प्रक्षिप्य-ॐ अग्नेरनीकम॒प आविवेशा॒पान्नपात् प्रति॒रक्षंन्नसु॒र्य्यम् । दमेदमे स॒मिधं यक्ष्यग्ने प्रतिते जि॒ह्वा घृतमुच्चरण्य॒त् स्वाहा ॥८-२४॥ इदमग्नये० ।

ततो जलमध्ये - ॐ वरुणाय नमः - इति बलिं दद्यात् । यन्त्रं देवताप्रतिमां वा सम्पूज्य जले निमज्जेत् - ॐ अवभृथ निचुम्पुण नि॒चे रुरसि निचुम्पुणः । अव दे॒वैर्देवकृ॒तमेनो यासिष॒मव॒मर्त्यैर्मर्त्यकृ॒तं पुरु॒राव्णो देवरि॒षस्पाहि दे॒वाᳩनां स॒मिदसि ॥८-२७॥ इति जले निमज्ज्य प्रधानकलशादर्धं जलं क्षिप्त्वा पुनस्तीर्थजलेन कलशं प्रपूर्य कुण्डादानीतभस्म जले क्षिपेत्-ॐ आपो देवीः प्रतिगृभ्णीत॒ भस्मै॒तत् स्यो॒ने कृणुद्ध्व ᳪ सुर॒भा उं लो॒के । तस्मै नमन्ता॒ जनय ᳪ सुपत्नीर्मा॒तेव पुत्रम्बिभृता॒प्स्वेनत् ॥१२-३५॥ प्रक्षिप्तं भस्म आदाय तेन सर्वाङ्गमनुलिम्पेत् । ततः सर्वे स्नात्वाऽहतवासांसि परिधाय आत्मनः कुशैर्मार्जयेयुः । सूर्यं नत्वा सम्पूज्य ॐ ये तीर्थानि० तीर्थं प्रार्थ्य बहिरागत्य देवताविसर्जनं कृत्वा यन्त्रं देवतां वा भस्मघटं चादाय गीतवाद्यघोष पुरः सरं मण्डपमागत्य पूर्वद्वारेण प्रविश्य यन्त्रं वा कलशञ्च स्वस्थाने स्थापयित्वा घटावशिष्टं भस्म कुण्डे पुनः प्रक्षिपेत् ।

जलमादाय-अनेन समाचारप्राप्तेन आतिदेशिकेन अवभृथस्नानविधिना परमेश्वरः प्रीयताम् । इत्यवभृथस्नानप्रयोगः ।

## ८४ दिनद्वयसाध्यः पुनः प्रतिष्ठाप्रयोगः ।

(जीर्णप्रासादस्य संस्कारे क्रियमाणे प्रासादस्थितानामखण्डितानां मूर्त्तीनां चालनं कृत्वा सम्पन्ने प्रासादसंस्कारे चालितमूर्त्तीनां पुनः प्रतिष्ठाकर्म दिनद्वयेन सम्पादयितुं शक्यते । अथवा प्रासादस्य जीर्णभग्नादि दोषराहित्ये खण्डितजीर्णादिदोषदुष्टानां प्रतिमानां जीर्णोद्धारविधिना पूर्वं शुभदिने विसर्जनं कृत्वा नूतनप्रतिमानां प्रतिष्ठाऽपि दिनद्वयेन सम्पादनीया । तत्रायं विशेषः । जीर्णप्रासादसंस्कारे कृते चालितमूर्त्तीनां कुटीरहोमः जलाधिवासः, प्रासाद वास्तु प्रासादस्नपन प्रासाददिग्होमाना मनावश्यकत्वम् । प्रासादे दोपरहिते खण्डितभग्नात्यन्तजीर्णमूर्त्तीनामुद्धारे प्रासादवास्तुशान्ति प्रासादस्नपनाधिवासन-दिग्होमानामभावः, अन्यत् सर्वं नूतनप्रतिष्ठावत् यामगोदाहनान्यतरकालं यावत् कुटीरहोम जलाधिवासौ कृत्वा सर्वं नूतन प्रतिष्ठावत् संक्षेपेण कार्यमिति विवेकः ) चालनजीर्णोद्धारप्रयोगौ चाग्रे वक्ष्येते ।

Scanned by CamScanner

प्रतिनिधि भूतो यजमानः पञ्चनवैकादशपञ्चदशान्यतम प्राजापत्यं पक्षमाश्रित्य द्रव्यरूपं प्रायश्चित्तं कुर्यात् । ततस्तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । शान्तिपाठादि । सं० प्रासादसंस्काराय चालितमूर्त्तीनां सग्रहमखं दिनद्वयसाध्यं पुनः प्रतिष्ठाकर्मकरिष्ये । आसनविधिः । दिग्रक्षणम् । कलशार्चनं । दीपपूजनम् । गणपतिपूजनम् । पुण्याहवाचनम् मातृकापूजनम् । वैश्वदेव संकल्पः । वसोर्धारापूजनम् । आयुष्यमन्त्रजपः, नान्दीश्राद्धं, ऋत्विग्वरणम् । दिग्रक्षणम् । पञ्चगव्यकरणम् । भूमिपूजनं । कुण्डदेवतापूजनम् । अग्निस्थापनम् । ब्रह्मादिमण्डलदेवतास्थापनम् । प्रधानदेवतास्थापनम् । ग्रहस्थापनम् । योगिनीनां क्षेत्रपालभैरवान्यतरेषां स्थापनपूजने कृताकृते । कुशकण्डिकां, ग्रहहोमान्तं कृत्वा । स्नपनविधिः । शान्तिकपौष्टिक मूर्त्तिमूर्त्यधिपतिलोकपाल स्थाप्यदेवताहोमव्याहृतिहोम तत्त्वन्यासहोमाः २८ वा ८ संख्यया कार्याः । प्रासादप्रोक्षणम् । पञ्चगव्येन शुद्धिः । तत्त्वन्यासहोमः खड्गात् छुरिकाया वा (पृ० २९१) ततः प्रासादतत्त्वानां पिण्डिकातत्त्वानां (पृ० २९२) च पुनः प्रासादे पिण्डिकायाश्चन्यासः । शय्याधिवासः । (पृ० ३०१) ततः तत्त्वन्यासाः, पूर्वगृहीतजलेन पुनः प्रतिन्यासः । सायम्पूजादि ।

द्वितीयेऽह्नि प्रतिष्ठा दिने स्थापितदेवता पूजनं मध्याह्नात् पूर्वं प्रतिमूर्त्ति मूर्तिपति लोकपाल स्थाप्यदेवतानां ८ संख्यया होमः । देवजागरणं । मण्डपात् प्रासादे नयनम् । अर्घदानम् । स्वस्वस्थाने स्थापनम् । पुनः प्रतिष्ठाविधिः । ॐ पुनर्म्मन ÷ पुनरायुर्म्मऽआगन् पुनं ÷ प्राण ᳪ पुनरात्मा म आगन् पुनश्चक्षुः पुन ᳪ श्रोत्रम्मऽआगन् । वैश्वानरो अदब्धस्तनूपा अग्निर्न्न ÷ पातु दुरितादं वद्यात् ॥४-१५॥ सपरिवारं सर्वतत्त्वसहितामुकदेवतां पुनःप्रतिष्ठापयामि इति तत्त्वकलशावशिष्टं सर्वं जलं देवशिरसि सिञ्चेत् । प्रतिष्ठामन्त्राः ध्रुव सूक्तम् । संस्काराः । प्रार्थना । महापूजादि ।

मण्डपमागत्य-अघोर होमः २८ संख्यया । स्थापितदेवता होमः । व्याहृतिहोमः । उत्तरपूजनादिसमास्यन्तम् । स्नपने प्रथमादिसप्तमान्यतमपक्षेण स्नपनम् ।

## ८९ खण्डितादिदोषदुष्टप्रतिमाविसर्जने कृते दोषरहिते प्रासादे नूतनप्रतिमाप्रतिष्ठाक्रमः ।

आरम्भादिग्रह होमान्तं कृत्वा । कुटीरहोमे देवमन्त्रेण षट्पञ्चाशदाहुतयः । १ परंमृत्यो० २ अघोरेभ्यो० ३ त्र्यम्बकं० ४ यद्ग्रामे० अनेन मन्त्रचतुष्टयेन प्रत्येकं अष्टाष्ट संख्यया होमः । प्राणदा इति मन्त्रेण देवता घृतेनाभ्यज्य जलधारां कृत्वा मृदा पञ्चगव्येन पञ्चामृतेन देवं संशोध्य नेत्रे मधुसर्पिर्भ्यामापूर्य ॐ कृणुष्वपाजः० ५ द्रविणोदा० एभिर्मन्त्रै रभिमन्त्रितमूर्णासूत्रं देवदक्षिण हस्ते ॐ यदा बध्नन्० इति बद्ध्वा जलपात्र्यां वरुणतीर्थ सरः सागर मत्स्यादिमातृकासहितं वरुणमावाह्य-प्रतिमा जलेऽधिवासयेद् गोदोहनमात्रम् । ततः स्नपमविधिः । मूर्तिमूर्त्यधिपति लोकपाला वाहनम् ।

शय्याधिवासः । तत्त्वन्यास होमः । तत्त्वन्यासाः शान्तिकपौष्टिक होम-मूर्तिमूर्त्यधिपति लोकपाल होमस्थाप्यदेवताहोमव्याहृतिहोमाः । प्रासादप्रोक्षणम् । पिण्डिकाधिवासनम् । सायम्पूजनान्तम् ।

द्वितीयेऽहनि स्थापितदेवतापूजनम् । मूर्तिमूर्त्यधिपति लोकपालस्थाप्य देवताहोमः अष्टाष्ट संख्यया । देवमन्त्रतीर्थाभिमन्त्रित जलेन देवसेचनम् । प्रबोधनम् । अर्घदानम् । प्रासादनयनम् । मङ्गलपद्यादि । देवतानां स्थिरीकरणम् । मध्याह्नात् पूर्वं मुहूर्ते प्राणप्रतिष्ठाविधिः । प्रतिष्ठामन्त्राः । तत्तद्देवतासूक्तेन स्तुतिः । संस्काराः । प्रार्थना । महापूजादि ।

अघोरहोमः । स्थापित देवता होमः । उत्तरपूजनादि समाप्त्यन्तं नूतनप्रतिष्ठा विधिवत् सर्वं कार्यम् । अत्रापि स्नपनविधौ प्रथमादिसप्तमान्यतमपक्षेण स्नपनं कार्यम् । इति संक्षेपेण दिनद्वयसाध्ये प्रतिष्ठाप्रयोगे प्रयोग क्रमः सूचितः समयमर्यादामनुरुध्य ।

## ८६ एकदिनसाध्यप्रतिष्ठाप्रयोगः ।

(स्वल्पग्रामादिषु यजमानस्य द्रव्यसाधनशक्त्यभावे एकस्मिँल्लघुतमे प्रासादे भक्ता अचलप्रतिष्ठाकर्म एकेनैव दिनेन सम्पादयितुमिच्छन्ति । तत्र द्रव्यकार्पण्यं मूलं कारणम् । यावदुक्तशास्त्रानुरोधिप्रतिष्ठाङ्गभूत कर्मणामेकेन दिनेन सम्पादयितुमशक्यत्वात् तत्कर्मविधिद्रव्य होमादि संकोचः शिरसि समापतति । 'गुणविशेषे फलविशेषः' इति कात्यायन श्रौतसूत्रनिर्देशात् कर्मसंकोचात्फलसंकोचः स्वाभाविकः । पुनश्च पूर्वाह्णो वै देवाना'मिति श्रुतिवचनं मध्याह्नाद् द्विवादनात्पूर्वं वा दैवकर्मरूपं प्राणप्रतिष्ठाकर्म सम्पादनीयमेव । तथाऽसंभवे केचिद्यजमानायाज्ञिकाश्च यथाकथञ्चिन् निर्वर्तयितुभीहन्ते, तेषां संतोषाय एकदिनसाध्यः प्रतिष्ठाप्रयोगक्रमो निर्दिश्यते ।)

प्रतिनिधिरूपो यजमान पञ्चदशैकादशान्यतरगोनिष्क्रय प्रायश्चित्तं द्रव्येण कुर्यात् । उदकोपस्पर्शः । तिलककरणम् । शिखाबन्धतम् । आचमनम् । प्राणायामः । पवित्रधारणम् । शान्तिपाठदेवतानमस्कारादि । प्रधानसङ्कल्पः - समस्तपूर्वजोद्धाराय चन्द्रसूर्यौ यावत् प्रतिमायां देवकलासान्निध्यहेवतवे सग्रहमखां (सप्रसादां) अमुकदेवताऽचलप्रतिष्ठां सद्योऽधिवासपक्षेण करिष्ये । तदङ्गभूतानि कर्माणि यथाक्रमं करिष्ये । आसनविध्यादिदीपपूजनान्तम् । गणपतिपूजनम् । पुण्याहवाचनम् । मातृकापूजनम् । नान्दीश्राद्धम् । ऋत्विग्वरणम् । दिग्रक्षणम् । पञ्चगव्यकरणम् । भूम्यादिपूजनम् । अग्निस्थापनम् । मण्डले नाममन्त्रैर्देवतावाहनं कलशोपरि प्रतिमायां प्रधानपूजनम् । ग्रहस्थापनम् । प्रासादे चतुःषष्टिपदवास्तुमण्डले नाममन्त्रैर्बल्यन्तं वास्तुपूजनम् । कुशकण्डिका । आघाराज्यभागान्तेऽग्निपूजनम् । वराहुतिः । त्यागसङ्कल्पः । अष्टचतुर्द्वि संख्याभिर्ग्रहदेवताहोमः । स्थण्डिलान्तरेऽग्नौ देवमन्त्रेणाष्टाष्टसंख्यया कुटीरहोमः । देवं घृतेन 'प्राणदा०' इति अभ्यज्य जलधारां कृत्वा मृदा पञ्चामृतेन पञ्चगव्येन संशोध्य संस्नाप्य ३ अघोरेभ्यो० दीर्घायुस्त० मन्त्राभ्यामूर्णासूत्रमभिमन्त्र्य

Scanned by CamScanner

ॐ यदा बध्नन्० इति दक्षिणहस्ते कङ्कणं बद्ध्वा गोदोहनमात्रकालं यावज्जलेऽधिवासयेत् देवं प्रबोध्य वेद्यां स्थापनम् ॥ पूर्वोक्त प्रथमद्वितीयतृतीयचतुर्थस्नपनप्रकारान्यतमं पक्षं स्वीकृत्य १-४ ८-१६ एतदन्यतमपक्षेण कलशानासाद्य स्नपनविधिं तदङ्गभूतश्चान्यत् कर्म संक्षेपेण कुर्यात् । ततो मूर्तिमूर्तिपतिलोकपालान् स्थण्डिलात् कुण्डाद्वा ईशाने कलशे आवाह्य देवं मण्डपं प्रवेश्य शय्यायां धान्येऽधिवास्य । होमान् कुर्यात् । शान्तिकपौष्टिकहोमः अष्टाष्टसंख्यया मूर्तिमूर्त्यधिपति लोकपालानाम्, अष्टाष्टसंख्यया स्थाप्यदेवस्य २८ अष्टाविंशतिसंख्यया, व्याहृतिहोमः २८ संख्यया । तत्त्वन्यासहोमः २८ वा ८ संख्यया । 'दैव्यायकर्मणे शुन्धध्वम्' इत्येकेन कलशेन प्रासादं संस्नाप्य गन्धादिना संपूज्य ॐ सहस्रशीर्षा० ङ्गुलम्-इति प्रासादपुरुषं ध्यायेत् । पिण्डिकान्यासान् कृत्वा ॐ श्रीश्चते० इति पिण्डिकामधिवास्य पूजयेत् । तत्त्वन्यासे ॐ पुरुषात्मने नमः इत्यादि ३२ द्वात्रिंशन्यासात् कृत्वा कलशे निद्रामावाहयेत् । गोदोहनकालं यावद् बिलम्ब्य देवं प्रबोध्य देवमन्त्रेण स्तुत्वा ॐ धामन्ते० इत्यर्धं दत्त्वा मण्डपादुत्थाप्य प्रासादप्रादक्षिण्येन द्वारसम्मुखं संस्थाप्य मङ्गलपद्यं प्रपठ्य गर्भगृहं प्रवेश्य पिण्डिकागर्ते रत्न-धातु-धान्य-औषधी मनः शीलहिरण्यादि निक्षिप्य निर्दिष्टस्थाने दृष्टिः पतेत् तथा शिल्पिद्वारा स्थिरीकुर्यात् ।

निश्चितमुहूर्ते प्राणप्रतिष्ठाविधिं सम्पाद्य संस्कारान् प्रणवेन विभाव्य देवसूक्तेन मन्त्रेण वा स्तुत्वा प्रार्थयित्वा महापूजां कृत्वा प्रार्थयेत् । मण्डपे अघोरमन्त्रेण अष्टा हुतयः । स्थापितदेवताहोमः । उत्तरपूजनादि प्रणीताविमोकान्तम् । प्रासादोत्सर्गः । कङ्कणमोचनम् । नीराजनादि क्षमापनान्तम् । दानसङ्कल्पाः । ब्राह्मणपूजनं सत्कारश्च । तिलकाशीर्वादादि । अग्नि मण्डपस्थापितदेवताविसर्जनम् । कर्मसमाप्तिः । आचमनं प्राणायामः ।

**इति एकदिनसाध्यः संक्षिप्ततमः प्रतिष्ठाप्रयोगः ।**

## ८७ वापीकूपतडागोत्सर्गप्रयोगः ।

(वापीकूपतडागानां प्राच्यां प्रतीच्यां पूर्वे उत्तरे ऐशान्यां वा यथोक्तलक्षणं मण्डपं वा कृत्वा पञ्चकुण्डी मध्यवेदी पीठानि कार्याणि । अथवा मध्यवेदी पश्चिमे उत्तरे ईशाने वा समेखलं कुण्डं कुर्यात् । छायामण्डपे मध्ये कुण्डं प्राच्यां प्रधानवेदी चतुस्त्रिंशदंगुलायतविस्तृता हस्तोच्चा आग्नेय्यां गणपतिमातृकापीठं योगिनीपीठं ऐशान्यां क्षेत्रपाल पीठं ग्रहपीठम्, नैर्ऋत्यां वास्तुपीठम् । दिनद्वयसाध्य एकदिनसाध्यो वाऽयं प्रयोगः कार्यः । अत्रापि योगिनीक्षेत्रपालस्थापनं कृताकृतम् ।)

कर्ता प्रायश्चित्तं कृत्वा तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । शान्तिपाठदेवतानमस्कारादि सङ्कल्पः - समस्त पूर्वजानामुद्धारपूर्वकं ब्रह्मलोकनिवासहेतवे समस्तजीवानां तृप्तये सग्रहमख दिनद्वयसाध्यं, वापी (कूपतडाग प्रतिष्ठापनोत्सर्गाख्यं कर्म करिष्ये ।

(यथोक्तमण्डपकुण्डादिसत्त्वे मण्डपाद् बहिः गणेशपूजन पुण्याहवाचनमातृकापूजन नान्दीश्राद्धऋत्विग्वरणमधुपर्कार्चनवर्धिनीपूजन कर्माणि कृत्वा मण्डपं प्रविशेत्। छायामण्डपे तु मधुपर्कान्तं मण्डप एव, नात्र वर्धिनीपूजनमण्डपप्रवेशौ ।)

मण्डपे नैर्ऋत्यां पीठे द्वादशरेखाभिरेकविंशत्युत्तरशतपदात्मकं वास्तुमण्डलम् । शङ्कुरोपणम् । त्रिसूत्रवेष्टनम् । बलिदानम् । ततः पश्चिमादिप्रागन्त द्वादशरेखासूदक्संस्थं १ शान्त्यै० २ यशोवत्यै० ३ कान्त्यै० ४ विशालायै० ५ प्राणवाहिन्यै० ६ सत्यायै० ७ सुमत्यै० ८ नन्दायै० ९ सुभद्रायै० १० सुरथायै० ११ स्थिरायै० १२ विरजायै० इति रेखादेवताः पूजयेत् । दक्षिणाद्युदगन्तासु द्वादश रेखासु प्राक्संस्थं - १ हिरण्यायै० २ सुप्रभायै० ३ लक्ष्म्यै० ४ विभूत्यै० ५ विमलायै० ६ प्रियायै० ७ जयायै० ८ कालायै० ९ विशोकायै० १० इन्द्राण्यै० ११ विभवायै० १२ शिवायै० इत्यावाह्य पूजयेत् । ततो ब्रह्मादिवास्तुमण्डलदेवताः मध्ये कलशोपरि वास्तोष्पतिं चावाह्य पूजयेत् । तत एकतन्त्रेण बलिदानम् । इति बल्यन्तं वास्तुपूजनन् ।

अग्न्यायतनात् पश्चिमत उपविश्य - दिग्रक्षणं पञ्चगव्यकरणं भूम्यादिपूजनं कुण्डदेवतापूजनमग्निस्थापनं मध्यवेद्यां वारुणमण्डलदेवतास्थापनं प्रधानं वरुणश्चावाह्य पूजयेत् ।

ततो वापीकूपतडागानामुत्तरे प्रधानवेदिकोपर्युत्तरभागे वा गर्तं कृत्वा यजमानप्रमाणमष्टास्रं कदंब-विकङ्कत-पलाश-बिल्व-न्यग्रोध-खदिर-काश्मर्य-उदुम्बर-मधूक-अर्जुन-प्लक्ष-बिभीतक-शाल्मलि-सार काष्ठान्यतमकाष्ठसम्भवं यूपं आपोहिष्ठा-३ अद्भिरभ्युक्ष्य ॐ ऊर्ध्व ऊषुण० इति मन्त्रेण गर्ते यूपं स्थिरीकृत्य सम्पूज्य वासोयुग्मेन संवेष्ट्य ॐ ऊर्ध्व ऊषुणं ऊतये तिष्ठां देवा न संविता । ऊर्ध्वो व्वाजस्य सनिता यदञ्जिभिर्वाघद्भिर्विह्वयांमहे ॥११-४२॥ इति मन्त्रेणाभिमन्त्रयेत् ।

प्रधानवेद्यां वारुणं मण्डलं विरच्य यथोक्तप्रकारेण देवतावाहनपूजने कृत्वा कलशे मण्डूकादिदेवता आवाह्य ॐ तत्त्वायामि० इति प्रधानं सौवर्णं वरुणमावाहयेत् । तत्र सौवर्णं कूर्मं, ताम्रमयं मकरं, राजतौ मत्स्यदुन्दुभौ, कुलीरमण्डूकौ ताम्रमयौ, जलूकाशिशुमारौ आयसौ, हंसादिशुक्ल जलचरान् राजतान्, चक्रवाकादीन् सौवर्णान्, कृष्णान् सीसमयान् पद्मानि मरकतपद्मरागादि निर्मितानि रौप्यं नागाष्टकमन्यज्जलचरजातं सर्वान् वा सौवर्णराजतान्यतरान् वंशपात्रे प्रक्षाल्य निधाय संपूज्य ताम्रपात्र्यां वेद्युपरि स्थापयेत् । तत्पार्श्वे फलोशीरघृतदुग्धसहदेवी काकजङ्घापञ्चरत्नगन्धोदक पङ्कजाद्योदकपञ्चगव्यकुशयुतं तीर्थोदककुम्भं स्थापयेत् । वापीकूपतडागानां प्रतिष्ठापने वापीकूपतडागानां मध्यवेद्यां वा चतुर्षु कोणेषु धान्यपुञ्जेषु तीर्थोदकरत्नगन्धमाल्यपञ्चपल्लवोपेतान् सवस्त्रान् चतुरः कलशान् स्थापयेत् ।

ततो ग्रहस्थापनं पूजनञ्च । योगिनीक्षेत्रपालपूजनं कृताकृतम् । आघाराज्यभागान्तेऽग्निपूजनम् ।

Scanned by CamScanner

त्यागसङ्कल्पः । ग्रहहोमः । होमकाले चतुर्वेदिनो द्वारपालाः शास्त्रार्थप्रकरणोक्तानि स्वस्ववेदसूक्तानि पठेयुः ।

प्रधानहोमः - आज्येन - १ ॐ त्वन्नो अग्ने व्वरुणस्य० स्मतस्वाहा-इदं वरुणाय० । २ सत्वन्नो अग्ने० एधि-स्वाहा-इदं वरुणाय० । ३ इमम्मे० चकेस्वाहा-इदं वरुणाय० । ४ तत्त्वायामि० । प्रमोपीः - स्वाहा-इदं वरुणाय० । ५ ये ते शतं० स्वर्काः - स्वाहा-इदं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यः मरुद्भ्यः स्वर्केभ्यश्च० । ६ अयाश्चाग्ने० भेषजꣳस्वाहा-इदमग्नये अयसे० । ७ उदुत्तमं० स्याम-स्वाहा-इदं वरुणायादित्यायादितये च नमम । ८ उरु ह हि राजा व्वरुणश्चकार सूर्य्याय पन्थामन्न्वे तवाऽउ । अपदे पादा प्रति धातवे करुतापवक्ता हृदया विधश्चित् । नमो व्वरुणायाभिष्ठितो वरुणस्य पाशं ÷ स्वाहा-इदं वरुणाय० ९ वरुणस्यो० सीदस्वाहा-इदं वरुणाय० । १० अग्नेरनीकमप आविवेशापां नपात् प्रतिरक्षन्नसुर्य्यम् । दमे दमे समिधं यक्ष्यग्ने प्रतिते जिह्वा घृतमुच्चरण्यत् स्वाहा ८-२४ । इदमग्नयेऽनीकवते० । इति दशाज्याहुतीर्हुत्वा । यवमयचरुहोमः - अभिधार्य स्रुवेणादाय - १ ॐ अग्नये स्वाहा-इदमग्नये० । २ ॐ सोमाय स्वाहा-इदं सोमाय० । ३ ॐ वरुणाय स्वाहा-इदं वरुणाय० । ४ ॐ यज्ञाय स्वाहा इदं यज्ञाय० ५ ॐ भीमाय स्वाहा-इदं भीमाय० । ६ ॐ उग्राय स्वाहा-इदमुग्राय० । ७ ॐ शतक्रतवे स्वाहा-इदं शतक्रतवे० । ८ ॐ व्युष्ट्यै स्वाहा-इदं व्युष्ट्यै० । ९ स्वर्गाय स्वाहा-इदं स्वर्गाय० ।

ततो वारुणीभिः ऋग्भिः शम्युदुम्बरान्यतरसमिद्भिः दधिमधुघृताक्ताभिः पञ्चकुण्ड्यां प्रतिकुण्डं ब्राह्मणद्वयमुपविश्य - १ ॐ इमम्मे वरुण० २ तत्त्वायामि० ३ त्वंनो अग्ने० ४ सत्वन्नो अग्ने० ५ उदुत्तमं० इति पञ्चभिर्मन्त्रैः प्रतिमन्त्रं द्वाविंशत्यावृत्त्या जुहुयात्-इति ११०० आहुतयः स्युः, विंशत्यावृत्त्या सहस्राहुतयः स्युः । एककुण्डसत्वे दश ब्राह्मणा उपविश्य प्रतिमन्त्रं विंशत्यावृत्त्या सहस्राहुतीः जुहुयुः ।

ततो वारुणमण्डलदेवतानां क्रमेण आज्येन लाजैश्च नाममन्त्रैरेकैकाहुतिः । अथवा तिलैर्दशदशाहुतीर्जुहुयात् । ततो वास्तुमण्डलदेवतानामेकैकाज्याहुतिं वा दशदशतिलाहुतीर्जुहुयात् । तिलैः ॐ अघोरेभ्यो० इति मन्त्रेण १०८ शान्तिहोमः । ततः उत्तरपूजनादि प्रणीता विमोकान्तं कुर्यात् । रात्रावधिवासनम् । रात्रौ जागरणादि कृत्वा प्रभाते द्वितीयेऽह्नि वक्ष्यमाणं कर्म कुर्यात् ।

सद्यः पक्षे तु शुभे लग्ने शुक्लवस्त्रं धृत्वा धृतोष्णीषः सोपस्करां जलपात्रीमादाय नदीतीर्थजलपूर्णं कलशं गृहीत्वा सयजमानो वेदमङ्गलघोषैर्जलाशयं गत्वा जलाशयमारामं देवतायतनं तडागं कूपं वा त्रिवृता सूत्रेण वाससा वा वेष्टयेत् । वापीकूपतडागसमीपे ध्वजमारोप्य ॐ तत्त्वायामि० इति वरुणमावाह्य सम्पूज्य प्रार्थयेत् । ॐ नमस्ते विश्वगुप्ताय नमो विष्णो ह्यपांपते । सान्निध्यं कुरु देवेश समुद्रे यद्वदत्र वै ॥ मित्रमित्रोऽसि भूतानां धनदो धनकाङ्क्षिणाम् । वैद्यो रोगाभिभूतानां शरणं शरणार्थिनाम्-इति ।

Scanned by CamScanner

ततो जलाशये कूपे तडागे वाप्यां वा नाभिमात्रजले स्थित्वा पुरुषप्रमाणे जले ततोऽधिके वा जवे जलपात्रीस्थितान् कूर्ममकरादीन् जले प्रवाहयेत् । ततो जले पूर्वादिक्रमेण नागानक्षतैरावाहयेत् - १ ॐ अनन्ताय नमः २ महापद्माय नमः ३ तक्षकाय नमः ४ कुलिकाय नमः ५ शेषाय नमः ६ वासुकये नमः ७ पद्माय नमः ८ कर्कोटकाय नमः । अनन्तादीन् गन्धपुष्पैः संपूज्य पञ्चब्राह्मणैर्दध्युदकादिकलशं नदीतीर्थकलशजलञ्च ॐ आपोहिष्ठा० ३ मन्त्रत्रयेण जले क्षिपेत् ।

यष्टिरोपणम् - ततः खादिरशालवंशादिजां दोषरहितां यष्टिं संस्नाप्य गन्धाक्षतपुष्पमालासौभाग्यद्रव्यैः सम्पूज्य 'मनोजूतिरिति प्रतिष्ठाप्य मङ्गलघोषपुरःसरं वाप्यास्तडागस्य मध्ये स्थिरां रोपयेत् - ॐ सिद्धस्तम्भो जटापविश्वाप्सु स्थिताय हुं फट् अनन्ताय नागाधिपतये नमः - इति मन्त्रेण । ॐ नमोऽस्तु सर्पेभ्यो० इति तामभिमन्त्र्य 'हुं फट्' इत्यभ्युक्ष्य पूजयेत् ।

ततो यजमानस्तडागस्य पुष्करिण्या वा दक्षिणत उदङ्मुखः कनकालङ्कृतसितवस्त्रवेष्टितां गां संपूज्य पुच्छमादायोत्तरति । छन्दोगः - सेतूँस्तर० इत्यादि साम गायति । तत उत्तीर्य सामगाय तां गां दत्त्वा सपरिवारो वारुणमन्त्रैर्जलेऽवगाह्य स्नायात् । वापीकूपयोर्गोरुत्तरणं नास्ति ।

ततस्तीरे प्राङ्मुख उदङ्मुखो वा यजमानो जलाशयोत्सर्गं कुर्यात्-जलमादाय-अद्य० पू० तिथौ मम सकुटुम्बस्य सकलकामनापुरुषार्थादिसिद्ध्ये समस्तपितॄणामुद्धारपूर्वकं ब्रह्मलोकनिवाससिद्ध्ये समस्तजीवानां स्नानपानावगाहनाद्यर्थं अक्षय्यतृप्तिहेतवे सूर्याचन्द्रमसौ-यावद् इमां वापी (पुष्करिर्णी, इमं तडागं, इमं कूपं) सर्वभूतेभ्यः अहमुत्सृज्ये नमम-इति सङ्कल्पजलं जलाशये क्षिपेद् । मत्स्यादिजलमातॄः संपूज्य मण्डपमागच्छेत् । ततो यथाशक्ति दक्षिणादानम् । दिनचतुष्टयमनिवारितमन्नदानम् । ब्राह्मणभोजनम् । तिलकाशीर्वादः । अग्निस्थापितदेवताविसर्जनम् कर्मब्रह्मार्पणम् । आचमनम् । प्राणायामः ।

इति वापीपुष्करिणीतडागकूपारामप्रतिष्ठाविधिः ।

## ८८ समाध्युत्सर्गः ।

(त्रिदण्डिनस्त्रैवर्णिकस्य द्विजस्य सन्यासिनो देहत्यागे तं देहं भूम्यादौ गर्ते पूरयित्वा प्रतापरुद्रीय तोरोपद्धत्युयुक्तविधिना नारायणबलिसमाराधनादि प्रयोगाद्यन्ते उक्ते काले तस्मिन् स्थले भक्तैः, पादुका, लिङ्गतुलसीवृन्दावन, एडकाद्यायतनान्यतमं प्रतिश्रयापर्यायं समाधिस्थानं क्रियते । प्रतिष्ठाहेमाद्रौ-येषां तडागादि शुभः प्रपाश्च आरामकूपाः प्रतिमाश्रयाश्च । अन्नप्रदानं मधुरा च वाणी तेषामयं वै परतश्च लोकः - इति वाक्ये प्रतिश्रयशब्देन संन्यासिनां महात्मनां समाधिस्थानं निर्दिष्टम् ।)

तत्र चतुर्थीषष्ठ्यष्टमीचतुर्दशीभिन्नतिथौ कृष्णपक्षे दशम्याः प्राग् गुरुशुक्रास्तादि वर्जयित्वा उत्तरायणे शुभमासे दक्षिणायने पौषाषाढभाद्रपदादि वर्जयेत् । तत्र समाधिस्थाने शिवलिङ्गमेकादश्यां दशम्यां द्वादश्यां

Scanned by CamScanner

वा विष्णोः गुरुपादुकाद्वयस्य पाषाणमयस्य उत्सर्गविधिं कुर्यात् । अयं प्रयोगः संन्यासिनः, नैष्ठिकब्रह्मचारिणां योगिनां महागुरूणाञ्च देहोत्सर्गमुद्दिस्य भूमिखाते जलनिक्षेपे दाहे वाऽपि देहत्यागभूमावन्यत्र वा समाधिस्थानं निर्माय सर्वव्यापकपुरुषरूपपरमात्मानमुद्दिश्य भवतीति विवेकः) ।

यजमानः - मम दश पूर्वान् दशापरान् माञ्च एकविंशतिपुरुषानुद्धर्तुं समस्तपूर्वजानां षष्टिसहस्रवर्षपर्यन्तं ब्रह्मलोके निवाससिद्ध्यर्थं श्री परमेश्वरप्रीत्यर्थं पाषाणादिबद्धगुरुपादुकाशिव-विष्णवन्यतम चिह्नितस्थानस्य सग्रहमखमुत्सर्गाख्यं कर्म करिष्ये । गणपतिपूजनम् । पुण्याहवाचनम् । मातृकापूजनम् नान्दीश्राद्धम् । ऋत्विग्वरणम् । दिग्रक्षणम् । पञ्चगव्यकरणम् । भूमिपूजनम् । वास्तुपीठे उपर्युक्त जलाशयोत्सर्गवत् एकविंशत्युत्तरशत १२१ पदात्मके द्वादशरेखात्मके वास्तुमण्डले मण्डलदेवतापूर्वकं कलशे वास्तुध्रुवमूर्त्योरावाहनं प्रतिष्ठां पूजनमेकतन्त्रेण पायसबलिदानञ्च कुर्यात् ।

ततः कुण्डे स्थण्डिले बा पञ्चभूसंस्कारान् कृत्वा बलवर्धननामानं वह्निं संस्थाप्य पूजयेत् । ततो यूपप्रतिष्ठा-अष्टास्रः यजमानमानः त्र्यरत्निमितो वा खादिरादिमयो यूपः कार्यः । प्रधानवेदीतः पूर्वे मण्डपपक्षे मण्डपाद्बहिः पूर्वे यूपार्थमवटं जानुमात्रं खात्वा तत्र प्रागग्रान् दर्भानास्तीर्य अद्भिरभ्युक्ष्य सलक्षणं यूपं तैलहरिद्राभ्यामभ्यज्य ॐ ये तीर्थानि० ॐ आपोहिष्ठा० ३ इतिमन्त्रैः संस्नाप्य गौरसर्षपगोरोचन गुग्गुलु दूर्वानिम्बपत्रगर्भां पोटलिकां ॐ यदाबध्नन्निितिमन्त्रेण बद्ध्वा ॐ युवासुवासा० इति वस्त्रेण वेष्टयेत् । ततो गर्ते हरिद्राकुङ्कुमदध्योदनाक्षतचन्दनदूर्वालाजाँश्च प्रक्षिप्य ॐ ध्रुवासि० इति मन्त्रेण गर्ते स्थिरीकृत्य प्रतिष्ठाप्य कुङ्कुमादिना संपूज्य गन्धपुष्पधूपदीपनैवेद्यदक्षिणादि दत्त्वा ॐ ऊर्ध्व ऊषुणं ऊतये तिष्ठां देवो न सविता । ऊर्ध्वो व्वाजस्य सनिंता यदञ्जिभिर्वाघद्भिर्विह्वयामहे ॥११-४२॥ इत्यभिमन्त्य नमस्कुर्यात् ।

वास्तुवेदेरुत्तरतः प्रधानवेद्यां वारुणमण्डलं सर्वतोभद्रं वा विरच्य वारुणमण्डले सूर्यादिदेवताः सर्वतोभद्रे ब्रह्मादिदेवता वाऽवाह्य पूजयेत् । एकतन्त्रेण मण्डलदेवतानां पायसबलिदानम् । मण्डलमध्ये कलशं संस्थाप्य पीठदेवता आवाह्य सुवर्णमूर्त्तिचतुष्टये - १ ॐ ब्रह्मजज्ञानं० ब्रह्मणे० ब्रह्माणं० २ इदं विष्णु० विष्णवे० विष्णुं० ३ श्रीश्चते० श्रियै० श्रियं० ४ आकृष्णेन० सूर्याय० सूर्यं० ततोऽष्टदिक्षु इन्द्रयष्टदिकूपालान् दश वा ॐ त्रातारमिन्द्र० इत्यादि मन्त्रैरावाह्य-ॐ भू० दिक्पालसहित ब्रह्मादि देवेभ्यो नमः इति पूजयेत् । प्रधानपीठादुत्तरे ग्रहवेद्यां ग्रहमण्डलदेवता ईशान्यां कलशे च वरुणं पूजयेत् ।

ततः संपातोदककलशं संस्थाप्य समाधिसमीपं गत्वा क्रमध्वमग्निना इत्यनुवाकेन पादुकयोः शिवलिङ्गे विष्णौ वा जलधारां पातयेत् -

ॐ क्रमध्वमग्निना नाकमुख्यं ह हस्तेषु बिभ्रतः । दिवस्पृष्ठहस्वर्गत्वा मिश्रा देवेभिराध्वम् ॥१७-६५॥ प्राचीमनु प्रदिशं प्रेहि व्विद्वानग्नेरग्ने पुरो अग्निर्भवेह । व्विश्वा आशा दीद्यानो व्विभाह्यूर्जं नो धेहि द्विपदे चतुष्पदे ॥१७-६६॥ पृथिव्या अहमुदन्तरिक्षमारुहमन्तरिक्षाद्दिवमारुहम् । दिवो नाकस्य

Scanned by CamScanner

पृष्ठात् स्वर्ज्योतिरगामहम् ॥१७-६७॥ स्वर्यन्तो नापेक्षन्त आद्याꣳरोहन्ति रोदसी । यज्ञं यो विश्वतोधार सुविद्वाꣳसो वितेनिरे ॥१७-६८॥ अग्ने प्रेहि प्रथमो देवयतां चक्षुर्देवानामुत मर्त्यानाम् । इयक्षमाणा भृगुभि÷ सजोषा ॑ स्वर्यन्तु यजमाना ॑ स्वस्ति ॥१७-६९॥ नक्तोषासा समनसा विरूपे धापयेते शिशुमेकं ॑ समीची । द्यावाक्षामा रुक्मो अन्तर्विभाति देवा अग्निं धारयन् द्रविणोदा ॑ ॥१७-७०॥ अग्ने सहस्राक्ष शतमूर्धञ्छतं ते प्राणा ॑ सहस्रं व्याना ॑ । त्व ॑ साहस्रस्य राय ईशिषे तस्मै ते विधेम वाजाय स्वाहा ॥१९-७१॥ सुपर्णोऽसि गरुत्मान् पृष्ठे पृथिव्या ॑ सीद । भासाऽन्त रिक्षमापृण ज्योतिषा दिवमुत्तभान तेजसा दिश उद्दृं ॑ ह ॥१७-७२॥ आजुह्वान ॑ सुप्रतीक ॑ पुरस्तादग्ने खं योनिमासीद साधुयां । अस्मिन्त्सधस्थे अध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत ॥१७-९३॥ ताꣳसवितुर्वरेण्यस्य चित्रामाऽहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो अदुहत् प्रपीना ꣳ सहस्रधाराँ पयसा महीं गाम् ॥१७-७४॥ विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे । यस्माद्योनेरुदारिथा यजे तं प्रत्वे हवीꣳषि जुहुरे समिद्धे ॥१७-७५॥ प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ । त्वा ꣳ शश्वन्तऽ उपयन्ति व्वाजा ॑ ॥१७-७६॥ अग्ने तमद्याश्वं न स्तोमै ॑ क्रतुं न भद्र ॑ हृदिस्पृशम् । ऋध्यामात ओहै ॑ ॥१७-७७॥ चित्तिं जुहोमि मनसा घृतेन यथा देवाऽइहागमन् वीतिहोत्रा ऋतावृध ÷ । पत्ये विश्वस्य भूमनो जुहोमि विश्वकर्मणे व्विश्वाहाऽदाभ्य ॑ हवि ॑ ॥१७-७८॥ सप्त ते अग्ने समिध ÷ सप्त जिह्वा ॑ सप्त ऋषयः सप्त धाम प्रियाणि । सप्त होत्रा ॑ सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा ॥१७-७९॥ एभिर्मन्त्रैर्जलैरभिषिच्य । तत ॐ अग्निर्मूर्ध्वा० इति द्वादशवारं मृज्जलाभ्यां संशोध्य । ॐ यज्ञायज्ञावो० इति कषायैः । ॐ प्रसद्य भस्मना० इति भस्मना । ॐ इदं विष्णु० इति हरिद्रयोद्वर्त्य । ॐ घृतं घृतपावानः० इति घृतेनाभ्यज्य । ॐ या ओषधीः० इति सर्वौषधीभिः । ॐ यदूवध्यमुदरस्यापवाति य आमस्य क्रविषो गन्धो अस्ति । सुकृता तच्छमितार ÷ कृण्वन्तूत मेध ॑ शृतपाकं पचन्तु ॥२५-३३॥ इति गन्धोदकेन । ॐ तत्सवितु० इति गोमूत्रेण । ॐ गन्धद्वारां० इति गोमयेन । ॐ आप्यायस्व० इति क्षीरेण ।·ॐ दधिक्राव्ण० इति दध्ना । ॐ तेजोऽसि० इति आज्येन । ॐ देवस्य त्वा० इति उद्वर्तनेनोद्वर्त्य । उष्णोदकेन प्रक्षाल्य । गन्धादिपूजां कृत्वा । प्रतिश्रयसमन्ततोऽष्टदिक्षु अष्टकलशेषु वरुणमावाह्य सम्पूज्य - ॐ आपोहिष्ठा० ३ अष्टकलशैरभिषिच्य मूलमन्त्रेण सम्पूज्य अष्टदीपान् प्रज्वाल्य मूलमन्त्रेण स्तुवीत । ततो होमं कुर्यात् ।

आज्यभागान्ते अग्निपूजनम् । वराहुतिः । त्यागसंकल्पः । समिच्चरुतिलाज्यैर्नवग्रहानष्टाष्टसंख्यया अधिदेवता प्रत्यधिदेवताश्चतुश्चतुः संख्यया, गणेशादीन् सप्त द्विसंख्यया, इन्द्रादि दिक्पालानेकैकसंख्यया होमं कुर्यात् । औदुम्बर समिच्चरु तिलाज्याहुतिभिः ॐ वास्तोष्पते० इति मन्त्रेण २८ आहुतयः प्रतिद्रव्यम् । ध्रुवासि० इति ८ संख्यया । प्रधानहोमः १ पालाशसमित् २ पायस ३ तिल ४ आज्याहुतिभिः १ ब्रह्मजज्ञानं० विवः स्वाहा । २ इदं विष्णु० सुरे स्वाहा । ३ श्रीश्चते० इषाण स्वाहा । ४ ॐ आकृष्णेन० पश्यन् स्वाहा-प्रतिमन्त्रं १०८-२८ वा ८ संख्यया । इन्द्रादि दिक्पालान् एकैकयाज्या-

हुत्या । पुरुषसूक्तेन प्रत्यृचमेकैकाज्याहुतिः । यद्देवा० यदि दिवा० यदिजाग्रद्० कूष्माण्डमन्त्रैः प्रतिमन्त्रमेकैकाज्याहुतिः । वास्तुदेवता एकैकयाज्याहुत्या । वारुणमण्डलदेवताः सर्वतोभद्रदेवता वा एकैकयाज्याहुत्या, दशदशतिलाहुतिभिर्वा । समस्तव्याहृतिभिः घृताक्ततिलैः १०८ आहुतयः । ३ आचारात् सर्षपगुग्गुलुलक्ष्मीहोमाः । अग्नेः स्थापितदेवतानाञ्च उत्तरपूजनम् । स्विष्टद्धोमः । बलिदानम् । प्रधानदेवताबलिदाने विशेषः । चरुतिलचूर्णसर्पिः सक्तु करम्भान् एकत्र मिश्रीकृत्य प्रधानदेवतापरितः प्रदक्षिणक्रमेण द्वादशबलीन् निधाय ॐ बलिद्रव्याय नमः । इति संपूज्य - १ ॐ ब्रह्मणे नमः बलिं समर्पयामि । २ विष्णमे० बलिं० । ३ श्रियै० बलिं । ४ सूर्याय० बलिं० । ५ इन्द्राय० बलिं० । ६ अग्नये० बलिं० । ७ यमाय० बलिं० । ८ निर्ऋतये० बलिं० । ९ वरुणाय० बलिं० । १० वायवे० बलिं० । ११ सोमाय० बलिं० । १२ ईशानाय० बलिं० । भो ब्रह्मादिदेवा० कुरुत । आयुः कर्तारः० वरदा भवत । अनेन बलि दानेन ब्रह्मादि देवाः प्रीयन्ताम् । ग्रहबलिदानम् । क्षेत्रपालबलिदानम् । पूर्णाहुतिः । वसोर्धारा । भस्म धारणम् । होमसङ्कल्पः । संस्रवप्राशनम् । पवित्राभ्यां मुखमार्जनम् । अग्नौ पवित्रप्रतिपत्तिः । ब्रह्मणे पूर्णपात्रदानम् । पश्चिमे प्रणीताविमोकः ।

ततः समाधिसमीपं गत्वा ॐ सहस्रशीर्षा० इति पुरुषसूक्तेन स्तुत्वा । सम्पातकलशोदकमष्टकलशोदकञ्च एकस्मिन् पात्रे कृत्वा तेनोदकेन ॐ आपोहिष्ठा० ३ हिरण्यगर्भः० ४ पुनन्तुमा० ९ समुद्राय त्वा व्वाताय स्वाहा-१ इदमापः प्रवहता ८ इति मन्त्रैः संस्नाप्य गुरुपादुकां शिवलिङ्गं विष्णुं वा स्थाने स्थिरी कृत्य प्राणप्रतिष्ठापूर्वकं षोडशोपचारैः संपूज्य - ॐ नमो भगवते वासुदेवाय इति मूलमन्त्रेण - पूजनम् । तत्र नैवेद्ये पुरुषाहारपर्याप्तं बह्वाज्यं शर्करोपेतं पायसं वा निवेदयेत् । ततो हिरण्यगर्भ इत्यष्टमन्त्रैः प्रार्थयेत् -

ॐ हिरण्यगर्भ ३ समवर्त्तताग्रे भूतस्य जात ३ पतिरेकऽआसीत् । सदाधार पृथिवी न्यामुतेमा ङ्कस्मै देवाय हविषा विधेम ॥२५-१०॥ २ य ३ प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव । य ईशे अस्य द्विपदश्चतुष्पद ६ कस्मै देवाय हविषा विधेम ॥२५-११॥ ३ यस्येमे हिमवन्तो महित्वा यस्य समुद्र ६ रसया सहाहु ३ । यस्येमा ३ प्रदिशो यस्य बाहू कस्मै देवाय हविषा व्विधेम ॥२५-१२॥ ४ य आत्मदा बलदा यस्य विश्वऽउपासते प्रशिषं यस्य देवा ३ । यस्यच्छायामृतं यस्य मृत्यु ३ कस्मै देवाय हविषा व्विधेम् ॥२५-१३॥ ५ येन द्यौरुग्रा पृथिवी च दृढा येन स्वस्तभितं येन नाक ꣳ । यऽअन्तरिक्षे रजसो विमान ३ कस्मै देवाय हविषा व्विधेम ॥३२-६॥ यं क्रन्दसी अवसा तस्तभाने अभ्यैक्षेतां मनसा रेजमाने । यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा व्विधेम ॥ आपो ह यद् बृहतीर्यश्चिदाप ꣳ ॥३२-७॥ ७ आपो ह यद् बृहतीर्विश्वमायन् गर्भं दधाना जनयन्तीरग्निम् । ततो देवानाꣳसमवर्त्ततासुरेक ६ कस्मै देवाय हविषा व्विधेम् ॥२७-२५॥ यश्चिदापो महिमा पर्यपश्यद् दक्षं दधाना जनयन्ती यज्ञम् । यो देवेष्वधि देव एक आसीत् कस्मै देवाय हविषा व्विधेम ॥२७-२६॥

Scanned by CamScanner

मूलमन्त्रेण षडङ्गन्यासं कृत्वा उदङ्मुख उपविश्य उत्सर्गसङ्कल्पं कुर्यात्-कुश यवजलान्यादाय अद्य पू० तिथौ मम सकुटुम्बस्य सकलकामनासिद्ध्यर्थं जन्मजन्मान्तरार्जिताविद्यामूल-अज्ञाननिवृत्तिपूर्वकं ज्ञानोदयसिद्धये (अमुकस्य यतेः गुरोः, महात्मनः) भगवच्चरण सायुज्यसिद्धये समस्तपूर्वजानामुद्धारपूर्वकं ब्रह्मलोकनिवासहेतवे इदं गुरुपादुका (शिवलिङ्ग विष्णु शालिग्राम सहितं समाधिस्थानं भक्तजनानां प्रदक्षिणार्थं पूजार्थं यावदाचन्द्रतारकं (प्रासादश्चेत्-सप्रासादं) सर्वेभ्यो भक्तेभ्यः भूतेभ्यश्च अहमुत्सृज्ये- इति सङ्कल्पजलं समाधिस्थाने गुरुपादुकयोः समर्प्य - नत्वा प्रार्थयेत् - स्वागतं देवदेवेश मद्भाग्यात्त्वमिहागतः । स्वारुदंस्त्वामदृष्ट्वा तु बालवद्भक्तिवत्सल ॥ धर्मार्थकामसिद्ध्यर्थं स्थिरो भव सुखाय नः । सान्निध्यं हि सदा देव स्वार्चायां परिकल्पय ॥ यावच्चन्द्रावनीसूर्यास्तिष्ठन्त्यप्रतिघातिनः । तावत्त्वयात्र देवेश स्थातव्यं सर्वदा प्रभो ॥ येन रूपेण भगवँस्त्वया व्याप्तं चराचरम् । तेन रूपेण देवेश स्वार्चायां सन्निधो भव ॥ त्वामेकमाद्यं पुरुषं पुरातनं नारायणं विश्वसृजं यजामहे । त्वमेव यज्ञो विहितो विधेयस्त्वमात्मनात्मन् प्रतिगृह्ण हव्यम् ॥ इति स्तुत्वा साष्टाङ्गं प्रणमेत् ।

श्रेयोदानम् । दानसंकल्पाः । सर्व कलशोदकेन सपरिवारस्य यजमानस्याभिषेकः । शुद्धोदकेन स्नात्वा शुक्लमाल्याम्बरधरः आचान्तः गोनिष्क्रयं वृषभ निष्क्रयं दक्षिणाभूयसी मण्डपदशमहादाननिष्क्र- यतिलपात्राज्यपात्रछायापात्रपीठदान ब्राह्मणभोजनादि कुर्यात् । अग्निस्थापितदेवताविसर्जनम् । तिलकाशीर्वादादि । कर्मब्रह्मार्पणम् । कर्मसमाप्तिः । आचमनम् । प्राणायामः ।

## ८९ चतुर्थीकर्म । प्रतिष्ठात्रिविक्रमोक्तम् ।

प्रतिष्ठादिनाच्चतुर्थे द्वितीये वा दिवसे कुर्यात् । साचार्यर्त्विग्यजमानः महास्नानसंभार वस्त्रालंकरणादिकमादाय पश्चिमद्वारेण मण्डपं प्रविश्य-तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । शान्तिपाठादि । संकल्पः - स्थापितदेवतानामर्चाशुद्ध्यर्थं देवकलाऽभिवृद्धये चतुर्थी कर्म करिष्ये । गणेशस्मरणम् । दिग्रक्षणम् । पञ्चगव्यकरणम् । भूमिपूजनम् । पञ्चभूसंस्कारपूर्वकं कुण्डे स्थण्डिले वाऽग्निस्थापनम् । चरुक्षपणम् । आघाराज्यभागान्ते चरुणा १ सद्योजातं २ अघोरेभ्यो० ३ वामदेवाय० ४ तत्पुरुषाय० ५ ईशानः० इति पञ्चब्रह्ममन्त्रैः १००८ वा १०८ संख्यया वा जुहुयात् । आज्येन तिलैर्वा देवपत्नीमन्त्रेण शतसंख्यया हुत्वा स्विष्टकृन्नवाहुति पूर्णाहुती जुहुयात् । ततः प्रणीता विमोकान्तम् । इति शिवस्य चतुर्थी कर्म ।

शिवभिन्नदेवतासत्त्वे चरुणा तत्तद्देवमन्त्रैः तत्तत्पत्नीमन्त्रैश्च १००८ वा १०८ संख्यया जुहुयात् । देवीप्रतिमायां प्रतिष्ठापितायां तु देवीनां निजमन्त्रेणैव होम इति विशेषः । प्रणीताविमोकान्तं कृत्वाशान्तिकलशोदकेन प्रतिमां ॐ आपोहिष्ठा० ३ मन्त्रैः सिक्त्वा निर्माल्यमपनीय देवं ध्यात्वा संपूज्य प्रासादस्नपनोक्तान् एकाशीति घटान् संसाध्य प्रासादस्नपनोक्तमन्त्रैर्देवं संस्नाप्य पूजानीराजनादिकं कुर्यात् । कर्मसमाप्तिः ।

Scanned by CamScanner

ततो देवं प्रार्थयेत्-भक्तानुग्रहहेत्वर्थं याहि तत्र सुरेश्वर। देशस्यास्य सुभिक्षाय नृपस्य विजयाय च-इति गन्धपुष्पमाला वस्त्रालङ्करणाद्यैः संपूज्य शिबिकायां देवं पिण्डिकादिकं च शकटे वाहने वा संस्थाप्य वेदघोषगीतनृत्यवाद्यादिपुरःसरं पूर्वनिश्चितं ग्रामं नीत्वा तद्ग्रामस्थजनैः संपूजितं नीराजितं च देवं सुरक्षिते स्थाने स्थापयेत्। निष्पन्ने नूतने प्रासादे मन्दिरे वा सिंहासने निर्दिष्टस्थले स्थापयेत्। अस्मिन् विधौ तत्त्वन्यासं परित्यज्य प्रतिष्ठाविहितं समग्रं कर्म कुर्यात् देवाऽनुज्ञाऽभावेऽपि म्लेच्छयवनाद्याक्रमणप्रतिमाभङ्गभये समुपस्थिते स्थानान्तरनयने न कश्चिद्दोषः।

इति प्रतिमापिण्डिकादीनां ग्रामान्तरनयनविधिः प्रतिष्ठात्रिविक्रम्यां बौधायनोक्तः।

## ९४ जीर्णोद्धारविधिः।

(वैखानसे समूर्तार्चाधिकरणेऽन्यग्रन्थेषु च प्रतिमानां शिरोललाट कर्णाक्षिनासिका चिबुक ग्रीवाबाहुबक्षः कटिपादजानूर्वादीना मुत्तमाङ्गानां कर्णाक्षिनासिका हस्तपादाङ्गुल्यादीनां मध्यमाङ्गानां जीर्णतायां भङ्गे वा जीर्णोद्धारो निर्दिष्टः। केशान्तहस्तपादाङ्गुलिनखाग्रायुधाग्रादीनां हीनाङ्गानां जीर्णत्वे भङ्गे वा लेपादिना संधानं सन्धानान्तरं प्रोक्षणविधिश्च प्रोक्तः। कुत्रचिद् भङ्गाभावेऽपि सशर्करपाषाणादि निर्मितानामतिजीर्णानां प्रतिमानां जीर्णोद्धारो निगदितः। अयं जीर्णोद्धारः स्वयंभू महापुरुषस्थापितानादिसिद्धलिङ्गप्रतिमानां न भवति। ईदृग्लिङ्गप्रतिमानां स्वस्थानाचलने स्थिरी कृत्य महाभिषेकं कुर्यादिति त्रिविक्रमः।)

तत्र जीर्णादिदोषदुष्टानां देवपिण्डिकावाहनप्रासादध्वजदण्डकलशादीनां जीर्णोद्धारं कुर्वाणो दशगुणं फलं लभते।

### जीर्णोद्धारप्रयोगः।

अयं जीर्णोद्धारः सुतिथिवारनक्षत्रयोगकरणचन्द्राद्यनुकूले मुहूर्त्ते कार्यः। सपत्नीको यजमानः प्राङ्मुख उपविश्य। तिलककरणम्। शिखाबन्धनम्। आचमनम्। प्राणायाम। पवित्र धारणम्। शान्तिपाठादि। संकल्पः - अद्य पू० तिथौ सकलजनपदश्रेयसे जीर्णायाः खण्तिायाः) अमुकदेवता प्रतिमायाः सपरिवारायाः ) (पिण्डिकायाः, ध्वजस्य, शिखरस्य) (सग्रहमखं) जीर्णोद्धारं करिष्ये। तदङ्गभूतं गणपतिपूजनं पुण्याहवाचन (मातृकापूजनं नान्दीश्राद्धं) च करिष्ये। आसनविध्यादि ब्राह्मण वरणान्तं कृत्वा। ॐ अघोरेभ्यो० इति मन्त्रं १०८ अष्टोत्तरशतं जपेत्। दिग्रक्षणम्। पञ्चगव्यकरणम्। भूमिपूजनम्। अग्नि स्थापनम्-वरदनामानमग्निं बलवर्धननामान वा संस्थाप्य पूजयेत्। ततः सर्वतो भद्रमण्डले ब्रह्मादिदेवतानां स्थापनं पूजनञ्च। मध्ये कलशं संस्थाप्य मूर्त्तौ प्रधानदेवमावाह्य पूजयेत्। (ग्रहमण्डल देवतास्थापन पूजने) ब्रह्मोपवेशनाद्याज्य भागान्तम्। अग्निपूजनम्। वराहुतिः। त्यागसंकल्पः। (ग्रहहोमः)।

Scanned by CamScanner

सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽअस्तु रुद्ररूपेभ्यः स्वाहा० इति मन्त्रेण १००८ अष्टोत्तर सहस्राहुतीर्जुहुयात् । ततः प्रधानहोमः प्रधानहोमः - घृताक्त सर्षपैः ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । - १ क्षीर २ आज्य ३ मधु ४ दूर्वा ५ औदुम्बरसमित् ६ पायस-इति षड्द्रव्यैः केवलेनाज्येन तिलैर्वा जीर्णदेवमन्त्रेण १००८ वा १०८ संख्यया होमं कुर्यात् । ततः सर्वशान्त्यर्थं तिलैः ॐ अघोरेभ्यो० स्वाहा-इति १०८ होमः । ब्रह्मादिमण्डलदेवता होमः । व्याहृति होमः । उत्तरपूजनम् । स्विष्टकृद् । नवाहुतयः । बलिदानम् । पूर्णाहुतिः । वसोर्धारा भस्मधारणम् । आहुति संकल्पः । संस्रवप्राशनादि प्रणीता विमोकान्तम् ।

ततो जीर्णदेवं प्रार्थयेत् । ॐ जीर्णभग्नमिदं चैव सर्वदोषावहं नृणाम् । अस्योद्धारे कृते शान्तिः शास्त्रेऽस्मिन् कथिता त्वया ॥ ॥ जीर्णोद्धारविधानञ्च नृपराष्ट्र सुखावहम् । अधितिष्ठाथ मां देव प्रोद्धरामि तवाज्ञया ॥२॥ ॐ इति प्रणवेन देवं संपूज्य जलमादाय-ॐ लिङ्ग (बिम्ब) रूपं समागत्य येनेदं समधिष्ठितम् । यायात् समाहितं स्थानं सन्त्यज्यैव शिवाज्ञया ॥३॥ अत्र स्थाने च या विद्या सर्वविद्येश्वरैर्युता । शिवेन सह संतिष्ठ-इति देवशिरसि जलं क्षिपेत् । अर्घदानम्-ॐ धामन्ते० इत्युत्तरार्घं दत्वा-सर्षपानादाय ॐ उत्तिष्ठ ब्रह्मणस्पते० इति मन्त्रेण देवं विसर्जयेत् । यजमानदक्षिणहस्ते-हेममयं सूत्रमयं वा कङ्कणं बध्नीयात्-ॐ अघोरेभ्यो० । हैमं लौहं वा खनित्रमादाय-ॐ व्यापकेश्वराय अस्त्राय फट्-इति मन्त्रेण अभिमन्त्र्य अप्रादक्षिण्य क्रमेण ईशानादितः खनित्वा पृथग्भूतं शिवादिकं हेमपाशयुक्तया रज्ज्वा ॐ व्यापकेश्वर शिखायै वषट्-इति मन्त्रेण बद्ध्वा आचार्य ऋत्विग्भिः सहोध्धरेत् । निर्माल्यं चण्डाय ईशान्यां वा प्रक्षिप्य प्रतिमां ॐ रथे तिष्ठन्० इति रथमारोप्य ॐ वामदेवाय नमो ज्येष्ठाय नमः - इति महाजले अगाधनद्यादिषु प्रक्षिपेत् । दारुजां घृतदिग्धां अघोरमन्त्रेण ग्रामाद् बहिरुत्तरतो दहेत् ।

मण्डपमागत्य देवं प्रार्थयेत्-ॐ भगवन् भूत भव्येश लोकनाथ जगत्पये । जीर्णलिङ्ग (बिम्ब) समुद्धारः कृतस्तवाज्ञया मया ॥१॥ अग्निना दारुजं दग्धं क्षिप्तं शेलादिक जले । प्रायश्चित्ताय देवेश अघोरास्त्रेण तर्पितम् ॥२॥ ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं यदि । तत्सर्वं पूर्णमेवास्तु त्वत्प्रसादान्महेश्वर ॥३॥ गोविप्रशिल्पिभूतानामाचार्यस्य च यज्वनः । शान्तिर्भवतु देवेश अच्छिद्रं जायतामिदम् ॥४॥ इति प्रार्थ्य । आचार्यादिभ्यो दक्षिणादानम् । अभिषेकः । अग्निदेवताविसर्जनम् । आशीर्वादः । कर्मसमाप्तिः । अनेन जीर्णोध्धारकर्मणा ग्रामदेशनृपशिल्पिमनुष्यादीनां सकलोपद्रवशमनमस्तु ॥ अनेन जीर्णोध्धारकर्मणा भगवान् परमेश्वरः प्रीयताम् ।

(अत्र विशेषः - यदा प्रतिष्ठया साकं जीर्णोध्धारः क्रियते, तदा प्रधानसङ्कल्पे तादृश मूहं कृत्वाऽचार्यवरणान्ते मण्डपाद् बहिः सङ्कल्पं कृत्वा गणेशं स्मृत्वादिग्रक्षण पञ्चगव्यकरणभूमि-पूजनाग्निस्थापन सर्वतोभद्रमण्डलदेवता प्रधानदेवता स्थापन पूजनादि समाप्तिं यावद् उपर्युक्तविधिना जीर्णोध्धारकर्म स्वयं ब्राह्मणद्वारा वा सम्पादयेत् । नात्र ग्रहस्थापनग्रहहोमौ ।

॥ इति प्रतिष्ठावासुदेव्युक्तो निर्णयसिन्ध्वनुसारी जीर्णोद्धारविधिः ॥

## ९८ चालनविधिः ।

जीर्णादि दोष दुष्टानां पिण्डिका प्रतिमाध्वजादीनां जीर्णोद्धारविधिना विसर्जनं कार्यम् । अखण्डितानां दोषरहितानां प्रतिमादीनां तु प्रासादगर्भगृहादि संस्कारे क्रियमाणे नूतनप्रासादे प्रतिष्ठापयितुं चालनविधिः कर्तव्यः । पिण्डिकायाः प्रतिमायाश्च गुरुत्वाच्चालनासम्भवे केवलं प्रासाद संस्कारे चिकीर्षिते न चालनविधिः, किन्त्वर्चाशुद्धिं कुर्यात् । जीर्णोद्धार शब्देन संस्कारो विसर्जनश्चेति पदार्थद्वयमभिप्रेतम् । जीर्णप्रासादसंस्कारे चिकीर्षिते प्रासादतत्त्वैः प्रतितत्त्वं दशदशतिलाहुतीः केवलामेकैकामाज्याहुतिं वा दत्त्वा प्रासादतत्त्वानां खड्गेन्यासं कृत्वा निष्पन्ने प्रासादे खड्गाद् तत्त्वानि । प्रासादाधिवासनवेलायां प्रतिन्यस्येत् । पिण्डिकाचालने पिण्डिका पञ्चाङ्गानि मूर्तिमूर्त्तिपति लोकपालान् आत्मतत्त्वादिषट्तत्त्वानि प्रतितत्त्वं दशदशतिलाहुतीः केवलामेकैकामाज्याहुतिं वा हुत्वा खड्गे तत्त्वानांन्यासः प्रतिमायास्तु चालने अकारादिसर्वतत्त्वानां प्रतितत्त्वं दशदशतिलाहुतीरेकैकामाज्याहुतिं वा हुत्वा, एतावदशक्तौ ॐ पराय विष्ण्वात्मने शिवात्मने-शक्त्यात्मने० इत्यादि स्वाहा इति मन्त्रेणाष्टोत्तरं शतं हुत्वा देवं स्पृष्ट्वा जलपात्र्यामकारादितत्त्वान्यवधारयेत् । खड्गं पात्रञ्च चालित देवनिकटे स्थापयेत् । प्रासादाधिवासने प्रासादतत्त्वानि खड्गात् प्रासादे प्रतिन्यस्येत् । स्थापिते देवे तत्त्वन्यास जलात् तत्त्वानि देवे प्रतिन्यस्येत् अथवा पात्रजलं शिरसि देवमन्त्रेण निषिञ्चेत् ।

'शतेन स्थापयेद् देवं सहस्रेण विचालयेत्' इति वचनबलेन चालनविधावपि अघोरमन्त्रेण सर्षपैः सहस्रहोमः देवताहोमश्चावश्यकः । प्रासादतत्त्वानां पिण्डिकातत्त्वानां प्रतिमादेवतातत्त्वानाञ्च दशदशतिलाहुतिपूर्वकं केवलाज्याहुतिपूर्वकं वा खड्गे पात्रस्थजलेचावतारणं प्रतिष्ठानन्तरं खड्गात् पात्री जलाच्च तत्र तत्र प्रतिनिधानमावश्यकं बोध्यम् ।

### प्रासादपिण्डिकाप्रतिमाचालनप्रयोगः ।

सपत्नीको यजमानः प्राङ्मुख उपविश्य । तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । पवित्रधारणम् । शान्तिपाठादि । सङ्कल्पः - अद्य पू० तिथौ सकलजनपदकल्याणाय जीर्णोद्धारोक्तफल-प्राप्तये नूतनं प्रासादं निर्माय तत्र पुनः प्रतिष्ठां कर्तुं प्रासादतत्त्वानां (अखण्डितपिण्डिकायाः, अखण्डितप्रतिमायाः) श्री परमेश्वरप्रीत्यर्थं (सग्रहमखं) चालनविधिमहं करिष्ये । तदङ्गभूतं आसनविध्यादि-पूर्वकं गणपतिपूजनं स्वस्तिपुण्याहवाचनं (मातृकापूजनं वसोर्धारा पूजनमायुष्यमन्त्रजपं नान्दीश्राद्धं) ऋत्विग्वरणं दिग्रक्षणं पञ्चगव्यकरणं भूमिपूजनमग्निस्थापनं सर्वतोभद्रमण्डलदेवतास्थापनं प्रधानदेवता-वास्तुस्थापनं (ग्रहस्थापनं) विहितं हवनतत्त्वोद्धारचालनादि कर्म च करिष्ये । आसनविध्यादिनान्दी-श्राद्धान्तम् । ऋत्विग्वरणम् । दिग्रक्षणम् । पञ्चगव्यकरणम् । भूमिपूजनम् । वलवर्धननामाग्निस्थापनम् । सर्वतो भद्रमण्डलदेवता - स्थापनम् । कलशे प्रधानदेवतावास्तुपुरुषस्थापनम् । (ग्रहस्थापनम्) ।

Scanned by CamScanner

ब्रह्मोपवेशनाद्याज्यभागान्तम्। अग्निपूजनम्। वराहुतिः। त्यागसङ्कल्पः। (ग्रहहोमः)। ततस्तिलैः सर्षपैर्वा ॐ अघोरेभ्यो० स्वाहा- इति १००८ संख्यया जुहुयात्। ततः १ क्षीर २ आज्य ३ दधि ४ दूर्वा ५ औदुम्बरसमित् ६ पायस - इति षड्भिर्द्रव्यैः केवलैस्तिलैर्वा (प्रासादे-ॐ सहस्रशीर्षा० गुलं स्वाहा, पिण्डिकायां-गौरीर्मिमाय० (आयङ्गौः० स्वः स्वाहा, अम्बे अम्बिके० श्रीश्चते० प्रतिमायां तत्तद्देवमन्त्रेण) १००८ वा १०८ संख्यया जुहुयात्। प्रासादजीर्णोद्धारेपृथिव्यादितत्त्वैर्दशदशतिलाहुतयः केवलाज्याहुतिर्वा। पिण्डिकाचालने - यं थं मं फट् लक्ष्म्यै (गौर्यै) हृदयाय० शिरसे० शिखायै० कवचाय० अस्त्राय० (५) मूर्तिमूर्त्तिपतिलोकपालानां (२४) आत्मतत्त्वादि षट्तत्त्वानां दशदशतिलाहुतीः केवलाज्याहुतिं वा जुहुयात्। प्रतिमादिचालने-आकाशादिसर्वतत्त्वानां दशदशतिलाहुतीः केवलामाज्याहुतिं वा जुहुयात्। एतावदशक्तौ ॐ पराय शिवात्मने (विष्ण्वात्मने-शक्त्यात्मने-गणेशात्मने-) स्वाहा- इति तिलैः १०८ संख्यया जुहुयात्। वास्तोः सर्वतोभद्रमण्डलदेवतानामेकैकाज्याहुतिः दशदश वा तिलाहुतयः। व्याहृतिहोमः। उत्तरपूजनादिप्रणीताविमोकान्तं कुर्यात्।

ततः प्रासादगर्भगृहे पिण्डिकासमीपे भूमौ खड्गं छुरिकां वा निधाय अक्षतैर्भूमिं स्पृष्ट्वा प्रतितत्त्वं खड्गे छुरिकायां अक्षतनिक्षेपेण प्रासादतत्त्वोद्धारं कुर्यात्-

१ ॐ पृथिवीतत्त्वं खड्गेन्यसामि। २ श्रीकण्ठं० ३ अपः० ४ जलेशं० ५ तेज० ६ त्विषांनिधिं० ७ वायुं० ८ मातरिश्वानं० ९ आकाशं० १० सूक्ष्मं० ११ रूपतन्मात्रात्मानं० १२ भानुमन्तं० १३ रसतन्मात्रात्मानं० १४ जलदं० १५ गन्धतन्मात्रात्मानं० १७ स्पर्शतन्मात्रात्मानं० १८ बलवत्तरं० १९ शब्दतन्मात्रात्मानं० २० सूक्ष्मनादं० २१ वाक्तत्त्वं० २२ दुन्दुभिं० २३ पाणितत्त्वं० २४ समानं० २५ पादतत्त्वं० २६ चक्रं० २७ पायुतत्त्वं० २८ कर्णभुजं० २९ उपस्थतत्त्वं० ३० घनानन्दं० ३१ रसतत्त्वं० ३८ महावक्त्रं० ३९ घ्राणतत्त्वं० ४० विलुण्ठकं० ४१ मनस्तत्त्वं० ४२ संकल्पं० ४३ बुद्धितत्त्वं० ४४ बुद्धिं० ४५ अहंकारतत्त्वं० ४६ अहंकृतिं० ४७ चित्ततत्त्वं० ४८ मन० ४९ प्रकृतितत्त्वं० ५० पितामहं० ५१ पुरुषतत्त्वं० ५२ विष्णुं० ५३ सदाशिवतत्त्वं० ५४ अजेशं० ५५ कालतत्त्वं० ५६ क्रतुध्वजं० ५७ विद्यातत्त्वं० ५८ विष्णुं० (वैष्णवे-५९ कलशस्थचक्राद्यायुधानि शैवे-शूलाद्यायुधानि० गणपतौ० अङ्कुशाद्यायुधानि० सूर्ये-शङ्खचक्राद्यायुधानि० देव्याम्-गदाखड्गाद्यायुधानि०) ६० सत्त्वं० ६१ रजः० ६२ तमः० ६३ वह्निमण्डलं० ६४ सूर्यमण्डलं० ६५ सोममण्डलं खड्गे न्यसामि-इति तत्वोद्धारं कृत्वा संपूज्य चिह्नितं कृत्वा पुनः प्रतिष्ठां यावत् खड्गं देवनिकटे स्थापयेत्-प्रासादप्रतिष्ठायां जातायां पुनरेतानि तत्त्वानि-प्रासादे पुनर्न्यसामि-इत्युक्त्वा खड्गात् अक्षतैः प्रासादे न्यसेत्। इति प्रासादचालनम्।

पिण्डिकाचालनविधिः - पिण्डिकासमीपे खड्गं छुरिकां वा 'पिण्डिका' इति चिह्नितां निधाय अक्षतैः पिण्डिकां स्पृष्ट्वा ततत्त्वं खड्गे छुरिकायां वा न्यसेत्-ॐ यं थं भं फट्लक्ष्म्यै (गौर्यै) हृदयाय नमः हृदयं छुरिकायां न्यसामि। २ यं० शिरसेनमः शिरः०। ३ यं० शिखायै नमः शिखां०। ४ यं०

Scanned by CamScanner

कवचाय नमः कवचं० । ५ यं० अस्त्राय नमः अस्त्रं० । ६ पृथिवी मूर्तिं० ७ शिवं० ८ इन्द्रं० ९ अग्निमूर्त्तिं० १० पशुपतिं० ११ अग्निं० १२ यजमानमूर्त्तिं० १३ उग्रं० १४ यमं० १५ अर्कमूर्तिं० १६ रुद्रं० १७ निर्ऋतिं० १८ जलमूर्त्तिं० १९ भवं० २० वरुणं० २१ वायुमूर्तिं० २२ ईशानं० २३ वायुं० २४ सोममूर्त्तिं० २५ महादेवं० २६ सोमं० २७ आकाशमूर्तिं० २८ भीमं० २९ ईशानं० ३० आत्मतत्त्वं० ३१ क्रियाशक्तिं० ३२ शिवतत्त्वं० ३३ इच्छाशक्तिं० ३४ विद्यातत्त्वं० ३५ आधारशक्तिं० सर्वतत्त्वसहितां पिण्डिकां ॐ श्रीश्चते० (गौरीर्मिमाय० अम्बे अम्बिके० आयङ्गौः०) इतिमन्त्रं पठन् छुरिकायां न्यसामि । एवं पिण्डिकातत्त्वानां चालनं कृत्वा छुरिकां देवसमीपे पुनः प्रतिष्ठां यावत् सुरक्षेत् । पुनः प्रतिष्ठाकाले- १ यं थं भं तः ३५ आधारशक्त्यन्तानि पुनः पिण्डिकायां न्यसामि-इति वदन् छुरिकामक्षतैः स्पृष्ट्वा पिण्डिकायामक्षतान् क्षिपेत् । इति पिण्डिकाचालनम् । पद्मनाभादिषु ॐ नमो व्यापिनि स्थिरे अचले ध्रुवे श्रीं लं स्वाहा- इति पिण्डिकामन्त्र उक्तः ।

प्रतिमातत्त्वचालनम्-यावतीनां प्रतिमानां चालनं चिकीर्षितं तावन्ति जलपात्राणि तत्तत्प्रतिमानामभिश्चिह्नितानि तत्तद्देवतासमीपे निधाय तावतो ब्राह्मणानुपवेश्य तत्तत्तत्त्वं स्मरन् जलपूरितात् पात्रान्तराज्जलमादाय प्रतिमां स्पृष्ट्वा चिह्नितपात्रे जलं क्षिपेत्-सर्वत्र न्यासतत्त्वचालने 'जले न्यसामि' इति वदेत् ।

१ अकारं०
२ उकारं०
३ मकारं०
४ भूः०
५ भुवः०
६ स्वः०
७ अकारं०
८ आकारं०
९ इकारं०
१० ईकारं०
११ उकारं०
१२ ऊकारं०
१३ ऋकारं०
१४ ॠकारं०
१५ ऌकारं०
१६ ॡकारं०
१७ एकारं०
१८ ऐकारं०
१९ ओकारं०
२० औकारं०
२१ अंकारं०
२२ अःकारं०
२३ यकारं०
२४ रकारं०
२५ लकारं०
२६ वकारं०
२७ शकारं०
२८ षकारं०
२९ सकारं०
३० हकारं०
३१ ळकारं०
३२ क्षकारं०
३३ पकारं०
३४ फकारं०
३५ बकारं०
३६ भकारं०
३७ मकारं
३८ तकारं०
३९ थकारं०
४० दकारं०
४१ धकारं०
४२ नकारं०
४३ टकारं०
४४ ठकारं०
४५ डकारं
४६ ढकारं
४७ णकारं०
४८ चकारं०
४९ छकारम्०
५० जकारम्०
५१ झकारम्०
५२ ञकारम्०
५३ ककारम्०
५४ खकारम्०
५५ गकारम्०
५६ घकारम्०
५७ ङकारम्०
५८ रविचन्द्रौ०
५९ भौमं०
६० बुधं०
६१ बृहस्पतिं०
६२ शुक्रं०
६३ शनैश्चरम्०
६४ राहुं०

Scanned by CamScanner

६५ केतुं०
६६ रोहिणीः०
६७ मृगशिरः०
६८ आर्द्रां०
६९ पुनर्वसू०
७० पुष्यं०
७१ आश्लेषाः०
७२ मघाः०
७३ पूर्वाफाल्गुनीः०
७४ उत्तराफाल्गुनीः०
७५ हस्तं०
७६ चित्रां०
७७ स्वातीं०
७८ विशाखे०
७९ अनुराधान्०
८० ज्येष्ठाः०
८१ मूलं०
८२ पूर्वाषाढाः०
८३ उत्तराषाढाः०
८४ श्रवणधनिष्ठाः०
८५ शततारकाः०
८६ पूर्वाभाद्रपदाः०
८७ उत्तराभाद्रपदाः०
८८ रेवतीं०
८९ अश्विन्यौ०
९० भरणीः
९१ कृत्तिकाः
९२ ध्रुवं०
९३ सप्तर्षीन्०
९४ मातृमण्डलं
९५ विष्णुपदानि०

९६ नागवीथिं०
९७ अङ्गवीथिं०
९८ ताराः०
९९ अगस्त्यं०
१०० चैत्रं०
१०१ वैशाखं०
१०२ ज्येष्ठं०
१०३ आषाढं०
१०४ श्रावणं०
१०५ भाद्रपदं०
१०६ आश्विनं०
१०७ कार्त्तिकं०
१०८ मार्गशीर्षं०
१०९ पौषं०
११० माघं०
१११ फाल्गुनं०
११२ संवत्सरं०
११३ परिवत्सरं०
११४ इद्वत्सरं०
११५ अनुवत्सरं०
११६ पर्वाणि०
११७ ऋतून्०
११८ अहोरात्रान्०
११९ क्षणं०
१२० लवं०
१२१ काष्ठां०
१२२ कृतयुगं०
१२३ त्रेतायुगं०
१२४ द्वापरयुगं०
१२५ कलियुगं०
१२६ चतुर्दशमन्वन्तराणि

१२७ परं०
१२८ परार्धं०
१२९ महाकल्पं०
१३० उदगयनं०
१३१ दक्षिणायनं०
१३२ विषुवन्ति०
१३३ ब्राह्मणं०
१३४ क्षत्रियं०
१३५ वैश्यं०
१३६ शूद्रं०
१३७ सङ्करजान्०
१३८ अनुलोमजान्०
१३९ गाः०
१४० अजाः०
१४१ अविकाः०
१४२ ग्राम्यपशून्०
१४३ आरण्यपशून्०
१४४ मेघान्०
१४५ अभ्राणि०
१४६ नदीः०
१४७ समुद्रान्०
१४८ ऋग्वेदं०
१४९ यजुर्वेदं०
१५० सामवेदं०
१५१ सर्वोपनिषदः०
१५२ इतिहासपुराणानि०
१५३ अथर्वाङ्गिरसानि०
१५४ कल्पसूत्राणि०
१५५ व्याकरणानि०
१५६ तर्कान्०
१५७ मीमांसाम्०

१५८ निरुक्तं०
१५९ छन्दःशास्त्राणि०
१६० ज्योतिःशास्त्राणि
१६१ गीताशास्त्राणि०
१६२ भूतशास्त्राणि०
१६३ आयुर्वेदं०
१६४ धनुर्वेदं०
१६५ योगशास्त्राणि०
१६६ नीतिशास्त्राणि०
१६७ वश्यतन्त्रं०
१६८ दिवं०
१६९ सूर्यलोकं०
१७० चन्द्रलोकं०
१७१ वायुलोकं०
१७२ समुद्रान्०
१७३ पृथिवीं०
१७४ हिरण्यगर्भं०
१७५ कृष्णं
१७६ रुद्रं०
१७७ यमं०
१७८ अश्विनौ०
१७९ वैश्वानरं०
१८० मरुतः०
१८१ वसून्०
१८२ रुद्रान्०
१८३ आदित्यान्०
१८४ सरस्वतीं०
१८५ इन्द्रं०
१८६ बलिं०
१८७ प्रह्लादं
१८८ विश्वकर्माणं०

Scanned by CamScanner

१८९ नारदं०
१९० अनन्तादीन्०
१९१ वरुणं०
१९२ मित्रं०
१९३ विश्वान्देवान्०
१९४ पितॄन्०
१९५ यक्षान्०
१९६ राक्षसान्०
१९७ पिशाचान्०
१९८ असुरान्०
१९९ विद्याधरान्०
२०० ग्रहान्०
२०१ गुह्यकान्०
२०२ पूतनादीः०
२०३ गन्धर्वान्०
२०४ कार्तिकेयं०
२०५ गणेशं०
२०६ मत्स्यं०
२०७ कूर्मं०
२०८ वराहं०
२०९ नृसिंहं०
२१० वामनं०
२११ परशुरामं०
२१२ रामं०
२१३ कृष्णं०
२१४ बुद्धं०
२१५ कल्किं०
२१६ केशवं०
२१७ नारायणं०
२१८ माधवं०
२१९ गोविन्दं०
२२० विष्णुं०
२२१ मधुसूदनं०
२२२ त्रिविक्रमं०
२२३ वामनं
२२४ श्रीधरं०
२२५ हृषीकेशं०
२२६ पद्मनाभं०
२२७ दामोदरं
२२८ अश्वमेधं०
२२९ नरमेधं०
२३० राजसूयं०
२३१ गोसवं०
२३२ द्वादशाहं०
२३३ अहीनान्
२३४ सर्वजितः०
२३५ सर्वमेधं०
२३६ अग्निष्टोमं०
२३७ अतिरात्रं०
२३८ आप्तोर्यामं०
२३९ षोडशिनं०
२४० उक्थ्यं०
२४१ वाजपेयं०
२४२ अत्यग्निष्टोमं०
२४३ चातुर्मास्यं०
२४४ सौत्रामणिं०
२४५ पशिवष्टीः
२४६ दर्शपूर्णमासौ०
२४७ सर्वेष्टीः०
२४८ स्वाहाकारं०
२४९ वषट्कारं०
२५० पञ्चमहायज्ञान्०
२५१ आहवनीयं०
२५२ दक्षिणाग्निं०
२५३ गार्हपत्यं०
२५४ वेदीं०
२५६ सवनानि०
२५७ इध्मान्०
२५८ दर्भान्०
२५९ धर्मं०
२६० ज्ञानं०
२६१ वैराग्यं०
२६२ ऐश्वर्यं० वैष्णवे
२६३ खड्गं०
२६४ शार्ङ्गं०
२६५ मुसलं०
२६६ हलं०
२६७ चक्रं०
२६८ शङ्खं०
२६९ गदां०
२७० पद्मं०
शैवे
वज्रं०
शक्तिं०
दण्डं०
खड्गं०
पाशं०
अङ्कुशं०
त्रिशूलं०
ध्वजं०
चक्रं०
पद्मं०
अन्यदेवतासु
तत्तदायुधानि
२७१ लक्ष्मीं०
२७२ सरस्वतीं०
२७३ रतिं०
२७४ प्रीतिं०
२७५ कीर्तिं०
२७६ शान्तिं०
२७७ तुष्टिं०
२७८ पुष्टिं०
२७९ अग्निमीळे०
२८० इषेत्वोर्ज्जेत्वा०
२८१ अग्नआयाहि०
२८२ शन्नोदेवी०
२८३ एकाचमे०
२८४ स्वस्तिन इन्द्रो०
२८५ दीर्घायुस्त०
२८६ विश्वतश्चक्षु०
२८७ त्रातारमिन्द्र०
२८८ त्र्यम्बकंयजामहे०
२८९ मूर्धानं दिवो०
विष्णोः
२९० हृदयं०
२९१ शिरः०
२९२ शिखां०
२९३ कवचं०
२९४ नेत्रत्रयं०
२९५ अस्त्रं०
२९६ नकारं०
२९७ मोकारं०
२९८ भगवतेकारं०
२९९ वासुदेवायकारं०।

| | | | |
|---|---|---|---|
| ३०० नमो भगवते० | ३०५ मोकारं० | ३१० वाकारं० | रुद्रस्य |
| ३०१ श्रीवत्सं० | ३०६ भकारं० | ३११ सुकारं० | १ हृदयं० ४ कवचं० |
| ३०२ कौस्तुभं० | ३०७ गकारं० | ३१२ देकारं० | २ शिरः० ५ नेत्रत्रयं० |
| ३०३ वनमालां० | ३०८ वकारं० | ३१३ वाकारं० | ३ शिखां०६ अस्त्रं० |
| ३०४ नकारं० | ३०९ तेकारं० | ३१४ यकारं० | |

| | | | |
|---|---|---|---|
| नकारं० | क्लीं० | सर्वसाधारणः विष्णोश्च | यज्ञेन यज्ञं० |
| मोकारं० | चामुण्डायै० | सहस्रशीर्षा, | अद्भ्यःसम्भृतः० |
| भगवते० | विच्चे० | पुरुष एवेद० | वेदाहमेतं० |
| रुद्राय० | ऐं ह्रीं क्लीं चामुण्डायै | एतावानस्य० | प्रजापतिश्चरति० |
| नकारं० | विच्चे० | त्रिपादूर्ध्व० | यो देवेभ्यः |
| मोकारं० | रामस्य | ततो व्विराड० | रुचं ब्राह्मं० |
| भकारं० | ॐ नमो भगवते राम | तस्माद्यज्ञात्० | श्रीश्चते० |
| गकारं० | भद्राय इति प्रत्यक्षरम् | तस्माद्यज्ञात् सर्वहुत ऋचः | रुद्रस्य |
| वकारं | दत्तात्रेयाय नमः | तस्मादश्वा० | ॐ नमस्ते रुद्र० १६ |
| तेकारं० | ॐ द्रां ह्रीं क्लीं | तंयज्ञं बर्हिषिप्रौक्षं० | देव्याः |
| रुकारं० | दत्तात्रेयाय नमः० | यत्पुरुषं० | ॐ हिरण्य वर्णां० १५ |
| द्राकारं० | गणेशस्य | ब्राह्मणोऽस्य० | |
| यकारं० | ॐ एकदन्ताय० | चन्द्रमा० | |
| देव्याः० | अन्य देवतासु तत्तन्मन्त्रा | नाभ्या आसीद० | |
| ऐं० | क्षराणां गायत्र्या) | यत्पुरुषेण० | |
| ह्रीं० | सूक्तस्य वा न्यासः । | सप्तास्या० | |

एतावन्न्यासतत्त्वानां चालनासंभवे-१ ॐ पुरुषात्मानं० २ प्राणात्मानं० ३ प्रकृतितत्त्वात्मानं० ४ अहंकारतत्त्वं० ५ मनस्तत्त्वं० ६ प्रकृतितत्त्वं० ७ बुद्धितत्त्वं० ८ हृदयं० ९ शब्दतत्त्वं० १० स्पर्शतत्त्वं० ११ रूपतत्त्वं० १२ रसतत्त्वं० १३ गन्धतत्त्वं० १४ श्रोत्रतत्त्वं० १५ त्वक्तत्त्वं० १६ चक्षुस्तत्त्वं० १७ जिह्वातत्त्वं० १८ प्राणतत्त्वं० १९ वाक्तत्त्वं० २० पाणितत्त्वं० २१ पादतत्त्वं० २२ उपस्थतत्त्वं० २३ पृथिवीतत्त्वं० २४ अप्तत्त्वं० २५ तेजस्तत्त्वं० २६ वायुतत्त्वं० २७ आकाशतत्त्वं० २८ सत्त्वं० २९ रजः० ३० तमः० ३१ देहतत्त्वं० समस्तेन्द्रियसंयुक्तं सूक्ष्मदेहान्वितं मूलसंज्ञकं जीवं न्यसामि-इत्युक्त्वा पात्रे जलं क्षिपेत् । प्रतिमायां स्वस्थाने पुनः प्रतिष्ठितायांन्यासावसरे वा तस्माज्जलपात्राजलमादाय ॐ पात्रस्थमकरं देवे पुनर्न्यसामि-इत्येवं क्रमेण सर्वतत्त्वानि देवे जलं क्षिपन् न्यसेत् । शेषजलं देवशिरसि पादयोर्वा निषिञ्चेत् । ततो महापूजां कुर्यात् ।

Scanned by CamScanner

हस्ते फलगन्धपुष्पाक्षतादियुतमर्घं गृहीत्वा - ॐ त्वत्प्रसादेन निर्विघ्नं गेहं निर्मापयत्यसौ । वासं कुरु सुरश्रेष्ठ तावत्त्वं चाल्पके गृहे ॥१॥ वस क्लेशं सहित्वैव मूर्त्तिं वा तव पूर्ववत् । यावत् कारयते भक्तः कुरु तस्य च वाञ्छितम् ॥२॥ इति देवायार्घं दत्त्वा प्रणमेत् ।

ततः शिल्पिनं कुद्दालकादिशस्त्रेषु च ॐ विश्वकर्मन् हविषा व्वर्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् । तस्मै विशः समनमन्त पूर्व्वीरयमुग्रो व्विहव्यो यथासत् ॥ विश्वकर्मणे नमः - इति गन्धादिभिः संपूज्य शस्त्रेण पिण्डिकां प्रतिमाञ्च खनित्वा देवमुद्धृत्य रथादौ निवेश्य मङ्गलवाद्यघोषेण पूर्वकल्पितं मन्दिरं नीत्वा यथास्थानावस्थितपीठादौ देवं स्थापयित्वा तत्त्वन्यासजलपात्रं देवशिरसि देवसमीपे वा स्थापयेत् । खड्गं छुरिकासमीपे स्थापयेत् । पुनः प्रतिष्ठां यावत् प्रत्यहं त्रिसन्ध्यं पूजयेत् ।

दक्षिणादानम् । अभिषेकः अग्निदेवताविसर्जनम् । आशीर्वादः । कर्मसमाप्तिः । अनेन चालनविधिना भगवान् परमेश्वरः प्रीयताम् ।

इति प्रासादपिण्डिकाप्रतिमाचालनविधिः ।

## ९६ प्रतिष्ठासार दीपिकोक्तः कलशारोपण (शिखरप्रतिष्ठा) विधिः ।

(अयं विधिः शिखरभङ्गे सति शिखरान्तरारोपणे कार्यः । नूतनप्रासादे सप्रसादप्रतिष्ठाविधौ तु 'सशिखरं प्रासादं स्नपयेद्' इति वचनबलात् प्रतिष्ठाविधिना साकं शिखरस्य जलाधिवासं कुटीरहोमं स्नपनविधिं च कृत्वा संपूज्य प्रासादे कलशं शिखरं समारोप्य लेपादिना सुस्थिरं कृत्वा सम्पूज्य प्रासादस्नपनं कुर्यात् । होमकाले प्रासादप्रधानदेवतामन्त्रेण० आजिघ्रकलशं० इति मन्त्रेण वा होमं कुर्यात्, प्रासादाधिवासनञ्च । कलशप्रतिष्ठाविधेः प्रधानतन्त्रेण सह समवायान्न पृथक् शिखरप्रतिष्ठाया आवश्यकत्वमिति बोध्यम् । )

सुमुहूर्त्ते कृतस्नानसन्ध्यादिनित्यक्रियः सपत्नीकः कर्ता वस्त्राच्छादितपीठे प्राङ्मुख उपविश्य । तिलककरणम् । शिखाबन्धनम् । आचमनम् । प्राणायामः । शान्तिपाठादि । सङ्कल्पः- समस्तपितॄणां प्रासादप्रतिमाणुसंख्याकवर्षाणि यावद् ब्रह्मलोकनिवासहेतवे मम सकुटुम्बस्य सकलकामनासिद्ध्यै अमुकदेवताप्रासादोपरि नूतनकलशारोपणाख्यं कर्म करिष्ये । गणेशपूजनादि पञ्चगव्यकरणान्तं कृत्वा स्थण्डिलात् पुरतः हस्तमात्रां वेदीं प्रकल्प्य वेदीकोणेषु चतुरः कलशान् पञ्चरत्नफलाद्युपेतान् संस्थापयेत् ।

ततो वेद्याः पश्चाल्लौकिकाँश्चतुरः कलशान् संस्थाप्य तत्पुरत उष्णोदककलशं संस्थाप्य तत्पुरतः १ गन्धोदक २ पल्लवोदक ३ सर्वौषधी ४ अक्षतोदकसहिताश्चत्वारः कलशाः स्थापनीयाः । एवं त्रयोदश कलशान् स्थापयेत् ।

Scanned by CamScanner